लोकप्रियसाहित्यग्रन्थमाला - ४१

वैद्यश्रीकृष्णरामभट्टप्रणीतम्

# कच्छवंशमहाकाव्यम्

सम्पादकौ
**डॉ. रमाकान्तपाण्डेयः**
**डॉ. रानीदाधीच**

**राष्ट्रियसंस्कृतसंस्थानम्**
मानितविश्वविद्यालयः
नवदेहली

प्रकाशकः
कुलसचिवः
**राष्ट्रियसंस्कृतसंस्थानम्**
५६-५७, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-86-9

प्रथम संस्करण : २०१२

मूल्यम् : ३०० /- ₹

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-९
E-mail - amarprintingpress@gmail.com



**वैद्यः श्रीदेवेन्द्रभट्टः**

दि. १०.०२.१९२५ – ३१.१०.२०११

**यस्य प्रकाशनं स्वप्नो येन रम्योऽवलोकितः।**
**स्वप्न एव कृतान्तेन कृतः क्रूरेण कर्मणा॥**
**तस्य देवेन्द्रभट्टस्य स्मृतावेतत्प्रकाशितम्।**
**अर्प्यते कच्छवंशं तत्प्रपितामहकर्तृकम्॥**

डॉ. रमाकान्तपाण्डेयः
डॉ. रानीदाधीच

# पुरोवाक्

साम्प्रतिकोऽयं समयो वर्तते संस्कृतभाषाया नवोन्मेषस्य नूतनसम्भावनानां च। अयं नवोन्मेषो नवीनाश्च सम्भावना: समसामयिके संस्कृतसाहित्येऽपि प्रतिफलन्तीति शक्यं सुखमुच्छ्वसितुं सर्वै: सुरभारतीसेवकै:। यथा भारतीयप्रज्ञाया दायं बिभ्राणास्ते ते तेजस्विन: पण्डिता: प्रकटयन्ति शास्त्रवैभवम्, तथैव नैके कवयन्ति पर:शतं सुकवय: निबध्नन्ति च विविधान् ग्रन्थान् अगणिता: साहित्यरचनानदीष्णा: सरस्वत्या: सुपुत्रा अस्यामेव भाषायाम्। वस्तुत ऊनविंश-विंशशतकयोर्विपुलं साहित्यं संस्कृते व्यरचयन्नेते सुधिय: सुकवय:। तस्य साहित्यस्य बहुमूल्यानि रचनारत्नानि सम्प्रति लुप्तप्रायाणि। वीरेन्द्रकुमारभट्टाचार्य-हरिदाससिद्धान्तवागीशहृषीकेशभट्टाचार्य-अप्पाशास्त्रिराशिवडेकरसदृक्षाणां कवितल्लाजानां समग्रं साहित्यमिदानीं न लभ्यते।

राष्ट्रियसंस्कृतसंस्थानेन एतादृशानामुत्तमोत्तमरचनाकाराणां लुप्तप्रायस्य सत्साहित्यस्य पुनरुद्धाराय पुन:प्रकाशनाय च पदक्षेपो व्यधायि। अस्मिन्नुपक्रमे भट्टमथुरानाथशास्त्रिणां रतिनाथझावर्याणां मूलशङ्करमाणिकलालयाज्ञिकस्य च समग्रा रचना ग्रन्थावलीरूपेण प्रकाशिता:।

आधुनिकसंस्कृतसाहित्यस्य विकासे जयपुरराज्यस्य महनीयं योगदानं वरीवर्ति। कविकलानिधिश्रीकृष्णभट्ट-सीतारामभट्टपर्वणीकर-विश्वनाथरानाडेप्रभृति जयपुरस्थकवीनां प्रातिभं संस्पर्शमवाप्य संस्कृतसाहित्यमभिनवां विकासधारां प्रापत्। अत्रैव निवसन् मधुसूदनओझासदृशो महामनीषी वैदिकसिद्धान्तानामपि वैज्ञानिकव्याख्यापद्धतिमाविश्चकार। तथैव भट्टमथुरानाथशास्त्री साहित्यवैभवजय-पुरवैभवादिग्रन्थप्रणयन-व्याजेनाऽस्पृष्टामभिनवां काव्यरचनापरम्परां प्रतिष्ठा-पयामास।

कच्छवंशमहाकाव्यस्य प्रणेता वैद्यश्रीकृष्णरामभट्टोऽपि विविधविधा-संवलितसंस्कृतकाव्यरचनया संस्कृतसाहित्यस्य विकासेऽनुपममवदानं प्रादात्।

असौ हि आर्यालङ्कारशतक–जयपुरविलास–जयपुरमेलककुतुक–होलोत्सवभाण–पलाण्डुराजदिग्विजय–मुक्तकमुक्तावलिप्रभृतिकाव्यानि तथैव सिद्धभेषजमणि–मालादिचिकित्साग्रन्थान् विरच्य साहित्यायुर्वेदयोरुभयोरपि विकासे स्वीयं वैदग्ध्यं प्रकटीचकार।

सप्तदशसर्गेषु निबद्धं कच्छवंशमहाकाव्यमिदमैतिहासिकवस्तुसंवलितं सदपि महाकाव्यगुणोपेतं सहृदयहृदयाह्लादनक्षमं च वर्तते। कवेर्नैकशास्त्रप्रागल्भ्यं प्रकटयदिदं महाकाव्यमैतिहासिकघटनास्तिथिनिर्देशपुरस्सरं प्रस्तौतीति न केवलं काव्यप्रणयिनां कृतेऽस्योपयोगित्वमपि त्वैतिह्यविदां कृतेऽपीत्यपरोऽयमस्य विशेषः। रघुवंशशिशुपालवधेश्वरविलासादिमहाकाव्यानां प्रभावोऽत्र बहुत्राऽवलोक्यते। यथा–

व्यालोलहेतिरसनो द्विजपाणिहुतं हविः।<br>
चिराय क्षुधितो वेगाद् गृह्णाति स्म हुताशनः।।

यदध्वरे हवींष्यत्तुं क्ष्मां सर्पत्सु सुपर्वसु।<br>
आसीत्स्वःपाकशालाऽलं लूतालीतन्तुदन्तुरा।।

जयेन्द्रेऽजस्रसत्रान्तर्हुताज्यावर्जिताजिरे।<br>
तल्पानि नाकनारीणामभजन्नर्धशून्यताम्।।

अस्मिन् जयपुराधिष्ठातुर्जयसिंहस्याध्वरवर्णने शिशुपालवधोक्तयुधिष्ठिरयज्ञवर्णनस्य प्रभावं द्रष्टुं शक्नुवन्ति सुधियः–

लोलहेतिरसनाशतप्रभामण्डलेन लसता हसन्निव।<br>
प्राज्यमाज्यमसकृद्वषट्कृतं निर्मलीमसमलीढ पावकः।।

तत्र नित्यविहितोपहूतिषु पतिषु द्युयोषिताम्।<br>
गुम्फिताः शिरसि वेणयोऽभवन्न प्रफुल्लसुरपादपस्रजः।।

क्वचिदुष्ट्रादीनां स्वभावोक्तिवर्णनेऽपि कविरयं भजते वैशिष्ट्यम्–

विपुलगतिभिरुष्ट्रैः सैनिकाकृष्टनासा–<br>
गुणविवलितवक्त्रप्रस्रवत्फेनपुञ्जैः।

कथमपि पथि तांस्ताञ्जाङ्गलान् गाहमानो
दृढपिहितकपाटामासदद् राजधानीम्।।

अश्वटापक्षुब्धधूलिसौन्दर्यवर्णनयाऽपि सहृदयमनो हरति कविः–

खमर्वद्भिरापूरि टापक्षतक्ष्मासमुड्डीनधूलीघटाभिर्हठेन।
पुनः कुञ्जरैरुच्चकैस्तद्व्यशोधि समुत्क्षिप्तशुण्डोच्छलत्सीकरौघैः।।

वीरोऽत्र प्रधानो रसः। शृङ्गारादयोऽन्ये रसा अपीह तत्तत्प्रसङ्गेषु दृश्यन्ते। महाकाव्येऽस्मिन् प्राप्तानि प्रकृतिवर्णनादीनि महाकवेरस्य भौगोलिकपरिस्थितिज्ञानमपि पुरस्कुर्वन्ति। वीररौद्रयोर्वर्णने नूनं विशिष्यतेऽयं कविः। यथा–

भ्राम्यद्भैरवभूतभैरवरवं नृत्यत्कबन्धोद्भवम्
चण्डीचर्वितवीरमुण्डमुदयच्छोणापगादुर्गमम्।
उच्चैर्दन्तिशवव्यवस्थितभटं व्याकीर्णरत्नोत्कर–
द्योतद्योतितदिङ्मुखं खलु चिरं भाति स्म जन्याजिरम्।।

तथा च विष्णुसिंहस्य युद्धवर्णने–

अन्योन्यमुक्तशरवर्षनिकृत्तकुम्भि–
कुम्भस्थलोच्छलितमौक्तिकपुञ्जमञ्जु।
प्रावर्तत प्रधनमस्य परैः परेत–
पोलोदरम्भरि कबन्धकदम्बभीमम्।।

वैद्यः श्रीकृष्णरामभट्टः प्रचीनानां जयपुरराजपण्डितानां तेषां कृतीनां चापि परिचयं यथाप्रसङ्गं प्रस्तौति। हरिजीवनमिश्रो माधवभट्टः सम्राड् जगन्नाथो रत्नाकरपुण्डरीकस्तथा च तत्सदृशा अनेके महामनीषिणोऽत्र यथा प्रसङ्गं स्मृताः सुकविनाऽनेनेति तत्कालीनपण्डितप्रवराणां संस्कृतपरम्पराणां समृद्धये तैः सम्पादितसारस्वताध्वराणां च परिज्ञानाय ग्रन्थोऽयं सुमहान्कोशः।

तच्चेदं सुमहत्कलेवरं नाना छन्दोविच्छित्तिविच्छुरितं प्रायशस्त्रि–सहस्रपद्यात्मकं महाकाव्यमद्यावधि प्रकाशतां नैवोपागच्छत्। राष्ट्रियसंस्कृतसंस्थानं तदिदं प्रकाश्य हर्षप्रकर्षमनुभवति महाकविश्रीकृष्णरामभट्टवंशजेभ्यो, विशिष्य वैद्यदेवेन्द्रभट्टमहोदयेभ्यः सकार्तज्ञ्यभावं धन्यवादाञ्जलिं समर्पयति। श्रीमतां

देवेन्द्रभट्टमहोदयानां कच्छवंशमहाकाव्यप्रकाशनस्वप्नोऽद्य पूर्णतामेति किन्तु हन्त! दुर्दैवाद् गत एव मासे ते शिवसायुज्यं प्रापुरिति श्रुत्वा समुत्पद्यते मनसि महान् क्लेशः।

डॉ. रमाकान्तपाण्डेयः महता प्रयत्नेन काव्यमिदं समपादयत्। पूर्वमपि श्रीपाण्डेयः ईश्वरविलासमहाकाव्य-मञ्जुनाथगद्यगौरव-मञ्जुनाथग्रन्थावलीप्रभृति-ग्रन्थसम्पादनप्रकाशनव्याजेन जयपुरे प्रणीतसंस्कृतसाहित्ये स्वदीक्षाचणत्वं प्राकटयत्। डॉ. रानीदाधीचमहोदया च सोत्साहं कार्येऽस्मिन् तस्य साहाय्य-माचरदित्यनयोः प्रयासेन महाकाव्यमिदं प्रकाशनं गच्छति। महाकाव्यस्यास्य प्रकाशनं न केवलं जयपुरस्य संस्कृतसाहित्यसमृद्धिं विभावयिष्यति समग्रा एव संस्कृतसाहित्यपरम्परा दीपयिष्यतीति विश्वसिमः।

**राधावल्लभत्रिपाठी**
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्

# भूमिका

अथेदं प्रकाश्यते महाकविना वैद्यश्रीकृष्णरामभट्टप्रणीतं सप्तदशसर्गान्वितं कच्छवंशं नाम महाकाव्यम्। कच्छशब्देनाऽत्र कच्छवंशीयाः क्षत्रिया जयपुरशासका राजानोऽभिधीयन्ते। कच्छवंशवर्णनपरत्वादिदं महाकाव्यं कच्छवंश-नाम्नाऽभिहितम्। तच्चेदं महाकाव्यं रघुवंशादिवद् बहुनायकं महाकाव्यम्। अस्य प्रणेता श्रीमान् कृष्णरामभट्टः वैक्रमाब्दे १९०५ वर्षे भाद्रकृष्णाऽष्टम्यां जयपुरे 'भट्टमेवाड़ा' ब्राह्मणकुले जनिमलभत। भट्टमहोदयेन स्ववंशस्येतिहासः 'होलामहोत्सव' भाणेऽन्येषु ग्रन्थेषु च सविस्तरं प्रत्यपादि।[१]

कृष्णरामभट्टस्य पूर्वपुरुषो वैद्यश्रीलक्ष्मीरामव्यासः जयपुरनरेशस्य सवाईप्रतापसिंहस्य (१७७८-१८०३) शासनकाले जयपुरम् आगतः। महाराजेन प्रतापसिंहेन चाऽयं सादरं राजवैद्यपदे प्रतिष्ठापितोऽभूत्। अयं लक्ष्मीराम एव जयपुरे भट्टवंशस्याऽस्य प्रवर्तकः। लक्ष्मीरामस्य पुत्रौ उदयरामो भट्टः लल्लुरामभट्टश्च (विष्णुरामः) आस्ताम्। राजवैद्यस्य लल्लूरामस्य पुत्रः कुन्दनरामस्तस्य चाऽयं महाकविः श्रीकृष्णरामभट्टः। षोडशशतकात् कवेरस्य वंशपरम्परायाः समग्रोऽपि परिचय उपलभ्यते। कवेरस्य प्रपौत्रेण वैद्यश्रीदेवेन्द्रभट्टेन सोऽयं वंशपरिचयः 'वैद्यकुलगुरुवैभव' इति ग्रन्थे प्रपञ्चित इति पिष्टपेषणभयान्नेह पुनःप्रतन्यते।[२]

**वैद्यश्रीकृष्णरामभट्टस्य कृतीनां परिचयः-**

वैद्यश्रीकृष्णरामभट्टेन विरचिता नैके ग्रन्था उपलभ्यन्ते। तेषु आर्यालङ्कारशतकम्, पञ्चमहाकाव्यसारशतकम्, जयपुरविलासकाव्यम्, मुक्तकमुक्तावलिः, छन्दोगणितम्, पलाण्डुदिग्विजयम्, गोविन्दभट्टभङ्गम्,

---

१. अत्रैव भूमिकान्ते योजितम्।

२. द्रष्टव्य- वैद्यकुलगुरुकाव्यवैभव, सं. देवेन्द्रभट्टः, प्रका. कीर्तिशेखरभट्टः, २३८, श्रीद्वारकाधीश मन्दिर, चौड़ा रास्ता, जयपुर।

होलोत्सवभाणः, जयपुरमेलककुतुकम्, नाथस्तवः, गप्पसमाधानम्, काशीनाथस्तवः, सम्राट्सुताभिनन्दनम्, माधवपाणिग्रहोत्सवः, गोपालगीतम्, पत्रप्रशस्तिः, सिद्धभेषजमणिमाला (आयुर्वेदग्रन्थः) इत्येते ग्रन्थाः सन्ति। सिद्धभेषजमणिमालायामेतेषां ग्रन्थानां स्पष्टमुल्लेखः प्राप्यते–

आर्यालङ्कारशतकं पञ्चमहाकाव्यसारशतकं च।
जयपुरविलासकाव्यं मुक्तकमुक्तावलीनामा।।

श्रीकच्छवंशं छन्दोगणितं पलाण्डुदिग्विजयम्।
गोविन्दभट्टभङ्गं तथैव होलोत्सवो भाणः।।

जयपुरमेलककुतुकं नाथस्तवः कनीयान्।
गप्पसमाधानमद्भुतं तद्वत्काशीनाथस्तवोऽपि तथा।।

सम्राट्सुताभिनन्दनं माधवपाणिग्रहोत्सवावच्छौ।
गोपालगीतपत्रप्रशस्तिमुख्यानि खण्डकाव्यानि।।

एतेषु सारशतकं जयपुरविलासकाव्यं मुक्तकमुक्तावली पलाण्डुदिग्विजयं गोविन्दभट्टभङ्गं पत्रप्रशस्तिः सिद्धभेषजमणिमाला होलोत्सवभाण इत्येते ग्रन्थाः सन्ति प्रकाशिता अन्येऽद्यापि प्रकाशनमुखमपेक्षन्ते।

इदं कच्छवंशमहाकाव्यमिदं प्रथमतयेह प्रकाशतां गच्छति। इदं महाकाव्यं जयपुरराजवंशवर्णनपरं विद्यत इत्यस्य नाम्नैव ज्ञायते। महाकाव्येऽस्मिन् सप्तदशसर्गा विलसन्ति। अत्र आहत्य २७८८ पद्यानि सन्ति। द्वादशत्रयोदशसर्गयोः सहैव सन्निविष्टिरत्र विद्यते। आचार्यः प्रभाकरशास्त्रिमहोदयोऽत्र सप्तदशसर्गे ७१ पद्यानामुल्लेखं करोति[३] किन्त्वस्माभिरधिगतमातृकायां १०२ पद्यानि सन्ति। यद्यप्येतेषु कानिचित्पद्यानि सुवाच्यानि न सन्ति, केषुचित्पद्येषु क्रमभङ्गोऽपि प्रतीयते तथापि संख्यादृष्ट्या तु तेषां महत्त्वमस्त्येव। शास्त्रिमहाभागः सप्तदशसर्गस्य एकसप्ततिश्लोकं यावदस्य पाठं लिखति। इयमेव संख्याऽस्माभिरप्यङ्गीकृता। अवशिष्टानि पद्यानि ग्रन्थान्ते परिशिष्टरूपेण योजितानि। एकस्मिन्निबन्धे प्रो गङ्गाधरभट्टः सप्तदशे सर्गे ६३ पद्यानि निर्दिशति।

---

३. द्रष्टव्यः– राजस्थान के प्रमुख संस्कृत महाकाव्य।

महाकाव्यस्य प्रारम्भे मङ्गलाचरणपरम्परामाचरन् कविरसौ श्रीशब्दमुच्चारयति–

श्रीमन्नारायणस्यासीत्पद्मतो नाभिसद्मतः।
ब्रह्मदेवः श्रुतिव्याख्याचतुरश्चतुराननः।। (१.१)

अनेनैव मङ्गलपद्येन स कच्छवंशस्य पौराणिकं वर्णनमपि प्रारब्धवान्। महाकाव्यस्य प्रथमद्वितीयसर्गयोः कच्छवंशपूर्वपुरुषाणां वर्णनमकारि। तत्र भगवान् नारायणो वंशस्याऽस्य परमपुरुषोऽभिमतः। अनन्तरं ब्रह्मदेवः मरीचिः कश्यपः विवस्वान् मनुः इक्ष्वाकुः विकुक्षिः पुरञ्जयोऽनेनाः पृथुप्रभृतयो बहवः पौराणिका राजानोऽत्र सन्ति स्मृताः। अस्मिन् सर्गे ३९ पद्यानि सन्ति। कविः प्रतिसर्गमन्ते सगर्वं स्वपितुः स्मरति–

श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।
काव्येऽत्र कच्छवंशे सर्गोऽभूत्प्रथमसर्गस्य।।

द्वितीयसर्गेऽपि सैवेयं राजवंशावलिः समुपक्रान्ता। तृतीयसर्गात् कच्छवंशप्रवर्तकानां राज्ञां वर्णनं व्यधायि। कविः स्ववर्ण्यराज्ञां यशःशौर्यादिवर्णने विद्यते दत्तावधानः। स विविधैर्विशेषणैस्तान् सर्वानपि समलङ्करोति। यथा–

स राजा राजराजर्द्धी राजन्राज्ये जयोज्ज्वलः।
अनेकानेकपानीको दिशो गत्वा द्विषोऽवधीत्।। ३.३।।

अत्र 'राजराजर्द्धिः' इति पदेन कुबेरेण साम्यं प्रतिपादयन् कविः 'अनेकानेकपानीकः' इति शब्देन राज्ञोऽसिसिंहस्य बहुषु नृपेषु प्रभावं प्रत्यपादि। एतादृशविशेषणानामत्र दृश्यते बाहुल्यम्। कविभिः वंशपरम्परोपाख्याने प्रायशः पितुर्नाम एव दीयते, महाकाव्येऽस्मिन् मातृनामोल्लेखोऽपि लभ्यत इति कवेरस्य वैशिष्ट्यम्।

चतुर्थसर्गे राज्ञः काकिलस्य वर्णनं विद्यते। अयं काकिलदेव एव आमेरनगरं समागत्य कुलदेव्या आदेशेन तत्र स्वराजधानीं चकार। अनन्तरं जानड़देवादयोऽत्र राजानो बभूवुः। पञ्चमसर्गे विज्जलदेवस्य तत्पुत्राणां च वर्णनमकारि कविना। अयं मलेशेः पुत्र आसीत्। मलेशेः ३२ पुत्राणामुल्लेखोऽत्र लभ्यते। षष्ठे सर्गे चन्द्रसेनादारभ्य आशकरणस्य शासनकालं यावद् वर्णनं

लभ्यते। अस्मिन्नेव सर्गे पृथ्वीराजसिंहस्य वर्णनमकरोत् श्रीमान् कृष्णरामभट्टः। कविकलानिधिश्रीकृष्णभट्टेन ईश्वरविलासमहाकाव्ये पृथ्वीराज एव कच्छवंशीयानां पूर्वपुरुषरूपेण वर्णितः। पृथ्वीराजात् पूर्वं ये राजानो बभूवुस्तेषां चर्चा ईश्वरविलासमहाकाव्ये न लभ्यते। सप्तमसर्गे भारमल्लस्य वर्णनं विद्यते। अस्य भगवन्तदासभगवानदासौ द्वौ पुत्रौ रत्नकंवराभिधा चैका कन्याऽऽसीत्-

भारमल्लस्य भूभर्तुर्भार्या दश बभूविरे।
ज्येष्ठा वदनदा तत्र राष्ट्रोढदुहिताऽभवत्।।

पुरो दासो भगवतो भगवानः सुतावुभौ।
कन्यैका रत्नकंवरा त्रीण्यपत्यानसूत सा।। (७.९-१०)

अकबरस्य प्रधानसेनापतिः मानसिंहः भारमल्लस्य पौत्र आसीत्। मानसिंहस्य पराक्रम इतिहासे विश्रुत एव। अस्मिन्नेव सर्गे मानसिंहराणाप्रतापयोर्वैरकथा विस्तरेण वर्णिता-

श्रीमान्पुनरितो हंहो मानसिंहो महामनाः।
समीयायोदयपुरं पुरन्दरपराक्रमः।।

आकारितः प्रतापेन प्रतापजितपावकः।
ययावभीरिभं पश्यन्परसादं नृपात्मजः।।

इभः प्रेक्ष्य कुमारेभं कुमारेभोऽपि तं पुरः।
उभौ द्रागगण्डसंघट्टं जघटाते परस्परम्।।

एतस्मिन्नन्तरे यन्ता मानकुम्भीन्द्रकुम्भतः।
उत्पपात प्रतापस्य परसादाभिधे द्विपे।।

ततस्तमङ्कुशैर्भल्लैर्विधाय रुधिरोद्गिरम्।
मृतप्रायमिव ज्ञात्वा मोचयामास साहसी।।

प्रतापदत्तहस्तोऽसौ समासाद्यत्तदालयम्।
स जेमनाय सामन्तान्कारयामास मण्डलीम्।।

तत्रैव चैकतो दूरे मृगया कुक्कुरानपि।

आनाय्य स्थापयामास श्वपचाकृष्टशृङ्खलान्।।

स्वर्णद्रोणीषु सूदेन्द्रैः पायसे परिवेषिते।
भोक्तुमह्वास्त सीसादं मानसिंहो दुराग्रही।।

ततः प्रतापसीवर्मा हसन्वक्रोक्तियुक्तिभिः।
अजीर्णार्तिमिषाद् धूर्तो न स्वीचक्रे सहाशनम्।।

नभोजनसमानश्रीर्मानसिंहोऽपि भो जनाः!।
भोजनं सारमेयेभ्यो भोजयामास रोषतः।।

उन्मुक्तशृङ्खलाः श्वानः श्वपचैः पायसादि तत्।
लिलिहुर्घुर्घुराराविनिनादितमहानसाः।।

प्रतापे पश्यति श्वभ्यो दापयित्वेति पायसम्।
उदतिष्ठदलं मानी मानो लोहितलोचनः।।

(७.१०१-११२)

सेयं कथा तत्तद्ग्रन्थेषु तत्तद्रूपेण लभ्यते।

अष्टमे सर्गे मानसिंहस्य राज्याभिषेको वर्णितोऽस्ति। अस्मिन्नेव सर्गे जगत्सिंहादयो मानसिंहपुत्रा अपि वर्ण्यविषयतां भजन्ते। मानसिंहात्परं यद्यपि भावसिंहादयोऽनेके राजानो बभूवुः किन्तु जयसिंहः (प्रथमः) एव राजगुणोपेतः कलायुद्धादिप्रवीणश्चाऽभूत्। अस्मिन् सर्गे मानसिंहस्य युद्धयात्रादीनां विस्तरेण वर्णनं प्राप्यते-

दाता वीरोऽतिधीरो निपुणमधुरगीर्धर्मकर्माप्तशर्मा
भासां राशिः शुभाशीः प्रवरतरगुणग्रामभूमिर्यशस्वी।
सद्भक्तिव्यक्तियुक्तो हरिपदकमले सर्वशः कच्छपानां
सुत्रामा मानसिंहो जगति समजनि श्रीमहाराजसंज्ञः।।

यद्राज्ये सुखिनो बभूवुरखिलक्षोणीजनाः सर्वतो
यस्तं काबिलमप्यगम्यमितरैर्जित्वाऽनयत्स्वे वशे।
यः शश्वन्निविडीचकार चरणैर्धर्मं चतुर्भिः कलौ
सोऽयं माननृपः स्तुतो भुवि न कैः साहीन्द्रगीतस्तुतिः।।

कीर्त्तिः स्वर्गतरङ्गिणी सुविशदा श्रीमानसिंहप्रभोः
प्रोद्यच्छत्रुकदम्बहृद्गिरिवरान्संदारयन्ती रयात्।
उच्चैस्तच्चरिताब्जपुञ्जपरमोल्लासा जगत्पाविनी
शक्तिस्तोमजलावहा त्रिजगतीमुल्लङ्घ्य दूरं गता।।

मातुं मानमहांस्यतीव न गुरुः प्रौढोऽपि सन्स्वर्गुरुः
सा गीर्गायति किन्तु नान्तमयते काव्यस्य कक्षा कुतः।
वल्मीद्वीपभवौ कवी तु जरठौ का मादृशानां कथा
यत्सङ्ख्याकलनक्रियासु विकलः शेषोऽपि शिष्यायते।।

(८.२१७-२२०)

नवमसर्गे जयसिंहस्य (प्रथमस्य) तस्य पुत्रस्य रामसिंहस्य च विशदं वर्णनं प्राप्यते। अस्मिन् सर्गे नवरङ्गरायस्य (औरङ्गजेबस्य) जन्मकुण्डली कविना प्रादर्शि। शिवाजीवीरे जयसिंहस्य (प्रथमस्य) विजयं शिववीरस्य च देहलीनगरागमनं नवरङ्गरायेण तस्य कारायां स्थापनं रामसिंहेन युद्धं नवरङ्गरायेण विषं दापयित्वा जयसिंहस्य वधादिकं चेति नैके विषया इह सन्ति निरूपिताः।

रामसिंहः जयसिंहस्य ज्येष्ठपुत्र आसीत्। अस्य कृष्णसिंहनामा पुत्रोऽभवत्। कृष्णसिंहः दक्षिणदेशे क्वचिन्मृतः। कृष्णसिंहस्य मृत्युतिथिरत्र निरदेशि कविना-

फाल्गुने मासि धवले द्वितीयायां क्षतातुरः।
नन्दाद्रिसप्तकावब्दे कृष्णसिंहो व्यपद्यत।। (९.१७८)

अस्मिन् सर्गे हरिजीवनमिश्रशङ्करभट्टयोरप्युल्लेखो विद्यते।

दशमसर्गे महाराजविष्णुसिंहस्य वर्णनं लभ्यते। जट्टानां देहल्यामाक्रमणं, विष्णुसिंहस्य तस्मिन् काले काबुलगमनम्, विष्णुसिंहस्य नवरङ्गं प्रति पत्रप्रेषणमित्यादयो विषया इह सन्ति वर्णिताः। जयपुरसंस्थापको महाराजजयसिंहो विष्णुसिंहस्यैव पुत्र आसीत्। दौहृदलक्षणायास्तन्मातुर्वर्णने श्रीकृष्णरामभट्टः कालिदासकृतसुदक्षिणादौहृदलक्षणवर्णनमनुसरति-

अथेन्द्रकुँवरा राज्ञी राष्ट्रोढकुलसम्भवा।
गर्भं बभार महितमहितानुशयप्रदम्।।

सा लक्ष्यत विलक्षाभमुखमुग्धाऽल्पमण्डना।
अतन्द्रचन्द्रा विरलनक्षत्रा क्षणदा यथा।।

गर्भोद्वहनखेदेन तनुस्तस्यास्तनुर्ननु।
कञ्जकिञ्जल्कितव्यञ्जत्कर्णिकेव व्यराजत।।

अलङ्कृतीर्विजहतीर्गुर्वीरुर्वीपतेः प्रिया।
निसर्गसुन्दरैरङ्गैः शोभामनुपमां दधौ।।

चकासाते कुचौ तस्याः पीवरौ श्यामचूचुकौ।
दुग्धमुग्धाविव घटौ नीलाश्मपिहिताननौ।।१०.३८-४२।।

अस्मिन्नेव सर्गे माधवभट्टस्य आमेरनगरागमनं वर्णयामास कविः। सर्गान्ते विष्णुपुत्रस्य जयसिंहस्य जयपुरनगरस्थापनासङ्कल्पोऽप्यत्रैव लभ्यते। जयपुरे कल्किमन्दिरस्य निर्माणं सीतराममन्दिरस्य स्थापनां, गोविन्ददेवं गालवाश्रमे मन्दिरनिर्माणं रत्नाकरपौण्डरीकस्य जयपुरागमनं हयमेधसङ्कल्पादिकं सविस्तरं वर्णयामास कविरस्मिन् सर्गे। अत्र ९५२ पद्यानि सन्ति। केचन मनीषिणोऽत्र ९१० श्लोकं निर्दिशन्ति[४]।

एकादशसर्गे जयसिंहकृतवाजपेययागस्य वर्णनं, हयमेधवर्णनं, हयमेधयागार्थं विदुषां नाना दिग्देशेभ्यो जयपुरागमनं तथा चाऽन्ये विषयास्तिथिनिर्देशपुरस्सरं वर्णिताः। जयसिंहकृताऽश्वमेधयागस्य वर्णनम् ईश्वरविलासादिमहाकाव्येष्वपि लभ्यते किन्तु तत्र तिथिनिर्देशो नास्ति। अत्र यागस्याऽस्य तिथिनिर्देशोऽपि कृतः-

वर्षे चन्द्राङ्कशैलेन्द्रे श्रावणे धवले दले।
बभूव हयमेधस्य प्रारम्भो नवमीतिथौ।।१०.५२०।।

प्रसङ्गेऽस्मिन् यज्ञसम्पादनाय जयपुरं प्राप्तानां कमलाकरचयनी-गोकुलनाथगोस्वामि-हरिकृष्णशर्म-रामचन्द्रशर्म-केशवदीक्षितादिश्रोत्रियाणां समुल्लेखो व्यधायि। अत्र ईश्वरीसिंहस्य युद्धवर्णने नूनं विशिष्यते कविः-

---

४. द्रष्टव्य- राजस्थान के प्रमुख महाकाव्य में प्रो. प्रभाकरशास्त्री का लेख, पृ. २६२-२९०, प्रका. राजस्थान संस्कृत अकादमी, जयपुर, १९९८।

व्यापन्नद्विपकूटनिर्गलदसृक्स्रोत:शतैरुक्षिते
भूतप्रेतपिशाचराक्षसघटाप्रोत्तालकोलाहले।
चक्रे शत्रुचमूचमूरुकदनव्यापारवानीश्वरी-
सिंहो हन्त रणाटवीपरिसरे शार्दूलविक्रीडितम्।।

(११.१११)

इह ईश्वरविलासमहाकाव्यस्य प्रभाव: स्पष्टमेव दृग्गोचरीभवति। जयसिंहस्य मृत्युवर्णनमपि सर्गेऽस्मिंल्लभ्यते-

इह खलु चतुश्चत्वारिंशत्समा: कुसुमायुध-
प्रतिममहिमा राज्यं प्राज्यं प्रशास्य यथाविधि।
खखवसुविधावब्दे पक्षे तथाश्वयुजोऽर्जुने
स्वरुषसि चतुर्दश्यां पुण्यैरपद्यत विष्णुज:।। ११.१२०।।

द्वादशत्रयोदशयो: सर्गयो: ईश्वरीसिंहस्य वर्णनं वरीवर्ति। ईश्वरीसिंहस्य राज्याभिषेको विविधेभ्यो राजभ्य उपायनप्राप्ति: श्रीकृष्णभट्टाय ईश्वरविलासमहाकाव्यप्रणेत्रे ग्रामादिदानमिति नैके प्रसङ्गा अत्र महाकवेरस्य वर्णनविषयतां भजन्ते। ईश्वरीसिंहस्य पितृगुणानुरूपतेह पदे पदे दृश्यते।

जयपुरेतिहासे ईश्वरीसिंहमाधवसिंहयो राज्यविवाद: कलङ्कायते। अस्मिन् सर्गे कविरयं तत्सर्वं निर्दिशति। राजमल्लादीनां मन्त्रिणां मृत्यो: परमीश्वरीसिंहोऽयं निर्बल: संवृत्त:। केशवरावं स्वामिभक्तं मन्त्रिणं विषं दापयित्वा स्वयमेव ईश्वरीसिंहोऽमारयत्। सेयं घटना महाकाव्येऽस्मिन् विस्तरेण वर्णिता-

स राजमल्लादिषु मन्त्रिचुञ्चुषु
यथाक्रमं कालगतिं गतेषु।
व्यधत्त धीमन्तममात्यमुच्चकै-
र्धुरन्धरं केशवदासमीश्वर:।।

मल्लाररावो बत माधवोदितो
बिभेद सामन्तसमाजमैश्वरम्।
स्यादन्यथा भाविनि हन्त भाविनी
दुर्भेद्यमप्यत्र सुभेद्यमञ्जसा।।

निरन्तरं माधवगूढवेतनैः
समेत्य सर्वैरपि राजपूरुषैः।
राज्ञः कथञ्चिद् विमनस्कता शनै-
रुत्पादिता केशवदासमन्त्रिणि।।

अहो अयं दास्यति माधवाय मा-
मिति भ्रमं तत्र दधौ सुमन्त्रिणि।
आसन्नपाता भवितव्यताबला-
द्धितं विपर्येण विदोऽपि मन्वते।।

अथो तमाहूय स पक्वकल्मषो
विलुप्तबुद्धिः प्रतिकूलदैवतः।
चेदस्मदीयोऽसि तदेदमापिबे-
त्युच्चार्य तस्मै गरलं हहा ददौ।।१२.२३८-२४२।।

अनन्तरं जयपुरनगरोपगं मल्लाररावं श्रुत्वा ईश्वरीसिंहः स्वयमेवोग्रं विषं पीत्वा स्वप्राणान् जहौ-

आसीद् द्विजः कश्चिदमुष्य पार्श्वगः
स द्रागमुं प्राह पुरः कृताञ्जलिः।
राजन्नृते मामिह कोऽपि नास्ति वः
सर्वेऽधुना माधवमाश्रिता इति।।

निशम्य तादृक्स्वमनिष्टमुच्चकै-
र्धीरोऽप्यकस्मात्स्फुटिताम्बरः शुचा।
रुरोद हा हन्त कुतो गतोऽसि भो
हित्वा सखे केशवदास मामिह।।

विलप्य कष्टं बहुधाऽभिचारवि-
दावाह्य कृत्यां कलशे नियम्य सः।
अमुं बले न्यस्य रिपोरुपेहि मा-
मित्यन्वशासद् द्विजमन्तिकस्थम्।।

द्विजस्तमादाय घटं नृपोदित:
कृत्यासमावेशवशेन दुर्वहम्।
सैन्ये निधातुं द्विषतामशक्नुवन्
न्यधत्त भीत: पुरगोपुरान्तरे।।

राजा पुनर्व्यर्थमवेत्य कार्मणं
मल्लारमाकर्ण्य पुरोपकण्ठगम्।
निपीय शिश्ये विषमुग्रमीश्वर:
प्रख्यापयन्नीश्वरतामिवात्मनि।।

निपीय हालाहलमित्थमुच्चकै:
समासजन्माधववर्मणि श्रियम्।
दुर्गाधिपत्वेन विशिष्य विश्रुत:
स ईश्वर: प्राणितुमप्यनीश्वर:।।

सप्तैव वर्षाणि विमर्शकोविदो
द्विषष्टिमह्नामवनीमवन्सुखम्।
अब्देऽद्रिखाष्टेन्दुमितेऽथ कृष्णगाम्
स द्वादशीं प्राप्य विषेण संस्थित:।।

हरादिगोविन्दमुखा: कुमन्त्रिण:
समेत्य दृष्ट्वा नृपमस्तजीवनम्।
विधाय गुप्तिं नगरस्य सङ्गता:
कथं दहेमैनमिति व्यचिन्तयन्।।

मल्लाररावेण निरुद्धनिर्गमा:
पुन: प्रजाक्षोभविशुष्यदानना:।
दाहक्रियां तालकटोररोधसि
प्रभोरकुर्वन्नुपराजमन्दिरम्।।१२.२४८-२५६।।

चतुर्दशसर्गे माधवसिंहस्य (प्रथमस्य) शासनं वर्णितम्। पञ्चदशसर्गे प्रतापसिंहस्य षोडशे सर्गे जगत्सिंहस्य सप्तदशे च रामसिंहस्य (द्वितीयस्य) वर्णनं प्राधान्येन विद्यते। सप्तदशसर्गस्य एकसप्ततितमं श्लोकं यावदिदं

महाकाव्यमुपलभ्यते। कानिचिदन्यान्यप्यपूर्णान्यवाच्यानि पद्यानि मातृकायामस्माभिर्दृष्टानि तानीह परिशिष्टरूपेण संयोजितानि सन्ति। कच्छवंशे प्रतिसर्गमन्ते–

**'श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**

**काव्येऽत्र कच्छवंशे ....................................'।।**

इति पद्यं पठितम्। श्लोकेऽस्मिन् चतुर्थचरणे सर्गसङ्ख्याया उल्लेखोऽकारि कविना। तदिदं पद्यं षोडशसर्गं यावदेव लभ्यते। सप्तदशे नास्योल्लेख इत्यनेन सिद्ध्यति महाकाव्यस्याऽस्याऽपूर्णता। इतः परं कविनेदं प्रणीतमभून्नवेति तु विवादस्य विषयः। केचन विद्वांसोऽत्र सर्गाणां विंशतिं निर्दिशन्ति किन्तु तदिदं तथ्यं सत्यं न प्रतिभाति। महाकवेः श्रीकृष्णरामभट्टस्य प्रपौत्रः श्रीमान् देवेन्द्रभट्टोऽप्यत्र सर्गाणां संख्यानिर्धारणे न प्राभवत्।

कच्छवंशेऽत्र वीरोऽङ्गीरसः। यथाप्रसङ्गमन्येषां रसानामपि वर्णनं लभ्यते। प्राधान्येनाऽत्राऽनुष्टुप्प्रयोगः किन्तु वीररौद्रादिवर्णनप्रसङ्गे शार्दूलविक्रीडित-स्रग्धराप्रभृतिच्छन्दांसि सन्ति प्रयुक्तानि। शब्दार्थाऽलङ्काराणां प्रयोगः सहृदयहृदयहारी विद्यते। ईश्वरीसिंहयुद्धवर्णनेऽत्र कविकलानिधिश्रीकृष्ण-भट्टप्रणीतस्य ईश्वरविलासमहाकाव्यस्य प्रभावः परिलक्ष्यते। ऐतिहासिकघटनानां तिथिनिर्देशो महाकवेरस्य प्रामाणिकतां पोषयति। अत्र न केवलं राज्ञामपितु राजमहिषीनामपि वंशो निरदेशि। जातमृतराजापत्य-परिज्ञानायाऽपि महाकाव्यमिदं विविदिषूणां सोपानम्। एवमैतिह्यदृष्ट्या साहित्यदृष्ट्या चोभयथाऽपि महाकाव्यस्याऽस्य महत्त्वं वरीवर्ति। अस्य महाकाव्यस्य साहित्यिकं वैशिष्ट्यं बृहत्त्रयीमनुसरति। तत्सर्वं महाकाव्यस्यास्य हिन्दीसंस्करणे शीघ्रमेव द्रष्टुं पारयिष्यन्ति मनीषिणः।

**कच्छवंशमहाकाव्यस्य मातृकाः**

कच्छवंशमहाकाव्यस्याऽस्य कापि मातृका न कस्मिन्नपि पुस्तकालये समुपलभ्यते। अस्य एकाधिका मातृकाः स्युरिति मम प्रतिभाति। काव्यस्यास्य या पद्यसंख्या डॉ. प्रभाकरशास्त्रिमहोदयैः स्वीये लेखे निरदेशि[५]

---

५. राजस्थान के प्रमुख संस्कृत महाकाव्य, पृ. २९०।

तस्यामस्मन्मातृकापेक्षया भेदो दृश्यते। भट्टमथुरानाथशास्त्रिमहोदयैः ईश्वरविलासमहाकाव्यस्य भूमिकायां कच्छवंशमहाकाव्यस्य कश्चन अंशः प्राकाशि। तत्राऽपि केचन भेदा लक्ष्यन्त एव। पं. गङ्गाधरभट्टः स्वीये निबन्धे[६] सप्तदशशतकस्य यत्पद्यं ६३ तमं निर्दिष्टं तदस्मन्मातृकायां ७१ तमं विद्यते। आचार्यप्रभाकरशास्त्रिणा कच्छवंशस्य प्रतिसर्गं निर्दिष्टा श्लोकसंख्या इत्थं विद्यते–

प्रथमसर्गे– ४०, द्वितीयसर्गे– ४०, तृतीयसर्गे– ९३, चतुर्थसर्गे– ९३, पञ्चमसर्गे– ८३, षष्ठसर्गे– ७७, सप्तमसर्गे– १३९, अष्टमसर्गे– २२७, नवमसर्गे– २३९, दशमसर्गे– ९११, एकादशसर्गे– १२६, द्वादशत्रयोदशसंयुक्तसर्गयोः– २६८, चतुर्दशसर्गे– १०१, पञ्चदशसर्गे– १००, षोडशसर्गे– १०८, सप्तदशसर्गे– ७१। आहत्येयं संख्या २७१६ भवति। अस्माकं मातृकायां कश्चन संख्याभेदोऽपि विद्यते–

तत्र प्रथमसर्गे– ४०, द्वितीयसर्गे– ४०, तृतीयसर्गे– ९३, चतुर्थसर्गे– ९३, पञ्चमसर्गे– ८४, षष्ठसर्गे– ७७, सप्तमसर्गे– १३५, अष्टमसर्गे– २२८, नवमसर्गे– २३८, दशमसर्गे– ९५३, एकादशसर्गे– १२५, द्वादशत्रयोदशसंयुक्तसर्गयोः– २७१, चतुर्दशसर्गे– १०५, पञ्चदशसर्गे– १०१, षोडशसर्गे– ११३, सप्तदशसर्गे– ७१, परिशिष्टे च ३१ श्लोकाः सन्ति। आहत्येयं सं. २७९८ अस्ति।

मातृकेयं महाकवेः वैद्यश्रीकृष्णरामभट्टस्य प्रपौत्रेण वैद्यदेवेन्द्र-भट्टेनाऽस्मभ्यं प्रादायि। इयं साक्षात्कविना लिखिता मातृकेति देवेन्द्रभट्ट-महोदयोऽवदत्। मातृकेयं प्रायशः पठनयोग्या केनचिदेकेन च लिखिता प्रतिभाति। अत्र आहत्य ९६ पृष्ठानि सन्ति। प्रतिपृष्ठं ३४ पंक्तयः प्रतिपंक्ति च ३२ अक्षराणि सन्ति। अन्तिमे पृष्ठे सर्वमवाच्यमेव तथापि यत्किमपि पाठयोग्यं तत्र लब्धं तत्सर्वमत्र मुद्रापितम्। ग्रन्थस्य प्रारम्भे 'श्रीकच्छवंशाह्वयं महाकाव्यम्' इति ग्रन्थनाम लिखितम्। अन्तिमं पृष्ठं मलीमसत्वात् पठनयोग्यं नास्ति।

ग्रन्थस्याऽस्य प्रकाशनाय स्वीकृतिं प्रदाय राष्ट्रियसंस्कृतसंस्थानस्य कुलपतय आचार्यराधावल्लभत्रिपाठिमहोदयाः संस्कृतजगतो महान्तमुपकारं

---

६. द्रष्टव्य, वैद्यकुलगुरुकाव्यवैभव, पृ. ३१९।

कृतवन्तः। तेषामौदार्यादेव महाकाव्यमिदं प्रकाशितं भवतीति तेषां श्रीचरणेषु प्रणतिततयो वितीर्यन्ते। राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य तदानीन्तनप्राचार्याः प्रो. अर्कनाथचौधरीमहोदया अपि ग्रन्थस्याऽस्य सम्पादनक्रमे प्राशासनिकं प्रातिभं च सहयोगं प्रदाय बहुधोपकृतवन्तः। जयपुरपरिसरे शास्त्रचूडामणिविद्वांसः श्रीमन्तः सुरेन्द्रकुमारशर्माणः समवाप्तराष्ट्रपति-प्रभृतिनैकसम्माना देवर्षिकलानाथशास्त्रिणश्चापि क्रमेऽस्मिन्नस्मत्साहाय्यमकुर्वन्। एते सर्वेऽपि विद्वांसो प्रणामाञ्जलिभिः समर्च्यन्ते।

वैद्यश्रीकृष्णरामभट्टस्य वंशपरम्पराद्यन्वेषणक्रमे श्रीसर्वेशव्यासमहोदयो बहु साहाय्यमकरोत्। डा. रानीदाधीचमहोदया सम्पादनकर्मणि यां भूमिकां निर्व्यूढवती तस्या एव परिणामोऽयं विदुषां हस्ते कच्छवंशमहाकाव्यरूपेण विद्यते।

महाकवेः श्रीकृष्णरामभट्टस्य प्रपौत्राः श्रीमन्तो देवेन्द्रभट्टमहोदयाश्चि-राभीष्टस्याऽस्य ग्रन्थरत्नस्य प्रकाशनमदृष्ट्वैव सहसा दिवमारूढाः। कच्छवंशस्य प्रकाशनं तेषां जीवनस्य लक्ष्यमासीत्। ते गोलोकात् स्वप्रपितामहकृतिमिमां प्रकाशितां दृष्ट्वा शान्तिमधिगमिष्यन्तीति विश्वसिति।

**रमाकान्तपाण्डेयः**

## विविधग्रन्थेषु भट्टवंशवर्णनपरम्परा

ब्राह्मणत्वेन विख्याता जातिरस्माकमेधते।
इच्छातः परमेशेन सर्गादौ प्रकटीकृता।।

तस्मादनादिसिद्धा नो जातिः सर्वोत्तमा परा।
अवान्तरतया जातेर्विवेकः क्रियतेऽधुना।।

उत्तरस्य तु निष्कर्षो ब्राह्मणा जातितो वयम्।
अस्माकं प्रागभिन्नत्वात्सर्वेषां सहभोजिता।।

तत्तद्देशनिवासित्वात्तत्तदाचारभेदतः।
सन्दिग्धमनसां पश्चादभूदेतादृशी भिदा।।

पुरा मेवाड़भूमीन्द्रः स्वदेशोन्नतिकाम्यया।
सत्कृत्य स्थापयामास ब्राहणान्भिन्नगोत्रिणः।।

ततः प्रभृति विश्वस्य जन्मस्थितिहृतामहो।
एकलिङ्गं परं लिङ्गं स्तुवन्तस्तत्र तेऽवसन्।।

एकलिङ्गास्पदं भट्टमेवाड़ाग्रसरो द्विजः।
आक्रम्य भासते भाभिर्गत्वा किं नैव पश्यत।।

अपरञ्च वयं नागदमत्वान्माषचित्रितम्।
नागमाक्रम्य पादेन विवाहं विदधामहै।।

इष्टप्रसादान्मेवाडो नागदो द्विजसत्तमः।
न नागदष्टो दृष्टो वा न श्रुतोऽद्यापि कुत्रचित्।।

आप्तैः परम्पराविद्भिरस्मज्जातिमहत्तमैः।
इतिहासोऽयमुद्दिष्टो नह्यमूला जनश्रुतिः।।

आविरासीदेकलिङ्गो देवः कलियुगानने।
तदारभ्यस्थिता भट्टमेवाड़ा नागदा वयम्।।

दस्युप्रगाढे मेवाड़े युद्धोपप्लवविह्वला।
श्रीलिङ्गेन समाज्ञप्ता गुर्जरे स्थितिमादधुः।।

पूते साभ्रमतीतीरे रमदावादपत्तने।
शतशो निवसन्त्यस्मत्सम्प्रदायस्थिता द्विजाः।।

श्रीमद्विष्णुपदारविन्दविमनाः साहित्यवारान्निधि–
वाक्चातुर्य–विनिर्जिताऽमरगुरुः श्रीविष्णुरामः सुधीः।
वेदान्तेषु किलाऽद्वितीयनिपुणः शास्त्रेषु चायुर्विदा–
मश्विभ्यां सदृशः समस्तकवितासर्गेषु चायं विधिः।।

श्रीमत्पण्डितवृन्दमस्तकमणिः शास्त्रेषु विज्ञानवान्।
श्रौतस्मार्तविचार–पारगमतिः काव्येषु काव्योपमः।।

पाण्डित्याऽमृतसिन्धु–मन्दरगिरिः संख्यावतामग्रणीः।
श्रीमद्गोकुलचन्द्रसेवनप्रियःश्रीविष्णुरामः कृती।।

सद्यज्ञ–सन्तर्पित–सर्वदेवः सद्भाज्यसन्तोषितभूमिदेवः।
वाग्यज्ञ–सन्तोषितकालिदासो वैद्यश्चिरं राजति विष्णुरामः।।

वाग्देवी यस्य भूमीतलगुरुसदृशो भृत्यसाम्राज्यशोभाम्।
सम्यक् सम्प्राप्य बाला सुरवरसमितौ साधु सौभाग्यमाप।

सोऽयं भूमीश मौलीस्खलित–नवमहामूल्यमाणिक्यजाभि–
र्भाभिर्नीराजिताङ्घ्रिर्जगति विजयते पण्डितो विष्णुरामः।।

शास्त्रवर्त्म–सुविचक्षणचञ्चच्चातुरी–समवधीरितधीरः।
रामभार्गव इवाप्राज्यो यो ज्ञायतां मम पितामह एषः।।

रुचिरस्वपदारविन्दयुग्मभ्रमरी–भाव–विभूषिताङ्गे।
करुणां मयि लल्लुरामसूरिः कुरुतां सुन्दरवैद्यचक्रवर्ती।।

शिष्यमण्डलसमावृतमूर्तिर्वैद्यराज इव तावदितहासौ।
श्रीविष्णुरामभिषगेष विशेषप्रज्ञप्तये भवतु तातपिताऽतिश्रेष्ठः।।

(वैद्यतरङ्गिण्याः)

तस्य सूनरभवत्सकलज्ञो विष्णुभक्त इति जीवनरामः।
यो वितत्य विमलां निजकीर्तिं राजति प्रबलपण्डितराजः।।

विविधतरनवार्थान्ग्रन्थसार्थान्पठित्वा
सदसि च खलु धीरान् यः तिरःसञ्चकारः।
जयति विदितनामा क्ष्मातलोद्दीप्ततेजः-
प्ररुचिभिरभिरामः पण्डितो जीवानाख्यः।।

तत्पुत्रोऽहमतिस्तब्धो गोकुलेन्दुपदाश्रयः।
सुन्दरि! कर्तुमिच्छंश्च वैद्यानन्दतरङ्गिणीम्।।

श्रेष्ठः श्रीकृष्णरामः सदनुमतगतिः सर्वविच्छास्त्रदर्शी।
धर्मज्ञानोपदेष्टा हितमतिरखिलप्राणिनां प्राणरूपः।।

श्रेयस्कामो नृपाद्वै प्रथुतरयशसा रामसिंहात्किलाऽहम्।
भूयः सम्मानितो वै हरिपद-शरणः कीर्तिमान्पण्डितैश्च।।

(कच्छवंशमहाकाव्यात्)

**तथा च जयपुरविलासे-**

गुरुप्रसादाऽधिगमार्थबोधौ वैद्यागमाऽकुण्ठितधीप्रसारौ।
श्रीकृष्णरामो हरिवल्लभश्च द्वावात्मजौ तस्य कवी विभातः।। इति।।

येनाऽशिक्षि स जीवनाथगुरुतः काव्यप्रकाशाशयः।
छन्दश्चन्दनदासतः स गणितं वैद्यागमस्ताततः।।

सूते गन्धकजारणावधिकृता येन क्रियानैकशः।
सोऽहं नैकनवीनकाव्यकृदिह श्रीकृष्णशर्मा कविः।।

यद्यपि दुर्जनतोषा येषां न स्यान्ममाकृताक्वा क्वापि।
स ह्यर्पिन्मतिशुद्धिं सज्जनपादार्पिता करिष्यतीहि।।

अस्थिरतया प्रकृत्या बालवद् व्यासक्ततया च वक्रगतया।
ज्ञातिविरोधेन उपलसदृशः समानसंशुणः पिशुनः।।

कवयो बहवो विभावयन्ति प्रतिमघ्नन्तु विशालशास्त्रसिन्धुम्।
विरला प्रभजन्ति सारमस्य त्रिदशा एव सुधा न दैत्याः।।

इदं मम बालचापल्यं क्षमध्वं भोश्च साधवः।
युस्मदग्रे यथा वीरस्तथावाचमहं ब्रुवे।।

इतिश्रीमद्बुधस्तुत्यकृष्णरामसुधीकृता।
विद्वद्वैद्यतरङ्गिण्यां तरङ्गश्चाद्यको गतः।।

दिगन्तरलुठत्कीर्तिः श्रीकृष्णः कविकुञ्जरः।
प्राणैस्तुल्यं सरस्वत्याः प्राणैषीद्रामवर्णनम्।।

**सिद्धभेषजमणिमालातः-**

आयुर्वेदवचः प्रपञ्चचतुरा विद्यावतामग्रणीः।
संख्यातीतगुणाश्रयो गदहतौ साक्षाद्धि धन्वन्तरिः।।

विश्वस्मिन्नुपकारबुद्धिरधिकं कल्पद्रुवत्प्रेष्ठदः।
श्रीमद्भट्टवरेन्द्रगुर्जरकुले श्रीलल्लुरामोऽभवत्।।

तस्मादिन्दुरिवाम्बुधेः समभवद्वेदार्थपारङ्गमः।
प्रौढः कर्मसु सर्वविद्वदगदङ्कारग्रणीः कुन्दनः।।

यो रामक्षितिपेन पाठनिलये सत्कृत्य संस्थापितः।
सर्वेषां गदगञ्जनाय हि कमन्मन्दारबन्धं व्यधात्।।

श्रीकृष्णस्तनयस्ततः समजनि श्रीपाठशालासन-
स्थायी नैक विचित्रकाव्यरचनाप्राप्तप्रतिष्ठाभरः।
सोऽहं सम्प्रतिसिद्धभेषजमणीनाहृत्यमालामिमाम्
गुम्फामि स्फुरदच्छगुच्छरुचिरां विद्वद्भिषक्प्रीतये।।

**गङ्गाधरभट्टप्रणीतमणिमालायाम्–**

तत्र श्रीमन्महाराजाधिराजश्रीप्रतापसिंहदेवराज्यसमयेऽधीतायुर्वेदो गुर्जरभूनिर्जरान्तर्गतभट्टमेवाड़जातीयः स्वयशः प्रख्यापनकृतमतिर्लक्ष्मीरामनामा सुमतिरहम्मदाबादनामकप्रसिद्धपुटभेदनादाजगाम। एत्य च रोगिनैरोग्यसम्पादित-प्रसिद्धिर्भूपतेरपि संमानमवाप। अथ लल्लुरामनामा तदात्मजः पितृसमान एवाल्पेनैव कालेन महाराजाधिराजप्राप्तराजवैद्यप्रतिष्ठः श्रीयशसामेकं निधानमभवत्। अथ तस्य पौत्रः श्रीवैद्यकुन्दनरामपुत्रः श्रीकृष्णरामनामा च मे पितासीत्। यः खलु–

श्रीमन्माधवसिंहभूपसमितौ लब्धप्रतिष्ठास्पदः
साहित्याम्बुधिकुम्भसम्भवमुनिर्धन्वन्तरिर्वैद्यके।
कीर्तिर्यस्य दिगन्तगा च कवने यः कालिदासोपमः
सोऽयं राजभिषग्वरो विजयते श्रीकृष्णशर्मा गुरुः।।

हारीतपाराशरसुश्रुतादिकृतश्रमः पारदतन्त्रवेत्ता।
शास्त्रेषु काव्येषु परं प्रवीणो दक्षो दयावान्कुशलः क्रियासु।।

**कच्छवंशे लल्लुरामस्य वर्णनम्–**

चतस्रोऽस्य महादेव्यो देवड़ी चावडीत्यपि।
सीसोदनी तथा चन्द्रावती चारुनिभानना।।

चावडी चारुचरिता रुचिरां सुषुवे सुताम्।
वेद्यैश्चिकित्स्यमाणापि हन्त बालैव सा मृता।।

अथो चन्द्रावती नाम राज्ञी जयमनुव्रता।
गर्भं दधार महिता महीमिव मयं यथा।।

गर्भं तन्त्राणि निस्तन्द्रं यस्या वैद्यबृहस्पतिः।
लल्लूरामः प्रविदधे यो ममासीत्पितामहः।।

चन्द्रावती नववसुनवचन्द्राब्दवर्तिनः।
पुत्रं भाद्रस्य धवलं चतुर्दश्यामजीजनत्।।

अमन्दमोदमधुरं सम्यगारब्धमङ्गलम्।
जीवजातं पुरे जातं जाते श्री जयनन्दने।।

मिथ्याऽऽहारविहारेण भाविनो बलवत्तया।
रामोऽजनिरुजाक्षामो बाबा जाने चिकित्सति।।

प्रत्याख्याय गते तस्मिन्राज्ञो रोगप्रतिक्रियाम्।
चन्द्रावती गिराञ्चक्रे लल्लूजिन्मे पितामहः।।

इतासु रसपाथोधिनाडीषु मिहिरोदयात्।
चतुस्त्रिष्यत्यलब्धस्य कर्कलग्ने भृगोभवः।।

धने शुक्रः सहजगः सूरसौरिज्ञभूसुतः।
शत्रौ केतुर्विधुर्भाग्ये राज्ये राहुर्व्यये तमः।।

***

# विषयानुक्रमः

| | | |
|---|---|---|
| १. | पुरोवाक् | v |
| २. | भूमिका | xi |
| ३. | विविधग्रन्थेषु भट्टवंशवर्णनपरम्परा | xxiv |

| | |
|---|---|
| **प्रथमः सर्गः** | **१** |
| **द्वितीयः सर्गः** | **६** |
| **तृतीयः सर्गः** | **११** |
| **चतुर्थः सर्गः** | **२२** |
| **पञ्चमः सर्गः** | **३४** |
| **षष्ठः सर्गः** | **४४** |
| **सप्तमः सर्गः** | **५३** |
| **अष्टमः सर्गः** | **६९** |
| **नवमः सर्गः** | **९६** |
| **दशमः सर्गः** | **१२५** |
| **एकादशः सर्गः** | **२३२** |
| **द्वादश-त्रयोदशसर्गौ** | **२५२** |
| **चतुर्दशः सर्गः** | **२८५** |
| **पञ्चदशः सर्गः** | **२९९** |
| **षोडशः सर्गः** | **३११** |
| **सप्तदशः सर्गः** | **३२५** |
| **परिशिष्टम्** | **३३४** |
| **श्लोकानुक्रमणिका** | **३३८** |

लोकप्रियसाहित्यग्रन्थमाला - ४१

वैद्यश्रीकृष्णरामभट्टप्रणीतम्

# कच्छवंशमहाकाव्यम्

सम्पादकौ
डॉ. रमाकान्तपाण्डेयः
डॉ. रानीदाधीच

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

कच्छवंशमहाकाव्यम्
डॉ. रमाकान्तपाण्डेयः
डॉ. रानीदाधीच

**वैद्यश्रीकृष्णरामभट्टप्रणीतम्**

# कच्छवंशम्

## प्रथमः सर्गः

।। १ ।।

श्रीमन्नारायणस्यासीत्पद्मतो नाभिसद्मतः।
ब्रह्मदेवः श्रुतिव्याख्याचतुरश्चतुराननः।।

।। २।।

मरीचिस्तस्य समभूत्पुत्रः प्रौढमरीचिमान्।
ततोऽजनि ज्वलत्तेजाः कश्यपः काश्यपीश्रुतः।।

।। ३।।

तस्मादजायत श्रीमान्विवस्वान्नाम धामवान्।
मनुस्तदनु विध्वस्तदनुजो मनुपारगः।।

।। ४।।

इक्ष्वाकुस्तनयस्तस्य विकुक्षिस्तु ततोऽभवत्।
परञ्जयः सुतस्तस्मात्परं परपुरञ्जयः।।

।। ५।।

अनेनास्तत्सुतोऽनेनाः पृथुः पृथुमहास्ततः।
विश्वरन्धिस्ततश्चन्द्रश्चन्द्रोज्ज्वलयशाः श्रुतः।।

।। ६।।

तज्जनिर्युवनाश्वोभूज्जवनाश्च परिग्रहः।
ततः शावस्ततो दावप्रतापो वृहदश्वकः।।

।। ७।।

ततः कुवलयाश्वोऽभूद्भूपः कुवलयाननः।
दृढाश्वोऽश्वदृढस्तस्माद्हर्यश्वोऽपि दृढाश्वतः।।

।। ८।।

हर्यश्वतो निकुम्भाह्वो बर्हणाश्वो निकुम्भतः।
कृशाश्वो बर्हणाश्वाख्यात्कृशाश्वात्सेनजिन्नृपः।।

।। ९।।

सुतः सेनजितो जज्ञे युवनाश्व इति श्रुतः।
दैवात्तत्कुक्षिजश्चित्तं मान्धाता चक्रवर्त्यभूत्।।

।। १०।।

मान्धातृनन्दनं प्राहुः पुरुकुत्सपुरुश्रुताः।
त्रस्यद्दस्युस्ततो धीमाननरण्यनृपो रणी।।

।। ११।।

तत्सुतोऽजनि हर्यश्वोऽरुणस्तस्याऽरुणप्रभः।
निबन्धनस्ततः सत्यव्रतः सत्यपरायणः।।

।। १२।।

हरिश्चन्द्रोऽथ तस्याऽनु रोहितो हरितस्ततः।
तस्माच्चम्पस्ततो दत्तद्विषत्कम्पः सुदेवराट्।।

।। १३।।

विजयस्तत्सुतस्तस्माद्धरुकोऽतः परं वृकः।
तस्य बाहुकवर्माऽतः सगरः सत्यसङ्गरः।।

।। १४।।

ततोऽसमञ्जसस्तस्मादंशुमान्प्रांशुविक्रमः।
जगद्दीपो दिलीपोऽपि तस्य भागीरथो रथी।।

।। १५।।

श्रुतोऽथ विश्रुतो नाभो भव्या भो भवदद्भुतः।
सिन्धुद्वीपस्ततस्तस्मादयुतायुर्महामहाः।।

।। १६।।

उदभूदृतुपर्णोस्मात्सर्वकामाभिधोऽजनि ।
अतः सुदासस्तत्पत्न्यां वसिष्ठादश्मकः स्मृतः।।

।। १७।।

द्विषामुन्मूलकस्तस्य मूलकोऽभवदात्मजः।
अथो दशरथो नाम तस्मादेडविडो दृढः।।

।। १८

तस्माद्विश्वसहो विश्वमहः खट्वाङ्गराट् स्फुटः।
प्राहुस्ततो दीर्घबाहुमलघुं च रघुं ततः।।

।। १९।।

रघोः पृथुश्रवाः सूनुर्नूनमस्मादजोऽजनि।
अजाद्दशरथस्तस्माद्रामः साक्षाद् हरिः स्वयम्।।

।। २०।।

गुणग्रामाय नीलाब्जदलश्यामाय धन्विने।
नमो रक्षोविरामाय रामाय परमात्मने।।

।। २ १।।

उदपादि गुणारामाद्रामादुङ्कुशः कुशः।
कुशादतिथिसत्कारी श्रीमानतिथिरुत्थितः।।

।। २२।।

आतिथेयो निषिद्धारिर्निषधोऽनु नभो नृपः।
पुण्डरीकोऽभवत्तज्जः पुण्डरीकोपमेरुणः।।

।। २३।।

क्षेमधन्वा ततो देवानीकोऽनीकपुरः सरः।
ततोऽनीहस्ततः पारियात्रो यात्रोद्यमः स्मृतः।।

।। २४।।

ततो वलस्थलो जातो हारस्फुरदुरःस्थलः।
वज्रनाभो महाभागो वलस्थलसुतः श्रुतः।।

।। २५।।

खगणः सततारब्धमहामखगणो गणी।
विधृतिर्धृतिधृद्धीरैर्गणितः खगणात्मजः।।

।। २६।।

ततो हिरण्यनाभोऽभूदनूनाभो हिरण्यतः।
पुष्यः पुष्यद्युतिर्ध्रुवः सन्धिर्ध्रुवन्मृतिः।।

।। २७।।

सुदर्शनस्तदुत्पन्नः स्मरादपि सुदर्शनः।
अग्निवर्णोऽतिरोचिष्णुः शीघ्रः शीघ्रगतिस्ततः।।

।। २८।।

अभूद्योगगुरुः शीघ्रान्मरुत्तरुनिभो मरुः।
श्रुतः प्रश्रुश्रुतस्तस्मात्सन्धिः कीर्तिसुगन्धितः।।

।। २९।।

तस्मादमर्षणो लेभे जनिं न्यायविमर्षणः।
उदपद्यत तत्पुत्रो महस्वान्महसां निधिः।।

।। ३०।।

विश्वसाह्वो विश्ववित्तः सुनूस्तस्य प्रसेनजित्।
वृहद्रणो रणश्लाघी तस्मादासीदुरुक्रियः।।

।। ३१।।

बभूव तक्षकः पृथ्वीरक्षकः स्फुरदक्षकः।
ततः प्रौढबलध्वस्तखलः किल वृहद्बलः।।

।। ३२।।

वत्सवृद्धः प्रतिव्योमो भानुः पश्चाद्दिवाककः।
वाहिनीपतिरेतस्मात्सहदेवो महीपतिः।।

।। ३३।।

वृहदश्वस्ततो राजा भानुमान्भानुमन्महाः।
प्रतीकाश्वः प्रतीतोऽतः सुप्रतीकः पतिः क्षितेः।।

।। ३४।।

मरुदेवोऽथ देवोऽस्मात्सुनक्षत्रोऽपि लक्षितः।
पुष्करः पुष्कराक्षश्रीरन्तरिक्षोऽन्तरीक्षकः।।

।। ३५।।

ततोऽपि सुतपा नाम ततोऽमित्रजिदाह्वयः।
बृहद्राजस्ततो बर्हिः कृतञ्जयनृपस्ततः।।

।। ३६।।

कृतञ्जयात्मजो जज्ञे रणञ्जयनृपो जयी।
सञ्जयोऽजनि तज्जन्मा शाक्यः शुद्धोद इत्यनु।।

।। ३७।।

लाङ्गलस्तदनु प्राज्ञः प्रादुरास प्रसेनजित्।
क्षुद्रकोऽक्षुद्रसम्पत्ती रणको रणकर्कशः।।

।। ३८।।

ततः सुरथभूपालो यशोगाथो महारथः।
सुमित्रो मित्रसम्पन्नो रेजे राज्ये चिरं रुचा।।

।। ३९।।

आरभ्य नारायणमासुमित्रं वंशो नृपाणां विनुतः समासात्।
सविस्तरां व्यासकृतिं विमृश्य न मे मतिर्व्यासकृतौ कृतिज्ञाः।।

।। ४०।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे सर्गोऽभूत्प्रथमसर्गस्य।।**

***

## द्वितीयः सर्गः

।। १ ।।

प्राप्ते पुत्रमनुत्पाद्य सुमित्रे चित्रशेषताम्।
प्रजाः प्रजागरा राज्यं कूर्मे तद्भ्रातरि न्यधुः ।।

।। २ ।।

प्राज्यं राज्यमथास्थाय कूर्मः कूर्मजखेटधृक्।
अतुच्छगुणगुच्छश्रीस्वच्छं कच्छमजीजनत्।।

।। ३ ।।

आसीदच्छच्छविः कच्छो वशी वंशप्रवर्तकः।
यतोऽनन्तरजा भूपाः कच्छशब्दं दधुर्धुरि।।

।। ४ ।।

कच्छात्मजो बुधच्छायो बुधसेनो बुधोत्तमः।
बुधसेनादभूद्धर्मसेनः सैन्यचमत्कृतिः।।

।। ५ ।।

अजसेनस्ततो लोकसेनो लक्ष्म्यादिसेनकः।
रजःसेनस्ततः कामसेनोरव्यादिसेनकः।।

।। ६ ।।

कीर्त्तिसेनो महासेनो धर्मसेनस्ततः परः।
श्रीमानमरसेनोऽभूदजसेनोऽपि तत्सुतः।।

।। ७ ।।

अभूदमरसेनोऽस्मादिन्द्रसेनोऽरिसैन्यहा।
विद्वानजमयो राजा विजयादिमयोऽप्यतः।।

।। ८ ।।

तस्य पुत्रः शिवमयो दानीदेवमयस्ततः।
आसीदृद्धिमयो रेवमयः सिद्धिमयो मतः।।

।। ९।।
ततस्त्रिशङ्कुप्रथमो मयः सिद्धिमयोदयः।
ततः श्याममयो मानी ततः खलु महीमयः।।
।। १०।।
ततो धर्ममयो धर्मकर्मा कर्ममयः पुनः।
रेजे राममयस्तस्य मयः सुरतिपूर्वकः।।
।। ११।।
श्रीलः शीलमयो राजा रराज विजयोर्जितः।
शूरः सूरमयः सूरतेजाः क्रूरपराक्रमः।।
।। १२।।
शङ्करादिमयः कृष्णमयोऽप्यनु यशोमयः।
गोतमोऽथ नलो ढोलो रायो लक्ष्मणपूर्वकः।।
।। १३।।
उदेति स्म ततो राजभानुर्भानुनिभप्रभः।
अयोध्यातः सयोधो यो गवालयपुरं गतः।।
।। १४।।
जायते स्म ततो वज्रधामो वज्रधरोद्धुरः।
तस्यात्मजो मधुब्रह्मस्तस्य मङ्गलरायकः।।
।। १५।।
प्रादुर्बभूव तत्पश्चाद्वीरो विक्रमरायराट्।
मूलदेवं ततो विघ्नो मूलं विद्विषदापदाम्।।
।। १६।।
अग्निपालस्ततः पृथ्वीपालः सुरतिपालकः।
श्रीपालोऽजनि सामन्तपालः कालः किल द्विषाम्।।
।। १७।।
सामन्तपालभूपालाद्भीमपालोद्भवः श्रुतः।
धरां दधौ स पञ्चाशद्वर्षाणि बत हर्षतः।।

।। १८।।

गङ्गपालो महत्पालो महेन्द्रादिमपालकः।
राजपालः पुनः पद्मपाल आनन्दपालकः।।

।। १९।।

वंशपालोऽनु विजयपालोऽतः कामपालकः।
दीर्घपालः पदे तस्थौ वर्षाणां पञ्चविंशतिम्।।

।। २०।।

विष्णुपालस्ततो धुन्धपालोऽस्मात्कृष्णपालकः।
स विशिष्य दधावष्टाचत्वारिंशत्समाः क्षमाम्।।

।। २१।।

ततो विहङ्गपालोऽभूद्दुग्धाब्धेरिव चन्द्रमाः।
रामाब्धिमितवर्षाणि प्रजा येन प्रशासिता।।

।। २२।।

विहङ्गपालतो जातो भौमपालो महाभुजः।
त्रिंशद्वर्षाणि यो राज्ये राजराजच्छविर्बभौ।।

।। २३।।

अजपालस्ततोऽप्यासीदश्वपालोऽपि तत्सुतः।
योऽष्टादशसहस्राणि ददावश्वानिति श्रुतम्।।

।। २४।।

श्यामपालस्ततोऽप्यङ्गपालः क्षत्रियपुङ्गवः।
गवालयमरक्षद्यस्त्रिंद्वर्षाण्यधर्षणः ।।

।। २५।।

पुष्पपालस्तथा हासपालः श्रीचन्द्रपालकः।
भुवं गोविन्दपालोऽपादष्टाविंशतिवत्सरान्।।

।। २६।।

श्रीमानुदयपालोऽस्मादुदियाय धराधवः।
जुगोप पृथिवीं पञ्चपञ्चाशद्वत्सरानसौ।।

।। २७।।
श्रीवेगपालको रङ्गपालकः पुष्पपालकः।
हरिपालो हरिस्फालस्तस्मादमरपालकः।।
।। २८।।
छत्रपालो मणिस्फूर्जन्मालः स वनपालकः।
धीरपालः सुगन्धादिपालकः पद्मपालकः।।
।। २९।।
रुद्रपालः पुनर्विष्णुपालो विनयपालकः।
अच्छपालः सुतस्तस्य भूपतिर्भरुपालकः।।
।। ३०।।
जज्ञे सहजपालो द्राग्देवपालस्ततः परम्।
त्रिलोचनादिपालोऽथ श्रीविरोचनपालकः।।
।। ३१।।
ततो रसिकपालः श्रीपालः सुरतपालकः।
ततः सुगणपालोऽतिपालोऽनुगजपालकः।।
।। ३२।।
योगीन्द्रपालको धर्मज्ञुपालाख्यो रत्नपालकः।
प्रादुरास हरिश्चन्द्रपालकः कृष्णपालकः।।
।। ३३।।
त्रिलोकप्रथमः पालो धनपालो महाधनः।
मुनिपालो मुनिप्रीतिर्नखपालस्ततः खलु।।
।। ३४।।
प्रतापपालको धर्मपालो भूपालकः किल।
देशपालोऽपि परमपालोऽतश्चन्द्रपालकः।।
।। ३५।।
गिरिपालः पुना राज्ये रेजे रेवतपालकः।
हेमपालः सुतस्तद्वत्कृती करणपालकः।।

।। ३६।।

बभूव स्वर्गपालोऽस्माद्विद्वानुरगपालकः।
शिवपालः शिवस्फूर्तिर्मणिपालो मणिद्युतिः।।

।। ३७।।

राजा परुषपालाह्वो गुणपालो गुणोन्नतिः।
किशोरपालकः पश्चादपि गम्भीरपालकः।।

।। ३८।।

तिग्मपालस्ततः सिंहविक्रमः सिंहपालकः।
गुणपालोऽजनि ज्ञानपालस्तालोपमोन्नतिः।।

।। ३९।।

तस्मादासीत्कान्हपालो निजासि–
ध्वस्तद्विष्टेस्तेजसामेकराशिः।
पाति स्म क्ष्मां तस्य पुत्रो विनेता
देवानीको युद्धहेवाकिचेता।।

।। ४०।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे द्वितीयसर्गस्य सर्गोऽभूत्।।**

***

## तृतीयः सर्गः

।। १।।

देवानीकस्य देवी द्रागसूत सुतमुत्तमम्।
असिसिंहं विदुर्विज्ञा नाम्ना धाम्नां तमास्पदम्।।

।। २।।

देवानीके गते देवानीकान्तःपातितां क्रमात्।
असिसिंहः पदेऽतिष्ठत्सिंहसंहननो युवा।।

।। ३।।

स राजा राजराजार्द्धी राजन्राज्ये जयोज्ज्वलः।
अनेकानेकपानीको दिशो गत्वा द्विषोऽवधीत्।।

।। ४।।

पण्डितानिति पप्रच्छ स कदाचित्सदाशयः।
केन दानेन राज्यं नः स्थिरं स्याद्द्रुतमाचिरम्।।

।। ५।।

इत्युक्तास्तेन ते प्राहुः पण्डिता मण्डिता धिया।
एवं तर्हि महाराज राज्यदानं प्रदीयताम्।।

।। ६।।

विज्ञप्तिं ज्ञप्तिमांस्तेषां श्रुत्वा रोमाञ्चमञ्चयन्।
दानवीरो मनाक्तोऽन्तर्दध्यौ हर्षवशंवदः।।

।। ७।।

विमृश्य प्रयतः किञ्चित्कारयित्वा समङ्गलम्।
सङ्कल्पं विदधे धीमान्दधत्कम्बुसमं गलम्।।

।। ८।।

स्वस्त्रेयाय ददौ राज्यं जयसिंहाय स प्रभुः।
कोषं तु तोषपोषेभ्यो ब्राह्मणेभ्यः समग्रशः।।

।। ९।।

गवालयपुरं सर्द्धि स सङ्कल्प्य महामनाः।
सावरोधो यशः शृण्वन्निदारावारिमागतः।।

।। १०।।

नवम्यां कार्तिके कृष्णे वर्षे रामाक्षिखेन्दुके।
सोढदेवं सुतं तत्र स निवेश्य दिवं गतः।।

।। ११।।

दशम्यामेव राजा सन्सोढदेवः पितुः क्रियाः।
क्रमाच्चक्रे स्वचक्रेण बोधितो विजहौ शुचम्।।

।। १२।।

प्रकाशयन्दिशो भासा नाशयञ्जनतातमः।
सोढदेवो यथा भानुर्दिदीपेऽथ दिने दिने।।

।। १३।।

जादिम्यां स स्मरोद्रेकी पुत्रं दुल्ल्हकरायकम्।
जनयामास पौलोम्यां जयन्तमिव जम्भजित्।।

।। १४।।

अध्याप्य युद्धविद्यां स दुल्ल्हकं कुलवृद्धये।
सुतामुद्वाहयामास चाहमानशिलारसेः।।

।। १५।।

प्रभावं सोढदेवस्य तोमरः सोढुमक्षमः।
बभूवोद्विग्नधीः पैतृस्वस्त्रेयो जयसिंहकः।।

।। १६।।

मातुलेयो बली राज्यमाददीत यदा पुनः।
तदा किं स्यादिति व्यग्रो जजागार निशासु सः।।

।। १७।।

स एकदा समासाद्य सोढदेवं कृतानति:।
विज्ञापयामास विभो गृह्यतां पू: पुनर्निजा।।

।। १८।।

सङ्कल्पितं न मे ग्राह्यमिति चेन्मन्यसे वरम्।
परं निर्याह्यरं राज्यात्सपुत्रबलबान्धव:।।

।। १९।।

एवं विज्ञाप्य विरते जयसिंहे कृताञ्जलौ।
प्रत्युवाच शनै: सोढ: स्मितांशुस्नपिताधर:।।

।। २०।।

भ्रात: शङ्काऽनिशं का ते मैवं ब्रूहि ममाग्रत:।
दत्तं को नाम गृह्णीयात्कीर्तयन्कुलमात्मन:।।

।। २१।।

श्रुतं त्वया न किं लङ्काऽप्यलं काञ्चनगोपुरा।
दत्ता मत्पूर्वजै: पूर्वं कलङ्काऽस्पृष्टकीर्त्तिभि:।।

।। २२।।

कियदेतत्पुरं मृत्स्नागोपुरं विद्धि वित्तम।
यास्यामोऽन्यत्र तच्चिन्तां वृथा चेतसि मा कृथा:।।

।। २३।।

इत्याश्वास्य स तं धीर: कच्छानां परमेश्वर:।
राज्यान्तरार्जनोद्योगी वरेलीं सान्वयो ययौ।।

।। २४।।

कीर्त्तिकेलिं वरेलीं स प्राप्य प्रौढपराक्रम:।
लेखं लिलेख लेखश्रीर्दुल्ल्हकश्वशुरं प्रति।।

।। २५।।

स्वस्ति श्रीपञ्चवारेन्द्रे चाहमानशिलारसौ।
नति: कच्छोपनामस्य सोढदेवस्य दीव्यतु।।

।। २६।।
अस्त्येव विदितं लोके तातेन स्वं पुरं पुरा।
अदायि भागिनेयाय सतां दानस्य नावधिः।।

।। २७।।
बहुना किं प्रपञ्चेन स्थानं र्निणीय निर्दिश।
तवैष यत्र जामाता तिष्ठेत्खड्गसखः सुखम्।।

।। २८।।
इत्थं विलिख्य लेखं स ददौ दूताय सत्वरः।
दूतोऽपि चाहमानाय निन्ये तं तूर्णगत्वरः।।

।। २९।।
चाहमाननृपः श्रुत्वा पत्रं प्रत्यक्षरं मुदा।
सभक्तिप्रणयं राज्ञे दूतद्वारा व्यजिज्ञपत्।।

।। ३०।।
अस्ति द्यौसा पुरी यस्या द्यौः साऽमानि मयोपमा।
तामुरीकुरु कूर्मेन्द्र दीव्यद्दुर्गोद्धुरां हठात्।।

।। ३१।।
इदानीं सा पुरी द्यौसा वर्त्ततेऽर्द्धा वशे मम।
अर्द्धा त्वाभीरकस्येति द्वैराज्यं तत्र तिष्ठति।।

।। ३२।।
प्रच्छन्नं गच्छ कच्छेन्द्र दुल्लहकं प्रेषयस्व वा।
हतेष्वाभीरकेष्वाजौ राजधानी तवैव सा।।

।। ३३।।
सोढः सम्बन्धिनः श्रुत्वा सन्देशं देशकालवित्।
व्याजहार कुमाराय कार्यं निरवशेषतः।।

।। ३४।।
अश्वव्यापारिणो व्याजं प्रकल्प्य पितृशिक्षितः।
स्फारसारः कुमारः स द्राक्ससार प्रहारधीः।।

।। ३५।।

द्यौसासीम्नि समागच्छन्दुल्लहकः कुलदीपकः।
रुद्धो घट्टकुटीयोधै राजकीयकरार्थिभिः।।

।। ३६।।

तत्र येऽधिकृतास्तान्स चपेटाभिरतूतुदत्।
ते तच्चपेटिकापातोच्छूनगण्डाः प्रदुद्रुवुः।।

।। ३७।।

श्रुत्वा तत्क्रन्दितं वीरा आभीरास्ते सहस्रशः।
युद्धाय समपद्यन्त क्रुद्धाः शुद्धासिपाणयः।।

।। ३८।।

जघटे कटु संघट्टस्तस्य तैश्चित्रयोधिनः।
देवेन्द्रस्य यथा दैत्यैर्मांसशोणितकर्दमः।।

।। ३९।।

दुल्लहः क्षणात् क्षयं निन्ये सङ्कुलं तद्द्विषां कुलम्।
आहवं चाहमानेन्द्रः सम्बन्धित्वान्न चाऽऽययौ।।

।। ४०।।

रक्तोऽपि द्विषतामस्त्रैः पीतः पौरैर्दृशाऽथ सः।
अभीराभीरवीरांस्तान्हत्वा द्यौसां करेऽकरोत्।।

।। ४१।।

एतस्मिन्नन्तरे वल्गान्देवतीनगरीपतिः।
द्यौसेशस्य परं मित्रं युद्धाय समसज्जत।।

।। ४२।।

तेन साकं पुनः कुर्वन्कलहं दुल्लहको बली।
जयसम्पत्तिमापेदे बले हि घटतेऽखिलम्।।

।। ४३।।

द्यौसादेशं समाक्रम्य कोषातिशयतोषदम्।
न्यधात्तुङ्गं प्रतापं स्वं पञ्चरङ्गध्वजं च सः।।

।। ४४।।
आगम्यतां महाराज जयस्तेऽजनि नन्विति।
पत्रं स प्रेष्य सप्रेष्यं सोढदेवं समाह्वयत्।।
।। ४५।।
जयं बुध्वा कुमारस्य चाहमानार्चित: पथि।
सोढदेवो धरादेवोदिताशी: शीघ्रमाययौ।।
।। ४६।।
द्यौसां समेत्य दुल्ल्हं स राज्यपीठेऽभ्यसेचयत्।
पुत्रे धुरन्धरे जाते धुरमुद्धरतीह क:।।
।। ४७।।
पित्रा दत्तं वशे कृत्वा द्यौसाराज्यासनं वशी।
दुल्ल्हरायो बलोच्छ्रायश्चित्ते प्रायो व्यचिन्तयत्।।
।। ४८।।
समागच्छन्ति सामन्ता मम हन्त समन्तत:।
वर्द्धयिष्ये ततो राज्यं महतां महती स्पृहा।।
।। ४९।।
स्वतन्त्रश्री: स मन्त्रज्ञ: समं सम्मन्त्र्य मन्त्रिभि:।
भाण्डारेजादिनगरीरुरीचक्रेऽरिचक्रहा ।।
।। ५०।।
दुल्ल्हो योद्धुं ययौ माचीं साचीकृतधनुर्नन्नु।
यत्र राज्ये विराजन्ते मीणास्तस्करवृत्तय:।।
।। ५१।।
युद्धोद्योगं समाकर्ण्य मीणा: क्षीणाननत्विष:।
दुन्दुभिध्वानसङ्केता: सैन्यसन्नाहमादिशन्।।
।। ५२।।
वैराठकुण्डलादिभ्यो नि:सृत्य कृतहुङ्कृता:
प्राचीमागत्य माचीतो वप्रं क्षिप्रं समाश्रयन्।।

।। ५३।।

दुल्ल्हे युध्यति नि:शङ्कं मीणा: सम्भूय सायकै:।
क्षणाच्चक्षणिरे सैन्यं दुर्गगूढा: समूढश:।।

।। ५४।।

पेतुर्मीणा युधक्षीणा धुरीणा रणरीतिषु।
व्रणारीणासृजो ह्रीणा: कच्छा अच्छासु भूमिषु।।

।। ५५।।

जित्वा ते तस्करा जीवघस्मरा घट्टविस्फुरा:।
माचीं प्राप्य पपु: पानं मदमुद्रितलोचना:।।

।। ५६।।

इत: पुनर्निशीथे श्रीर्वृद्धमाया यदृच्छया।
आविर्बभूव कृच्छ्राब्धौ कच्छपीयति कच्छपे।।

।। ५७।।

उत्तिष्ठ वत्स किं शेषे कास्मि रे पश्य मामिति।
शृण्वन्देव्या: समुत्तस्थौ हल्लं दुल्लह: क्षतोऽप्यलम्।।

।। ५८।।

देव्या रूपं निरूप्याऽसौ तत्कटाक्षगतव्रण:।
प्रणम्य विस्मितो देवि कासि पप्रच्छ तामिति।।

।। ५९।।

जानीहि गोत्रदेवीं मां प्रीताऽस्मि तव वीर्यत:।
अरं ब्रूहि वरं साक्षादेवं देवी तमभ्यधात्।।

।। ६०।।

इत्युक्त: स तदा देवीं स्तुत्वा वव्रे परं वरम्।
सैन्यं जीवतु किं चाहं जन्ये हन्यामरीनिति।।

।। ६१।।

सर्वं सम्पत्स्यते तुभ्यं दत्ता सम्पत्स्यते रिपून्।
वरं दत्वाऽऽदिशद्देवी हे वीर कुरु मे मठम्।।

।। ६२।।
इत्यादिश्य नृपं चण्डी चमूममुज्जीव्य खं ययौ।
प्रमाणमत्र जनताश्रुतिरेव हि विश्रुता।।
।। ६३।।
अथ तत्करुणापाङ्गपातप्रत्यागतासवः।
गर्जन्तस्ते समुत्तस्थुर्भटा युद्धकलोद्भटाः।।
।। ६४।।
सैन्यं नयन्नदैन्यं स द्यौसामेत्य पितुः पुरः।
आदितः सर्ववृत्तान्तं वर्णयामास तत्त्वतः।।
।। ६५।।
प्रातस्तातं नृपो नत्वा हन्त सामन्तवेष्टितः।
गन्तुं प्रचक्रमे माचीमप्राचीनवया रयात्।।
।। ६६।।
पश्यन्नुच्चैः स्फुरत्कुन्तः शकुन्तशकुनानि सः।
चचाल चामरोद्धान्तवाताचान्तपरिश्रमः।।
।। ६७।।
ध्वनन्धरासुनासीरनासीरपटहः पटुः।
परितः पूरयामास द्विषत्कर्णपुटीं कटुः।।
।। ६८।।
प्राप्तं विज्ञाय तं मत्ता युद्धसत्तापराङ्मुखाः।
मम्रुः स्वाङ्गे च्छुरीं दत्वा तस्करा भास्करोदये।।
।। ६९।।
ये केचिदवशिष्टास्तान्हत्वा माचीं विवेश सः।
सानुकूले विधौ विज्ञां किमसाध्यं शरीरिणाम्।।
।। ७०।।
माचीं प्राचीनबर्हिः श्रीरित्थमाक्रम्य पार्थिवः।
चक्रे श्रीजम्बुवाहिन्या मन्दिरं चित्रचन्दिरम्।।

।। ७१ ।।

अखर्वपर्वतप्रान्ते दुर्गं धृत्वा स दुर्गमम्।
हर्म्याण्यभ्रंलिहाग्राणि कल्पयामास शिल्पिभिः।।

।। ७२ ।।

ततः प्रभृति सा माची प्राचीनां प्रोज्झ्य संस्थितिम्।
रामगढ्ढ इति ख्यातिं लेभे लोकेषु नामतः।।

।। ७३ ।।

पुनः सन्नाह्य सैन्यानि देवतीन्द्रं निहत्य हा।
लोहवर्मा गतः खोहं सोऽहङ्कारविवर्जितः।।

।। ७४ ।।

जघान घननिहुङ्कारश्चन्द्रं चन्द्राननो नृपः।
अहो भाग्यवतां भाग्यं न क्वापि प्रतिहन्यते।।

।। ७५ ।।

किं बहूक्त्या महाखेटो गेटोरमभिसाध्य सः।
झोटवाटं ततो गत्वा झोटं झटिति चक्षणे।।

।। ७६ ।।

एवमावर्ज्य स महीं निर्वाहानुगुणां गुणी।
खोहमेति स्म रंहोवान्हंहो सिंहो यथा गुहाम्।।

।। ७७ ।।

तत्र वस्तुमलं वस्तुमति पृथ्वीपुरन्दरः।
सदिन्दिराणि बहुशो मन्दिराणि व्यचीक्लृपत्।।

।। ७८ ।।

तत्राहूय वसन्सोढदेवं देवद्युतिर्नृपः।
अलकायामुपशिवं स्फुरन्स्कन्द इवाबभौ।।

।। ७९ ।।

एवं स सोढदेवेन्द्रो भुवं भुञ्जन्सवैभवाम्।
खार्णवाब्दांस्त्रिवर्षांशान्दिनान्येकादशस्थितः ।।

।। ८०।।

हुताशरसखेन्द्वब्दे माघमासे सिते दले।
सप्तम्यां स्वर्गतः सोढः खोहे मोहेन मुक्तधीः।।

।। ८१।।

माघमासे सिते पक्षे षष्ट्यां दुल्लहः पितुः पदे।
स्थित्वाग्निरसखेन्द्वब्दे जागरूकः प्रजास्वभूत्।।

।। ८२।।

अस्य पुत्रावभूतां द्वौ ज्येष्ठस्तत्र स काकिलः।
विकलोऽप्यपरो नाम वार्त्ता मिथ्याऽत्र का किल।।

।। ८३।।

अथ सोढे दिवं याते दुल्लहेन्द्रे दूरवर्त्तिनि।
दाक्षिणात्या नृपाः सैन्यैररुधुर्द्रागगवालयम्।।

।। ८४।।

जयसिंहो जयं लिक्षुस्तोमरः सोऽमरोपमः।
विलिख्य विससर्जाशु दलं दुल्ल्हकवर्मणे।।

।। ८५।।

पुरं पुरु परै रुद्धं योद्धुं शक्तिर्न चास्ति मे।
तदागच्छत गृह्णीत राज्यं नैजं पुनः प्रभो।।

।। ८६।।

सन्देशमागतं श्रुत्वा खोहे संस्थाप्य काकिलम्।
वाहिनीं महतीं कर्षन्नगाद् दुल्हो गवालयम्।।

।। ८७।।

स भित्वा शत्रुसैन्यानि वीरः खड्गसहायवान्।
आरुरोह बली दुर्गं जयसिंहकृतादरः।।

।। ८८।।

ववृधे तस्य संग्रामो दुर्गस्थस्य परैः सह।
यदाकलनमात्रेण पश्य रोमाञ्चिता वयम्।।

।। ८९।।

दुर्गाग्रभाजि तडिदायितरत्नभूषे
चापं वितत्य गुरु गर्जति दुल्हमेघे।
तत्तादृगास शरवर्षमतीव येन
स्व:स्त्रीजनस्य नवदेवसुभिक्षमासीत्।।

।। ९०।।

कोटिं परामहह रोहति सम्प्रहारे
धीर: प्रवर्त्तितविपक्षदृगुष्णनीर:।
उत्प्लुत्य दुर्गकटकात्कटकस्य मध्ये
सिंहो मृगानिव ममर्द स वैरिवीरान्।।

।। ९१।।

इत्थं निपात्य परवर्गमखर्वगर्व:
शस्त्रप्रहारशकलीकृतकायसर्ग:।
तत्रैव हन्त जयसिंहनृपोपकारी
लोकं निलिम्पकुललोकनमालुलोके।।

।। ९२।।

राजा काकिलको मृते पितरि तन्मोहं क्रमात्खर्वयन्
खोहं साधु शशास यस्य विभवं को हन्त वक्तुं क्षम:।
स्थानार्थी विकल: कलास्वविकल: पाञ्चालमध्ये गुणा-
रामो रामपुरेऽध्युवास सुकृतग्रामो वदामो वयम्।।

।। ९३।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे तृतीयसर्गस्य सर्गोऽभूत्।।**

***

## चतुर्थः सर्गः

।। १।।

रामाङ्कखविधावब्दे माघे पक्षे तमोमुषि।
सप्तम्यां तप्तहेमाभो भूपोऽभूत्किल काकिलः।।

।। २।।

मृते ताते रणख्याते सकले विकले गते।
इतस्ततः समुत्पेतुश्चोराश्छिद्रप्रचारिणः।।

।। ३।।

विचिन्त्य चोरचापल्यं चण्डः प्रत्यर्च्य चण्डिकाम्।
अनालम्बोऽपि राजाऽलं खड्गमालम्बत क्रुधा।।

।। ४।।

चोराणामघघोराणामुच्चाटनचिकीर्षया ।
अगच्छच्छस्त्रगुच्छेषु प्रयच्छन्कच्छपो दृशम्।।

।। ५।।

नासीरविस्फुरद्वीररिङ्गत्तुङ्गतुरङ्गमम् ।
वीर्यवक्रं चमूचक्रं कच्छशक्रं तमन्वगात्।।

।। ६।।

आघाटसीम्नि संघट्टे घटमाने कटुच्छटे।
प्रचण्डाः पट्टिशैर्जघ्नुश्चोराश्चोरसि धन्विनाम्।।

।। ७।।

क्षतजक्षतजोद्गाराः स्वर्दाराश्लेषलोलुपाः।
लुलुठुर्लुण्ठकैर्भग्ना भूपतेरुद्भटा भटाः।।

।। ८।।

खण्डयन्खलमुण्डानि मण्डयन्कुलमात्मनः।
मुमूर्च्छकच्छपः कृच्छाद्भिल्लभल्लाहतस्ततः।।

।। ९।।

काकिले व्याकुले सा हि वाहिनीं जम्बुवाहिनी।
भूत्वा गौरायया चौरा निर्ययुर्जयगर्जनाः।।

।। १०।।

अक्षतस्तत्क्षणं स्थित्वा तत्स्तन्यपृषदुक्षि।
काकुव्याकुलवागस्तौत्काकिलस्तां कथञ्चन।।

।। ११।।

सा प्रत्यक्षमुवाचैनं जयस्ते भविता ध्रुवम्।
परं त्वम्बावतीमत्र पुरीं कारय सारतः।।

।। १२।।

अत्रास्ति त्र्यम्बकः पृथ्व्यामम्बिकेश्वरशब्दितः।
तमुद्धर विधानेन मठं कमठ कल्पय।।

।। १३।।

इत्युक्तः स तया जम्बुवाहिन्या वाहिनीपतिः।
समानीय करौ भक्तिप्रह्वो देवीमभाषत।।

।। १४।।

एकाकी किमहं कुर्वे गुर्वेतत्कार्यमीश्वरि।
अनन्ता मेऽद्य सामन्ता अनन्तामेत्य शेरते।।

।। १५।।

इति विज्ञापिता देवी विज्ञाननिधिनाऽमुना।
चेतिष्यति चमूरुच्चैरित्थमाभाष्य साऽसरत्।।

।। १६।।

देव्यामन्तर्हितायां सा चमूश्चित्तचमत्कृता।
सिंहनादान्विमुञ्चन्ती चिचेतेति मया श्रुतम्।।

।। १७।।

युद्धहल्लीसकाचार्यो भिल्लपल्लीमतल्लिकाः।
शैलस्नुषु ललौ भल्लमल्लो दौल्हिर्ललन्नलम्।।

।। १८।।

काकिलस्य किलात्कारमाकर्ण्य किल कर्कशम्।
ते स्वतन्त्राः सुरापानतन्द्रार्त्तास्तत्र तत्र सुः।।

।। १९।।

स्वच्छन्दं तान्समुच्छिद्य स्वच्छश्रीः कच्छपुङ्गवः।
स्मरन्नम्बावचश्चक्रे परामम्बावतीं पुरीम्।।

।। २०।।

भूमिमुत्कीर्य निष्काश्य त्र्यम्बकं सोऽम्बिकेश्वरम्।
निर्ममे निर्मितिप्राज्ञो मन्दिरं स्फुरदिन्दिरम्।।

।। २१।।

यक्षेन्द्रायितकच्छेन्द्रा मानसायितमावठा।
पुष्पकायितयानश्रीरम्बावत्यलकायते ।।

।। २२।।

पर्वताङ्कसमुल्लासां त्र्यम्बकाधिष्ठितान्तराम्।
अन्तिकस्थमहासेनां दुर्गामम्बावतीं स्तुमः।।

।। २३।।

जादमाञ्जर्जरीकृत्य स निर्जरनिभः शरैः।
पुराणि मैण्ठवैराठकुण्डलादीन्यलुण्ठयत्।।

।। २४।।

अभूतां द्वे स्त्रियौ राज्ञो रूपलक्षणलक्षिते।
याभ्यां स्वशीलसम्पत्या पत्युरावर्जितं मनः।।

।। २५।।

तत्रैका चाहमानेन्द्रकन्या कुङ्कुमदा स्मृता।
या द्वितीयाऽद्वितीया सा रणस्तम्भनृपात्मजा।।

।। २६।।

स तयोर्जनयामास चतुरश्चतुरः सुतान्।
हनुं चालधरायं च रालणं किं च देलणम्।।

।। २७।।

चक्ररोचिष्णुभी राजा प्रजानामभयप्रदैः।
चतुर्भी रुरुचे पुत्रैरच्युतः स्वैर्भुजैरिव।।

।। २८।।

अदादलधरायाय मैण्ठवैराठकुण्डलम्।
यतो झामावताः कच्छा भामावित्ता बभूविरे।।

।। २९।।

काकिलेन सुतस्थित्यै तत्र वित्रस्तशत्रुणा।
दुर्गो व्यवन्धि सामोदं भामोदगिरिसानुषु।।

।। ३०।।

रालणाय ददौ वस्तु राढावासं नृवासवः।
रालणोता यतो जाता भुजातापितशात्रवाः।।

।। ३१।।

देलणायादिशद्देवो वैज्यनाथान्तिके भुवम्।
यतो देलणपोतास्ते पोता दुःखाम्बुधौ नृणाम्।।

।। ३२।।

एवं विभज्य भागज्ञः पुत्रेभ्यो ज्यां यथायथम्।
हनूतवर्मणे राजा ज्यायसे स्वं पदं ददौ।।

।। ३३।।

रसनन्दखकावब्दे वैशाखस्याऽसिते दले
दशम्यां दशमी राजा लोकान्तरमलोकत।।

।। ३४।।

वर्षाणि त्रीणि मासौ द्वौ दिनान्येकादशैव हि।
राजा राज्यासने रेजे चारुचर्याचणो रुचा।।

।। ३५।।
हणूतो राज्यमास्थाय परिणिन्ये प्रयत्नतः।
वीरो वीणमहादेवकन्यकां पणहारदाम्।।
।। ३६।।
उत्पाद्य जानडं राजा खेन्दुक्ष्माचन्द्रवत्सरे।
कार्तिकस्य त्रयोदश्यां शुक्ले पक्षे दिवं गतः।।
।। ३७।।
जानडोऽपि पितुः पीठं प्रपद्य पृथुपाटवः।
राष्ट्रोढकुलजां सम्यगुवाह बहुरङ्गदाम्।।
।। ३८।।
तस्यां कृत्वा सुतान्पञ्च जानडः प्राप पञ्चताम्।
चैत्रं शुक्लदले षष्ठ्यां सप्तद्व्येकैकवत्सरे।।
।। ३९।।
जानडस्य सुता नाम प्रद्युम्नः किं च पालणः।
जैतसी कान्हजीकोऽपि पञ्चमस्तु पचायणः।।
।। ४०।।
प्रद्युम्नस्तेषु राजाऽभूत्प्रद्युम्नसमविक्रमः।
चत्वारः पालणाद्यास्ते कान्यकुब्जैर्मृधे हताः।।
।। ४१।।
पृथ्वीराजपितृव्यस्य चाहमानकुलस्थितेः।
कान्हस्य कन्यकां राजा पर्यणैषीत्पदार्थदाम्।।
।। ४२।।
पुत्राः पञ्चेति तस्यासन्मलेशिर्बलभद्रकः।
विष्णुनाथस्तथा भीमो लाखणस्यापि पञ्चमः।।
।। ४३।।
सुदुःसहः स तैरासीत्सामन्तौघशिखामणिः।
चण्डदोर्दण्डखुरलीखण्डितारातिमण्डलः।।

।। ४४।।

यं सहायं समासाद्य चाहमानपुरन्दरः।
पृथ्वीराजो हरिप्रस्थे चक्रवर्ती स्म वर्तते।।

।। ४५।।

एतस्मिन्नन्तरे भोलेरावभीमः समाययौ।
अजमेरुपुरं लोभाल्लुण्ठितुं गुर्जरेश्वरः।।

।। ४६।।

स समापत्य सहसा प्रयुध्यंश्चाहमानकैः।
पृथ्वीराजस्य पितरं सोमेश्वरमपोथयत्।।

।। ४७।।

युद्धे सोमेश्वरं हत्वा पत्तनं विघटय्य हा।
साहसी कोशमाकृष्य गुर्जरो गुर्जरान्ययौ।।

।। ४८।।

निशम्य दूतमुखतो गुर्जरेन्द्रव्यतिक्रमम्।
पृथ्वीराजः प्रजज्वाल दिल्लीपीठप्रतिष्ठितः।।

।। ४९।।

द्रुतमानाय्य सामन्तान्परिश्राव्य वधं पितुः।
अत्र किं प्रतिपत्तव्यमित्युक्त्वा विरराम सः।।

।। ५०।।

उद्दण्डेनाद्य दिल्लीन्द्रगुर्जरेण विजृम्भितम्।
तं हन्मो वयमित्युच्चैः प्रद्युम्नः प्राह कोपनः।।

।। ५१।।

प्रद्युम्नस्य वचः श्रुत्वा दिल्लीन्द्रः प्राह सादरम्।
गच्छ कच्छ त्वमद्यैव तं पापं जहि सान्वयम्।।

।। ५२।।

इत्यर्थितस्तदा तेन वीरः प्रद्युम्नपार्थिवः।
प्रतस्थे तूर्णमश्वानां सहस्रैः पञ्चभिर्वृतः।।

।। ५३।।
ग्रामान्संग्रामसङ्कल्पः पश्यन्नस्यन्हयान्गतौ।
मार्गमुल्लङ्घ्य सोऽकस्माद्गुर्जरेन्द्रमतर्जयत्।।
।। ५४।।
यच्छन्नुपायनान्युच्चैः कूटकर्मणि कोविदः।
गुर्जरेन्द्रोऽथ कच्छेन्द्रपादयोर्निपपात ह।।
।। ५५।।
प्रणमन्तमिति प्रेक्ष्य शरणागतवत्सलः।
प्रद्युम्नः स तमाश्वास्य न्यवर्त्तत शनैः शनैः।।
।। ५६।।
परावृत्य भटैः साकं गव्यूतिद्वयमेत्य च।
तामवारोपयत्सेनामनेना जानडात्मजः।।
।। ५७।।
सोलङ्की गुर्जरो भोलेरावभीमः कृतच्छलः।
आपपात कलेर्मूर्त्तिः प्रद्युम्नस्य बले खलः।।
।। ५८।।
हत गृह्णीत वध्नीत श्रुत्वा शब्दमिति द्विषाम्।
चुक्षुभे प्रोच्छलत्कच्छः प्रद्युम्नस्य बलोदधिः।।
।। ५९।।
ब्रह्माण्डभाण्डविस्फोटविधिदक्षः समन्ततः।
वीराणां रणधीराणां सुश्रुवे तुमुलो ध्वनिः।।
।। ६०।।
प्रद्युम्नो द्युम्नदीप्तश्रीराः किमेतदिति ब्रुवन्।
जगर्ज गुर्जरं वीक्ष्य कुञ्जरं मृगराडिव।।
।। ६१।।
एवं सति रणारम्भे कच्छपः क्रोधमूर्च्छितः।
गुर्जरेशस्य खड्गेन मस्तकं निरकृन्तत।।

।। ६२।।

इत्थं प्रमथ्य तं पापं स्वायत्तीकृत्य तत्पदम्।
विवेश देशविजयी भल्ली दिल्लीं स जानडिः।।

।। ६३।।

जित्वाऽरीन्प्राप्तमावुत्तं पृथ्वीराजः समर्च्य तम्।
दिनानि कतिचिद्दिल्ल्यां सम्बन्धित्वान्न्यवासयत्।।

।। ६४।।

एवं दिनेषु गच्छत्सु मिथ्याहारविहारतः।
पृथ्वीराजस्य बलवानस्रव्याधिरजायत।।

।। ६५।।

स्रावयास्रमिति प्रेर्य गतेषु गदवेदिषु।
पृथ्वीराजोऽपि रुग्जीर्णस्तत्तथैवान्वपद्यत।।

।। ६६।।

रुग्णं पृथ्वीशमाकर्ण्य जयचन्द्रेण हृष्यता।
चेत दिल्लीं विलुण्ठेति गौरीसाहः प्रबोधितः।।

।। ६७।।

उद्वेलाब्धिनिभं कर्षन्सैन्यं लक्षद्वयोन्मितम्।
गौरीसाहो बली दिल्लीं वेष्टयामास नेष्टधीः।।

।। ६८।।

निशम्य चाहमानः स्वान्सामन्तानाह युद्ध्यताम्।
ते तु विभ्युर्भृशं योद्धुं प्राणाः केषां न वल्लभाः।।

।। ६९।।

पृथ्वीराजः प्रियाभ्राता भूपतिं तं पतिं स्वसुः।
युद्धाय प्रेरयामास सोऽपि वीरोऽन्वमोदत।।

।। ७०।।

तामुच्य कवचं कूर्मः खड्गचर्मकरो ययौ।
परं पञ्चसहस्राणि योधा यन्तं तमन्वयुः।।

।। ७१ ।।
मलेशिर्बलभद्रश्च द्वौ सुतौ शस्त्रशिक्षितौ।
नासीरे कच्छराजन्यसुनासीरस्य रेजतुः ।।
।। ७२ ।।
एवं विरलसैन्योऽपि परान्प्रतिपफाण सः।
सिद्धिः सत्त्वे वरीवर्त्ति महतां न परिच्छदे।
।। ७३ ।।
युगबाहुर्युवा वीरो बद्ध्वा परिकरं द्विषाम्।
बलं विलोडयामास मन्दराद्रिरिवार्णवम् ।।
।। ७४ ।।
खड्गप्रहारविच्छिन्ना रुधिरोद्गारिणो गजाः।
कम्पयन्तो महीं पेतुर्वज्रभिन्ना इवाद्रयः ।।
।। ७५ ।।
कच्छेन्द्रो म्लेच्छवीराणां प्रसह्याऽसह्यविक्रमः।
मुण्डानि खण्डयामास शतशोऽथ सहस्रशः ।।
।। ७६ ।।
भूमघोनि ससंरम्भं शस्त्रवृष्टीः समुज्झति।
चतुरस्त्रं द्विषामस्त्रप्रस्त्रविण्यः प्रसुस्त्रुवुः ।।
।। ७७ ।।
तेजसा प्रज्ज्वलन्नम्बावतीन्द्रो यावनं बलम्।
क्षणेन क्षपयामास तूलराशिमिवानलः ।।
।। ७८ ।।
तं निघ्नन्तमभिप्रेक्ष्य साध्वसी साध्वसिस्फुरम्।
पलायितुं मतिं चक्रे गौरीसाहो रणाङ्गणात् ।।
।। ७९ ।।
बद्ध्वा पलायमानं तं स्वप्रभामुद्रितेक्षणम्।
द्विषच्छस्त्रक्षतः क्ष्मेन्द्रो दिल्लीन्द्राय समर्पयत् ।।

।। ८० ।।

पृथ्वीराजः स राजानमभिनन्द्य मुहुर्मुहुः।
मोचयामास तं गौरीसाहं साहङ्कृतिर्हसन्।।

।। ८१ ।।

अथ शुकगिरा हृत्वा पद्मावतीं लघु गच्छतः
समरधरणौ द्विल्लीभर्तुः क्षताः पथि ये भटाः।
प्रसभमवपद्वीजं जन्यद्रुमस्य निवारितोऽ-
प्युदलसुहृदा हत्वा तान्हा नृपः परमालकः।।

।। ८२ ।।

निजभटवधं श्रुत्वा सोमेश्वरस्य स नन्दनः
कमठपतिना प्रास्थाज्जेतुं महोबपुरप्रभुम्।।
यदजनि जयोऽजन्ये मन्ये स केवलमुच्चकैः
कमठपतिदोर्दण्डद्वन्द्वप्रचण्डिमहेतुकः।।

।। ८३ ।।

सञ्ज्ञाप्येति निजं स्वसुर्यमुदयी कृत्वा महोबं वशे।
द्राग्जग्राह भुजाविघट्टितमहानागः स नागोरकम्।।

।। ८४ ।।

प्रद्युम्नोऽथ बलं समर्थ्य विकलं कृत्वाहवं साहसी
बद्ध्वा म्लेच्छपतिं प्रसह्य स हरिप्रस्थं प्रतस्थे जयी।
पृथ्वीराजनृपो निशम्य जयिनं स्वावुत्तमभ्यागतं
सत्कृत्य द्रविणैर्जहर्ष यवनं ह्रीणं ततोऽमोचयत्।।

।। ८५ ।।

इत्थं गच्छत्स्वहःसु प्रतिभटकटकव्यूहविक्षोददक्षः
पृथ्वीराजानुमत्या दुरधिगमविलं काबिलं मंक्षु जित्वा।
गच्छन्दिल्लीं स कच्छो यवननृपतिना घेवराघाटमध्ये
गौरीसाहेन रुद्धः पुनरधिसमरं तं गृहीत्वा मुमोच।।

।। ८६।।

जेतुं चन्द्रं जयाद्यं चलति रणचणे, चाहमाने तदुक्तो
नासीरं द्राग्ग्रसिष्ये वरमिति वितरन्कच्छदेवोऽप्यगच्छत्।
योद्धा योऽद्धा व्यधत्त प्रधनभुवि समुत्पाट्य दन्तीन्द्रदन्तौ
हं हो हुंकृत्य रंहो दधदितमितखाँखण्डनं खड्गचण्डः।।

।। ८७।।

नष्टे द्विष्टास्त्रवृष्ट्याऽर्वति समिति समुत्प्लुत्य सर्पन्परेषां
पिष्ट्वा षष्टिं सहस्राण्यहह परपुरीगोपुरं प्राप्य पत्तिः।
पश्यत्यारान्मलेशौ विशकलिततनुर्ज्येष्ठमासे प्रजेष्ठः
कृष्णे पक्षे तृतीयाऽहनि कुशरकुकौ हायने हा व्यरंसीत्।।

।। ८८।।

योऽजैषीदाजिषष्ठिं यवनपमसकृद्यो गृहीत्वाप्यमुञ्चद्-
यः क्ष्मां वेदाक्षिवर्षाण्यवनियुगदिनान्यच्छशोचिः शशास।
भङ्क्ता षष्ठिं सहस्राण्यधिसमरमरेर्यो भटानां गतः स्व-
स्तस्य प्रद्युम्ननाम्नो नुतिमिह न कुतः कूर्मदेवस्य कुर्मः।।

।। ८९।।

एवं प्रद्युम्नदेवे निपतति प्रतरो जैतसी लाखणाख्यः
कान्हश्चेति त्रयोऽमी मथितरिपुवला भ्रातरोऽप्यस्य पेतुः।
भीमो भद्रो वलाद्यः समरसमरसौ द्वौ सुतौ तातपार्श्वे
कृत्ताङ्गौ पेततुर्द्रागपरिमितचमूं चूर्णयित्वा भुजाभ्याम्।।

।। ९०।।

सामन्तैर्वारितोऽपि प्रबलभुजबलः श्रीमलेशिस्तदानीं
प्रोत्प्लुत्याशीतिलक्षोन्मितविमतवलं वारयित्वैकयामम्।
दृष्ट्वा पृष्ठं परेषां व्रणशतविगलच्छोणशोणायिताङ्गः
साकूतं नाकनारीनयनचुलुकितप्रौढमूर्त्तिर्मुमोह।।

।। ९१।।

भ्राम्यद्भैरवभूतभैरवरवं नृत्यत्कबन्धोद्धवं
चण्डीचर्वितवीरमुण्डमुदयच्छोणापगादुर्गमम् ।
उच्चैर्दन्तिशवव्यवस्थितभटं व्याकीर्णरत्नोत्कर-
द्योतद्योतितदिङ्मुखं खलु चिरं भाति स्म जन्याऽजिरम्।।

।। ९२।।

वल्गद्गृद्ध्रगरुन्मरुद्गुरुतरव्यासङ्गमन्दीभवद्-
व्यामोहः क्षतजोक्षितः क्षतपरव्यूहो दुरूहक्रमः।
पृथ्वीराजमहीभुजा जय जयेत्यारब्धसत्यस्तवो
दध्मौ शङ्खमपद्रुतेषु रिपुषु प्रद्युम्नराजात्मजः।।

।। ९३।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे चतुर्थसर्गस्य सर्गोऽभूत्।।**

***

।। ८।।

एवमेव पराक्रम्य पराक्रमणकोविद:।
चतस्र: क्रमत: कन्या राज्ञामन्या: समाददे।।

।। ९।।

रममाणो गुणोदारैर्दारैर्मारमनोरम:।
क्रमादुत्पादयामास द्वात्रिंशत्तनयान्नृप:।।

।। १०।।

जगुस्तेषु जना ज्येष्ठं विज्जलं श्रीसमुज्ज्वलम्।
अधुना नामभि: शेषांस्तानशेषान्प्रचक्ष्महे।।

।। ११।।

बाल: शृङ्गणको ढोलो जैतलस्तोलभोलकौ।
बाघो भाणस्तथा प्रोक्त: प्राज्ञैरीश्वरदासक:।।

।। १२।।

अरसि- नरसी रामो रत्नो धारसि खेतसी।
चाचवो यथ- गोविन्द- गोसलोद्धवकार्जुना:।।

।। १३।।

हरो नर: पुनर्जानु: शेष: किं च विशल्यक:।
जगरामाभिधो ज्ञानो वीरमो वेणुकोऽन्तिम:।।

।। १४।।

इति पुत्रान्समुत्पाद्य द्वात्रिंशत्स प्रजेश्वर:।
ज्येष्ठं श्रेष्ठयश:कामो विज्जलं स्वपदे न्यधात्।।

।। १५।।

जल्पानि जैतलात्तत्र जाता जैतलपोतका:।
शेषोऽशेषकलावास: शेषावासमवासयत्।।

।। १६।।

शेषा ये सूनवस्तेषामनपत्या मृता: कति।
आसञ्ज्ञातिच्युता: केऽपि भाविनो बलवत्तया।।

।। १७।।
द्विपञ्चाशत्समा: किं च सार्द्धमासमतन्द्रित: ।
मलेशि: स्वपदे तस्थौ निश्चित्य ब्रूमहे वयम् ।।
।। १८।।
फाल्गुनस्य सिते पक्षे तृतीयायां मलेशिजित् ।
रामरन्ध्राक्षिभूवर्षे वर्षन्वित्तं दिवं गत: ।।
।। १९।।
देवभूयं गते ताते तन्द्रामुन्मुच्य विज्जल: ।
दिदीपे राज्यमासाद्य प्राज्यमाज्यमिवानल: ।।
।। २०।।
राष्ट्रोढरामसिंहस्य तनया बहुरङ्गदा ।
महिषी विज्जलेन्द्रस्य त्रीनसूत सुतान्सती ।।
।। २१।।
प्रथमो राजदेवाह्वो हम्वीरोऽपि द्वितीयक: ।
तृतीयो भानुगो नाम विज्जलस्य सुता: श्रुता: ।।
।। २२।।
विज्जल: श्रावणे मासि चतुर्थ्यां धवले दले ।
रसाग्निदृग्धरावर्षे लेखलोकमलोकयत् ।।
।। २३।।
दृगग्निशरद: पञ्चमासानेकमहोऽप्यहो ।
जुगोप पृथिवीं गोप्ता विज्जलो विद्युदुज्ज्वल: ।।
।। २४।।
अनपत्यावेव हम्बीरभानुगौ विज्जलात्मजौ ।
समयौ समये स्वर्गं समीयतुरिति श्रुतम् ।।
।। २५।।
रराज राजदेवोऽथ राज्ये रञ्जितसज्जन: ।
सज्जितासिमहाधारामज्जिताशेषशात्रव: ।।

।। २६।।
देवतीनगरीपालहरिपालनृपात्मजा।
शक्रस्येव शची राज्ञो राज्ञी राजलदा मता।।
।। २७।।
यस्यामुत्पादयामास सुतानष्टौ स वैज्जलिः।
अम्बावतीनगर्यां यैर्वस्तुं वास्तुविधिः कृतः।।
।। २८।।
चक्रुरम्बावतीगर्भे शम्बायुधसमश्रियः।
प्रासादान्सप्रसादा ये वप्रचित्रप्रभाञ्चितान्।।
।। २९।।
सप्तत्रिंशत्समा मासांश्चतुरोऽहानि षोडश।
ररक्ष राजदेवः क्ष्मां देवराजो यथा दिवम्।।
।। ३०।।
पौषे मासे कृष्णषष्ठ्यां त्रिसप्तह्येकवत्सरे।
कीलने न्यस्य सर्वस्वं राजदेवस्तनुं जहौ।।
।। ३१।।
पितुः प्राप्य पदं प्राज्ञः प्रजा धर्मेण पालयन्।
कीलनः कीलितारातिर्द्वे स्त्रियौ परिणीतवान्।।
।। ३२।।
तत्रैका दोदराजाख्यरावतेन्द्रसमुद्भवा।
आसीद्भवालदा नाम कान्ता कीलनभूपतेः।।
।। ३३।।
चाहमानमहारावहरपालस्य पुत्रिका।
राज्ञी राज्ञो द्वितीयाऽभूदद्वितीयाऽपि रूपतः।।
।। ३४।।
क्ष्मापतेः षट्सुता आसन्कुतिलो दोदलो भरुः।
खीवराजः शिववरो यशोराज इति क्रमात्।।

।। ३५।।
दोदः शिववरः पुत्रावपुत्रावेव सीदतुः।
यो भरुः स तु सम्पन्नं टाटावासपुरं श्रितः।।

।। ३६।।
धीरराजो वनाडेऽस्थादासन्धीरावता यतः।
रोडेऽवात्सीद्यशोराजो यशोवन्तो यतोऽभवन्।।

।। ३७।।
समाः स्थित्वाऽष्टपञ्चाशत्त्रयस्त्रिंशद्दिनानि सः।
त्रित्रित्रिक्ष्माब्दके कृष्णनवम्यां बाहुले मृतः।।

।। ३८।।
कुतिलो वीरतिलकः किल तस्य सुतोऽग्रजः।
पितर्युपरते पृथ्वीं प्रशशासोग्रशासनः।।

।। ३९।।
कुतिलस्य प्रियाः पञ्च तथा पुत्रास्त्रयोदश।
जोणशिः किं न हम्बीरो जोबनेरमियाय यः।।

।। ४०।।
यत एवाविरासंस्ते वीरा हम्बीरदाभिधाः।
तृतीयो वडसी नाम चाटसुं चाट पाटवी।।

।। ४१।।
भाँखरोतायमारभ्य कच्छाः कीतावता मताः।
आलणः कालखेऽतिष्ठन्नालणं विदधे पुरम्।।

।। ४२।।
प्रावर्तन्त यतः कच्छा योगिनो योगयुक्तयः।
जीतमालः स्थितः कोटपहाडपुटभेदने।।

।। ४३।।
यस्मान्नापावता नाम प्रजाता पापहक्रमाः।
टुग्गाख्यो यः स्मृतस्तस्माट्टोगाः कच्छाः प्रजज्ञिरे।।

।। ४४।।

टुग्गानन्तरजो राज्ञो बाल एव मृतः सुतः।
अपुत्रः सप्तमोऽमार्षीत्पुत्रो बलिबडाह्वयः।।

।। ४५।।

मृता महालणो राजो भोजो बाघस्त्रयस्तथा।
महीपालस्य गोपालः प्रवरोऽप्यवरः सुतः।।

।। ४६।।

कुतिलो गोत्रतिलकानिति पुत्रानवाप्य सः।
वसुन्धरां वसुस्फूर्तिर्बुभुजे भुजवर्तिनीम्।।

।। ४७।।

दुर्भिक्षे कुतिलो राजा मारवाटच्युताः प्रजाः।
वर्षन्धान्यानि धन्यश्रीर्वर्षमेकमपूषुषत्।।

।। ४८।।

भूवेदशरदो मासांस्त्रीन्स्थित्वा स्वर्गतोऽब्दके।
माघकृष्णदशम्यां स चतुःसप्तत्रिभून्मिते।।

।। ४९।।

ततोऽनन्तरमासाद्य जोणशिः पितुरासनम्।
बभ्राजे भ्रातृभिर्भक्त्या समनुष्ठितशासनः।।

।। ५०।।

एवं सत्येकदा राज्ञो गोपालो योऽनुजानुजः।
मृगयातिप्रसङ्गी गां सोऽवधीद्गवयभ्रमात्।।

।। ५१।।

सम्भूय भ्रातरः सर्वे ततस्तं निरकासयन्।
सङ्गी को नाम जायेत महापातककारिणः।।

।। ५२।।

इन्दोरनृपतेर्दासस्तं प्रणम्य न्यवेदयत्।
विवक्षुरस्मि किञ्चित्त्वामन्यथा मन्यसे न चेत्।।

।। ५३।।

मिलित्वा भ्रातृभिः सर्वैर्जातितस्त्वं बहिष्कृतः।
स राज्योपस्करा कूर्म सुता मे गृह्यतामिति।।

।। ५४।।

इत्युक्तस्तेन गोपालो गत्यन्तरमलोचयन्।
स्वीचक्रे तत्तथैव द्राग्लोभः कस्य न दुस्त्यजः।।

।। ५५।।

चत्वारो जोणसेः पुत्रा बभूवुस्तानपि ब्रुवे।
उदयः प्राक्करणजिज्ज्येष्ठः प्रेष्ठसुहृज्जनः।।

।। ५६।।

कुम्भो द्वितीयः खोहेऽस्थादासन्कुम्भाणिका यतः।
सिंहस्तृतीयः सिंहाभोऽभूवन्सिंहादका यतः।।

।। ५७।।

जितादिकरणाख्यो यः कनिष्ठो जोणशेः सुतः।
संख्यातः स चतुर्थोऽपि पञ्चत्वमसुतोश्रयत्।।

।। ५८।।

सप्ताहोनान्नवाध्यब्दान्स्थित्वाऽऽपत्स्वः स जोणशिः।
माघकृष्णतृतीयायां रामाक्ष्यब्धीन्दुवत्सरे।।

।। ५९।।

स्वीकृत्य राज्यमुदयकरणः करुणाकरः।
परिणीय प्रियास्तिस्रस्तास्वष्टौ विदधे सुतान्।।

।। ६०।।

नृसिंहः पातलो नाम यस्मात्पातलपोतकाः।
बालोऽमरसरे तस्थौ यतोऽजायत मोकलः।।

।। ६१।।

ततः शेखो यतः शेखावता वीरा वतातताः।
षेषां षष्टिः सहस्त्राणि खड्गिनामासतेऽधुना।।

।। ६२।।
ना यस्तुर्यो यत: सोमन्तका जाता: समन्तत:।
नरुर्य: पञ्चमस्तस्तमान्नरूकाणां समुद्भव:।।
।। ६३।।
पीथ: षष्ठस्तत: पीथापोता: प्रोक्तास्तदुद्भवा:।
शो ब्रह्मो नींदडेऽतिष्ठद्यत: शो ब्रह्मपोतका:।।
।। ६४।।
पीप: पुनर्विपन्न: संसर्पतामाप कर्मत:।
तामसानां तनुत्यागे भवत्येवेदृशी गति:।।
।। ६५।।
द्वाविंशत्यब्दकान्मासमेकं स्थित्वा स फाल्गुने।
मृत: कृष्णतृतीयायां शराब्ध्यब्धीन्दुहायने।।
।। ६६।।
नृसिंहोऽभून्नृपस्तस्य स्त्रियस्तिस्त्र: सुतास्त्रय:।
वनवीरस्तथा जेतस्तृतीय: काघिलाह्वय:।।
।। ६७।।
जैतकाघिलकौ तत्र वन्ध्यावेवावसीदतु:।
वनवीरे धुरं न्यस्य नृसिंहोऽपि स्म सीदति।।
।। ६८।।
प्रौष्ठे कृष्णे दले षष्ठ्यां बाणाष्टाब्धीन्दुवत्सरे।
नन्दाग्न्यब्दान्मासषट्कं द्व्यहं स्थित्वा नृपो मृत:।।
।। ६९।।
वनवीरस्य पत्न्य: षट् तत्रैका हड्डवाघजा।
सुभद्रा फाल्गुनस्येव सुभद्रा नाम नामत:।।
।। ७०।।
कान्ता कुन्तमदा चान्या मान्या विजयरामजा।
चाहमानकुलोत्पन्ना नाम्ना करमती परा।।

।। ७१ ।।

तुर्याहड्डोद्भवा भव्यश्री राजकँवरा वरा।
रणवीरात्मजा हेमगौरा गौरा तु पञ्चमी।।

।। ७२ ।।

पत्नी षष्ठी तु कमलवती कमलसौरभा।
सीसादचुञ्चुचाचाख्यभूपतेर्यासुता श्रुता।।

।। ७३ ।।

तास्वथो वनवीरेन्द्रः पञ्चपुत्रानजीजनत्।
अभूदोधरणस्तत्र ज्यायानन्वर्थनामकः।।

।। ७४ ।।

द्वितीयो रावतनरो वाटके कल्पितस्थितिः।
यतः श्रीद्योतकाः कच्छावनवीरकपोतकाः।।

।। ७५ ।।

तृतीयो मेलगो नाम यतो मेलगपोतकाः।
चतुर्थस्तु वरो यस्माद्वरे पोताः प्रजज्ञिरे।।

।। ७६ ।।

पञ्चमो वीरमो वीरा यतो वीरमपोतकाः।
एवं पञ्च सुतास्तस्य पाण्डोरिव बभुः प्रभोः।।

।। ७७ ।।

द्वादश्यामाश्विने कृष्णे रसाङ्काब्धीन्दुवत्सरे।
रुद्रवर्षाणि मासान् षट्-स्थित्वाऽगान्नृपतिर्दिवम्।।

।। ७८ ।।

आधिपत्यं प्रपद्याऽथ श्रीमानोधरणो नृपः।
चतस्रश्चतुरस्रश्रीः परिणिन्ये नृपात्मजाः।।

।। ७९ ।।

सीसादकुमजा देदा तस्य स्त्री प्रथमा मता।
राष्ट्रोढकुलजा किं च द्वितीया श्रुतिमागता।।

।। ८०।।

तृतीया हंसकँवरा यासीत्खारिनृपात्मजा।
चतुर्थी पुष्पकँवरा चन्द्रसेनस्य या सुता।।

।। ८१।।

आभिश्चतसृभि: स्त्रीभी रममाणस्य भूपते:।
चन्द्रसेन: सुतो जज्ञे सागरस्येव चन्द्रमा:।।

।। ८२।।

वस्वक्षिसम्मितसमा: कमठाधिराजो
मासद्वयं दिवसमेकमिलां प्रशास्य।
शम्भोस्तिथौ शितिदले किल मार्गशीर्षे
वेदाक्षिबाणधरणीशरदि स्वराप।।

।। ८३।।

लोकान्तरं पितरि गच्छति चन्द्रसेन:
सेना प्रकम्पितपर: प्रतिपद्य राज्यम्।
शम्बायुधोपममहा: स्फुरदुच्चवप्रा-
मम्बावती मतिमती रुचिरं ररक्ष।।

।। ८४।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे पञ्चमसर्गस्य सर्गोऽभूत्।।**

***

## षष्ठः सर्गः

।। १।।

चन्द्रसेनस्य सप्तासन्स्त्रियश्चन्द्रनिभानकनाः।
तास्वाद्याऽमरकोटेन्द्रराजमल्लनृपात्मजा।।

।। २।।

योषिदासीद्द्वितीयाऽस्य चाहमाननृपात्मजा।
श्रृङ्गारकँवरा नाम तृतीयेश्वरदासजा।।

।। ३।।

तुर्या भार्या तु टोडेन्द्रसुता काश्मीरदाह्वया।
यशःकँवरिका चाहमानजा किञ्च पञ्चमी।।

।। ४।।

षष्ठीममृतदामाहुर्यासीदुदयसिंहतः।
सप्तमी नलदा नाम या रायशिलभूपजा।।

।। ५।।

पृथ्वीराजस्तथा देवीदासो रावतकुम्भकः।
बभूवुर्भव्यविभवाश्चन्द्रसेनात्सुतास्त्रयः।।

।। ६।।

देवीदासः सदारोऽपि व्यरंसीदनपत्यकः।
सामग्रीसन्निधानेऽपि दैवायत्तं यतः फलम्।।

।। ७।।

यश्च रावतकुम्भाख्यो राज्यस्यार्द्धं प्रगृह्य सः।
महारिपत्तनेऽयासीन्मूलं कुम्भावतस्थितेः।।

।। ८।।

एकदा चाटसोः सीम्नि हयव्यापारिणः करम्।
गृहीत्वा भाँखरोताख्या लुलुण्ठुः कमठा हठात्।।

।। ९।।

व्यापारिणोऽपि सम्भूय सम्राजं माडवं गताः।
व्यजिज्ञपन्वयं राजन्भाँखरोतैर्विलुण्ठिताः।।

।। १०।।

इत्युक्तो माँडवो दिल्लीमघवा सेनया सह।
उद्दिश्य चाटसुं चण्डश्चचाल क्ष्मां प्रचालयन्।।

।। ११।।

तमायान्तं समाकर्ण्य भाँखरोता भयस्पृशः।
शरणं जग्मुरागत्य चन्द्रसेननृपं नताः।।

।। १२।।

चन्द्रसेनोऽपि सैन्यानि शरण्यः समयोजयत्।
माडवं चाटसुप्रान्ते विजिग्ये विजयोपमः।।

।। १३।।

वागाक्षिवत्सरान्मासद्वयं वाणाक्षिवासरान्।
चन्द्रसेनश्चन्द्रकीर्तिः कुर्वन् राज्यमिह स्थितः।।

।। १४।।

पञ्चम्यां फाल्गुने कृष्णे नन्दबाणशरेन्दुके।
मृतोऽब्दे चैत्यमस्यास्ते लाडीसत्याः समीपतः।।

।। १५।।

पृथ्वीराजोऽथ राजा सन्नुदुह्य वनिता नव।
एकोनविंशतिं पुत्रान्दुरापश्रीरवाप्तवान्।।

।। १६।।

अभूवन्नस्य ये दारा दारका येऽप्युदारकाः।
तेषां नामानि नामानि निर्णेतुमिह किं मया।।

।। १७।।
भक्तिर्भक्तिमती पूर्वा देवतीदेवदारिका।
सुलक्षणा द्वितीया या रावनाथस्य सा सुता।।
।। १८।।
तृतीया रायशल्यस्य सुतोदयपुरप्रभोः।
तुर्या तोमरभूर्भोडरावपुत्री पदार्थदा।।
।। १९।।
निर्वाणकुम्भलजा कुम्भपौत्री पत्नी तु पञ्चमी।
षष्ठी रमेति बुन्दीन्द्रदुहिताहड्डगोत्रजा।।
।। २०।।
सप्तमी बालिका नाम बीकानेरेन्द्रबालिका।
निर्वाणधर्मदोत्पन्ना नाम्ना गौरवदाष्टमी।।
।। २१।।
श्रिया जिताप्सरोऽनीका न स्त्री कापि यया समा।
गलान्तः प्रस्फुरत्पीका बीकावत्यपि काऽप्यभूत्।।
।। २२।।
बालान्द्वादश बालायां तिस्त्रः सोऽवाप बालिकाः।
शेषासु सप्त सप्ताश्वतेजसस्तानथ ब्रुवे।।
।। २३।।
तत्रापि प्रथमं बाला बालान्वितयथाक्रमम्।
भीमो भीमोपमो जज्ञे ज्यायान्भीमोहवर्जितः।।
।। २४।।
पीचाणो नायले स्थित्वा सामरं शिश्रिये पुरम्।
यतस्ते पुनरुत्पन्नाः पीचाणोताः सहस्रशः।।
।। २५।।
सुलतानोऽपि कानोतपत्तनेऽभूत्प्रतिष्ठितः।
सुलतानोता यतो जाता कच्छजातावलं श्रुताः।।

॥ २६॥
भारमल्लो रणे यस्य प्रतिमल्लो न कोऽप्यभूत्।
पूर्णमल्लः पुनर्भल्लप्रोतारिर्वीरतल्लजः॥
॥ २७॥
गोपालः प्राप सामोदं यतो नाथावतोद्भवः।
जगमालो निराणेऽस्थात्खँगारोता यतोऽभवन्॥
॥ २८॥
सहमल्लस्तथा रायमल्लोऽभूतामपुत्रकौ।
साङ्गोऽप्यसुनूरेवासीत्साङ्गानेरेऽद्य सोऽर्च्यते॥
॥ २९॥
बलभद्रोऽचरोलस्थो बलभद्रोपमो बले।
बलभद्रोतका जाताः प्रजाभद्रायता यतः॥
॥ ३०॥
रामसिंहः स्थितः खोहे रामसिंहोतका यतः।
प्रतापोऽभूद्यतः पोताः प्रतापाद्याः प्रजज्ञिरे॥
॥ ३१॥
पृथ्वीराजं समासाद्य बीकावत्यप्यजीजनत्।
साँयिदासं तथा चित्रभुजं चेति सुतावुभौ॥
॥ ३२॥
साँयिदासो वटोदेऽस्थात्साँयिदासोतका यतः।
बगरौ चित्रभुजको यतश्चित्रभुजोतकाः॥
॥ ३३॥
रायशल्यसुता राज्ञी सुतांस्त्रीन् सुषुवे शुभान्।
भीकस्तैजसिकश्चोभौ मृतौ तत्रानपत्यकौ॥
॥ ३४॥
कल्याणस्तु तृतीयो यः कलवाडे कृतस्थितिः।
कल्याणोतास्ततो जाताः प्रजाकल्याणकारिणः॥

।। ३५।।
असूत सा सुतं साध्वी पूर्णमल्लं पदार्थदा।
पूर्णमल्लोऽपि सुज्जोजिं जनयामास नन्दनम्।।
।। ३६।।
सुज्जोजिं जननी निन्ये स्वपितुर्वेश्म बालकम्।
यतस्ते तूर्णमुत्पन्नाः पूर्णमल्लोतकच्छपाः।।
।। ३७।।
गौडराजसुता राज्ञी जनयामास रूपसिम्।
यो रूपनगरं चक्रे नगरं नगरं जितम्।।
।। ३८।।
परिणामे विरक्तानां वेषं योऽधत्त पेशलम्।
अजमेरोः परिसरे सन्ततिर्यस्य सन्तता।।
।। ३९।।
एवमेकोनविंशत्या चन्द्रसेनसुतः सुतैः।
सहितः स हितं चक्रे प्रजाचक्रस्य नित्यशः।।
।। ४०।।
कर्णस्फोटान् समुत्सृज्य राज्ञा रामानुजीयकः।
अकारि पय आहारी गुरुर्गुरुचमत्कृतिः।।
।। ४१।।
योगिनोऽपि मृषा मन्त्रतन्त्रदर्शितसिद्धयः।
शिलाः प्रचिक्षिपुः क्षुब्धाः पय आहारिभीतये।।
।। ४२।।
विलोक्य पय आहारी पतन्तीर्विपुलाः शिलाः।
हुङ्कारेणैव ताः सिद्धो ध्वंसयामास दूरतः।।
।। ४३।।
अथाऽन्येद्युः पुनः पापाः पाखण्डपथवर्तिनः।
सिद्धं तं भीषयामासुः सिंहतां परिकल्प्य ते।।

।। ४४।।
सोऽपि रामानुजीयानां मुकटो लकुटेन तान्।
कूटकेसरिणः सद्यो द्रावयामास हेलया।।
।। ४५।।
एवं रुजत्सु चुक्रोध तेषु शान्तोऽपि वैष्णवः।
आततायिषु दुष्टेषु समर्थः संक्षमेत कः।।
।। ४६।।
स क्रुद्धः स्वामिनां मुद्राः समाकृष्य स्वसिद्धितः।
मानभङ्गं चिरं चक्रे चक्राङ्कितकलेवरः।।
।। ४७।।
ततस्ते स्वामिनो ह्रीणास्तमेव शरणं ययुः।
समुद्रादपि गम्भीरः स मुद्रा द्राग्ददावहो।।
।। ४८।।
स तानिति पराजित्य महात्मा प्रणतान्पुरः।
कष्ठानि मे तपोवह्नौ क्षिपतेत्थमशिक्षयत्।।
।। ४९।।
सप्रणाममुरीकृत्य तदुक्तं तत्तथैव ते।
क्षिपन्त्यद्यापि काष्ठानि तत्तपोग्नाविति स्थितिः।।
।। ५०।।
एकदा पयआहारी पृथ्वीराजाय भूभुजे।
अकारयत्तपःसिद्ध्या द्वारिकाधीशदर्शनम्।।
।। ५१।।
प्रभावेण गुरोर्भूपः खेन द्वारवतीं ययौ।
तत्र श्रीद्वारिकाधीशं स द्रष्टुमुपचक्रमे।।
।। ५२।।
वीजयन्तीं व्यजनतो द्वारिकाधीशमादरात्।
बालां नाम निजां पत्नीं ज्ञात्वा संशयमाप सः।।

।। ५३।।
इयं बाला कथं बालां निरूपयति रूपतः।
अथवा प्राणिनां लोके मिलत्यप्याकृतिः क्वचित्।।
।। ५४।।
अन्यैवेयमिति भ्रान्तो बालां प्रोवाच पार्थिवः।
भगिनि त्वमितोऽपेहि यावत्पश्याम्यहं हरिम्।।
।। ५५।।
तस्यामपसृतायां स नत्वा श्रीद्वारिकेश्वरम्।
अम्बावतीं लघु प्राप गुरुविद्याप्रभावतः।।
।। ५६।।
गुरुं प्रणम्य पप्रच्छ कच्छराडिति संशयम्।
गुरो तत्र मया बाला शपे प्रत्यक्षमीक्षिता।।
।। ५७।।
इन्द्रजालमिदं किं वा मदीयो मतिविभ्रमः।
तदद्य शंस यच्छ्रुत्वा ध्वंसेत मम संशयः।।
।। ५८।।
इति विज्ञापितो राज्ञा गालवाश्रमगो गुरुः।
ध्यानेनालोच्य तत्त्वार्थं व्याकर्तुमुपचक्रमे।।
।। ५९।।
बालां जानीहि भूजाने योगसिद्धामृतं वदे।
या नित्यं द्वारिकानाथं नन्तुं याति विहायसा।।
।। ६०।।
धन्योऽसि देव यस्येदृग्देवी देवीव दीव्यति।
किमत्र विस्मयः सिद्धिर्योगे सिद्ध्यति सिद्ध्यति।।
।। ६१।।
इत्युक्तो गुरुणा बाला शालां गत्वा स विस्मितः।
उपालभत तामित्थं निह्नवं किं वृथा कृथाः।।

।। ६२।।

ततः परं जहौ तां स स्वसाऽसि त्वमिति ब्रुवन्।
भ्रमादप्युदितं सन्तः स्वं वचो निर्वहन्ति हि।।

।। ६३।।

अद्याप्यम्बावतीमध्ये नरसिंहमठान्तिके।
बालाशाला विशालाऽऽस्ते लसज्जालावलिच्छटाः।।

।। ६४।।

तदाप्रभृति भूपस्य पय आहारिणि प्रभौ।
बालायां साक्षमालायां तुल्या भक्तिरभासत।।

।। ६५।।

स रामानन्दिनं कुर्वन्नलिके तिलकोत्तमम्।
तिलकः कूर्मगोत्रस्य किल कं नाऽऽप सम्मदम्।।

।। ६६।।

अब्धिदृग्वत्सरानष्टौ मासान्विंशतिवासरान्।
प्रकृतीः स निजाः शुद्धप्रकृतिः पालयन्स्थितः।।

।। ६७।।

बाहुलस्य वलक्षैकादश्यां स्मरगुरुं स्मरन्।
वत्सरेऽब्ध्यष्टबाणेन्दौ भूपः प्राप परं पदम्।।

।। ६८।।

अस्य चैत्यं चिरं चारुचित्रचन्दिरमुच्चकैः।
रोचते शिल्परुचिभिश्चित्रनाथसमीपगम्।।

।। ६९।।

पूर्णमल्लो राजमल्ले पितर्युपरते सति।
सिंहासनं समाक्रम्य सिंहसत्त्वो धरां दधौ।।

।। ७०।।

स षड्वर्षाणि मासौ द्वौ रामदृग्दिवसानपि।
धुरं दधार ढुण्ढारदेशस्य गुणपेशलः।।

।। ७१।।

माघस्य शुक्लपञ्चम्यां खाङ्कबाणधराब्दके।
पूर्णमल्लः स पूर्णश्रीस्तूर्णं प्राणानमूमुचत्।।

।। ७२।।

मृते भ्रातरि भूपोऽभूद्भीमो भीमपराक्रमः।
योऽस्थादब्दद्वयं श्रामषट्कं किं च दिनानि षट्।।

।। ७३।।

पूर्णिमायां सिते पक्षे श्रावणस्य धराधवः।
संवत्सरे कृशान्वङ्कबाणचन्द्रमिते मृतः।।

।। ७४।।

भीमे स्वर्गतवति तत्सुतः समुद्य-
द्रत्नश्रीरलभत रत्नशिः प्रयत्नात्।
भाद्रस्य प्रतिपदि पक्षके वलक्षे
रामाङ्काशुगराशिवत्सरे प्रतिष्ठाम्।।

।। ७५।।

क्ष्मामेकादशशरदोऽथ मासषट्कं
रामाक्षिप्रमितदिनान्यधत्त राजा।
अष्टम्यां सितशकले स शुक्रमासे,
दायादैर्युगखरसेन्दुके हतोऽब्दे।।

।। ७६।।

स्थित्वाशाकरणनृपः पदे जुगोप-
क्ष्मां पक्षावधि वत रत्नशेस्तनूजः।
निष्कास्य द्रुतमथ यं प्रसह्य पृथ्वी-
राजस्य क्षितिपतिरास भारमल्लः।

।। ७७।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे षष्ठः सर्गः समाप्तिमापेदे।।**

***

## सप्तमः सर्गः

।। १।।

अथाशाकरणो राजा सम्म्राजं प्राप्य तत्पुरः।
प्रसह्य भारमल्लेन हृतं राज्यं न्यवेदयत्।।

।। २।।

चक्रवर्ती तुरष्केन्द्रः श्रुत्वा तत्प्रार्थनां पराम्।
हाजीखाँ यवनं तस्य साहाय्ये सम्यगादिशत्।।

।। ३।।

अपृत्नासिः प्रयत्नेन रत्नशीजेन सत्कृतः।
हाजी वाजिनमारुह्य म्लेच्छराजिभिरुद्ययौ।।

।। ४।।

एतस्मिन्नन्तरे भीतो भारमल्लो भुवः पतिः।
आशाकरणमाहूय ददौ नरवरं पुरम्।।

।। ५।।

महाजिमन्तरा हाजी सिद्धमालोच्य कर्म तत्।
संन्यवर्तत सत्कारं गृहीत्वा भारमल्लतः।।

।। ६।।

केऽप्याहुः स्वां सुतां कृष्णां हाजिने हा ददौ नृपः।
इति को नाम मन्येत मादृशः कच्छसंश्रयः।।

।। ७।।

रत्नशीजो नरवरस्तस्थौ नरवरे चिरम्।
यद्गोत्रसम्भवाः कच्छास्तत्रैव प्रसृता भृशम्।।

।। ८।।

एवं व्यवस्थया राज्ये विभक्ते भारमल्लकः।
भारमम्बावतीपुर्या बभार विभवाद्धुतः।।

।। ९।।
भारमल्लस्य भूभर्त्तुर्भार्या दश बभूविरे।
ज्येष्ठा वदनदा तत्र राष्ट्रोढदुहिताऽभवत्।।
।। १०।।
पुरोदासो भगवतो भगवानः सुतावुभौ।
कन्यैका रत्नकँवरा त्रीण्यपत्यान्यसूत सा।।
।। ११।।
तत्र यो भगवानाद्यो दासः सोऽस्थाल्लवानके।
ततो बाकावता राकासुधांशुयशसोऽभवन्।।
।। १२।।
दुहिता रत्नकँवरा रत्नाढ्यकबरीभरा।
मेडतान्वयरत्नाय वाजिदाय समर्पिता।।
।। १३।।
चाहमानकुलाध्यक्षवनवीरनृपात्मजा।
नाम्ना पद्मावती पद्माद्युतिरासीद् द्वितीयका।।
।। १४।।
यस्यां परशुरामोऽभूत्तुल्यः परुषरामतः।
अनपत्यः परेतेन्द्रग्राहेण ग्रस्यते स्म यः।।
।। १५।।
राष्ट्रौढनगराजोत्था राज्ञी नयनदा तथा।
राष्ट्रोढखेतशीकन्या कृष्णावत्यभिधाऽप्यभूत्।।
।। १६।।
राष्ट्रोढनारसिंहोत्था रुक्मिणी रुक्मिणीरुचिः।
कल्याणकँवरा राज्ञी वाजिराजात्मजा स्मृता।।
।। १७।।
या फल्लकँवरा नाम जगमालस्य सा सुता।
राज्ञी चम्पावती शम्पाच्छवी रावगणात्मजा।।

।। १८।।

चम्पावत्यामजायन्त क्रमेण तनयास्त्रय:।
सुता लाडाह्वया चैका स्व: कुमार्येव सा गता।।

।। १९।।

चम्पावतीसुतेष्वाद्यो जगन्नाथ इति श्रुत:।
यष्टोडापत्तने तस्थौ जगन्नाथोतकायत:।।

।। २०।।

द्वितीयो भोपतिरभूद्यो गुर्जरमृधे बली।
नृपान्निपात्य पतित: पश्यत्यर्कवरे पुर:।।

।। २१।।

तृतीयोऽप्यास शार्दूल: शार्दूलकटुविक्रम:।
यस्य मालपुरप्रान्ते सन्ततिर्व्यानशे क्रमात्।।

।। २२।।

सुलक्षणा लखारावरामचन्द्रस्य या सुता।
लेभे सुन्दरदासं सा पृथ्वीदीपं तथा सुतम्।।

।। २३।।

तस्थौ सुन्दरदास: श्रीसुन्दरे टौङ्कपत्तने।
लोके सुन्दरदासोता विश्रूयन्ते यदुद्भवा:।।

।। २४।।

पृथ्वीदीपो यशोदीपो द्वीपविख्यातविक्रम:।
वर्षयन्नश्रुसुहृदामनपत्यो दिवं गत:।।

।। २५।।

चित्तोढाधीशसीसादजगत्सिंहस्य भूभृत:।
कृत्स्नातोऽप्यधिका किस्ना भारमल्लस्य भामिनी।।

।। २६।।

लताभिरिव कान्ताभि: फलैरिव सुतैर्वृत:।
बभौ पुष्पगुलच्छश्रीर्भारमल्ल: सुरद्रुवत्।।

।। २७।।

शरदृद्धायन् सप्त सप्तश्रामान्द्वादशवत्सरान्।
अविच्छिन्नमरिच्छेदी भारमल्लो बभार गाम्।।

।। २८।।

तपोवलक्षपञ्चम्यां खाग्निषड्व्योमवत्सरे।
भारमल्लाह्वयो देवो देवभूयं गतोऽभवत्।।

।। २९।।

भारमल्लोऽथ हत्वाऽध्वदस्यून्मीणकनामकान्।
ग्रामेषु घामणाद्येषु जयं नैजमघोषयत्।।

।। ३०।।

भारमल्ले दिवं याति भगवद्दासभूपतिः।
अम्बावतीमधिष्ठाय व्यनैषीत्सुप्रजाः प्रजाः।।

।। ३१।।

आसंश्चारुचरित्राणि विचित्राणि विशाम्पतेः।
पातिव्रत्यपवित्राणि कलत्राणि त्रयोदश।।

।। ३२।।

अथ नामानि भागोती परमारपिचाणजा।
वटगुर्जरजा शोकमल्लजातान्तरङ्गदा।।

।। ३३।।

हड्डुजा कृष्णकँवरा बुद्दीन्द्रसुनकन्यका।
तथा भारथचन्द्रस्येश्वरदा जादमान्वया।।

।। ३४।।

भामा तु कान्यकुब्जेन्द्रताराचन्द्रसुता श्रुता।
सोलङ्किरुद्रदुहिता गङ्गाकँवरिकाह्वया।।

।। ३५।।

दुहिताऽचलदत्तस्य कँवरा लाडपूर्विका।
सुमित्रा चातुरी चित्रा पुत्री विजयपूःपतेः।।

॥ ३६ ॥

वीररावजनी रायकँवरा शीलशालिनी।
भाटीन्द्ररायशल्यस्य सुता चम्पावतीरिता॥

॥ ३७ ॥

बाघेलार्जुनसम्भूता भवानीकँवरेत्यपि।
सत्यभामाश्रया सत्यं सत्यभामासमच्छविः॥

॥ ३८ ॥

दुहिताऽचलदत्तस्य वागपास्तामृताऽमृता।
तथा सहस्रदत्तस्य कँवरा लाडपूर्विका॥

॥ ३९ ॥

सुमित्रा चातुरी चित्रा पुत्री विजयपूःपतेः।
वीररावभवा रायकँवरा शीलशालिनी॥

॥ ४० ॥

भाटीन्द्ररायशल्यस्य सुता चम्पावती श्रुता।
वाघेलार्जुनसम्भूता भवानीकँवरेत्यपि॥

॥ ४१ ॥

सत्यभामाश्रया सत्यं सत्यभामा समच्छविः।
राष्ट्रोढराजमल्लस्य सत्यभामाभिधा सुता॥

॥ ४२ ॥

चन्द्रेण रात्रयो यद्वद्रात्रिभिश्चन्द्रमा यथा।
राज्ञा ता रेजिरे रामा रामाभिरपि भूपतिः॥

॥ ४३ ॥

यथा कालं स्वकान्ताभी रममाणो धराधिपः।
उत्पादयितुमारेभे मारेण सदृशः सुतान्॥

॥ ४४ ॥

भागोत्यां भगवद्दासादासन्पञ्च सुताः क्रमात्।
कन्यैका दिव्यसौन्दर्या मनोभावतिकाभिधा॥

।। ४५ ।।

जहाँगीराह्वयो वीरः श्रीमदर्कवरात्मजः।
यस्याः पाणिग्रहं चक्रे नक्रेशध्वजसुन्दरः।।

।। ४६ ।।

वस्तुतस्तु कुमार्येव मनोभावतिका मृता।
नृपस्तस्मै ददौ दासीं सुताप्रतिनिधीकृताम्।।

।। ४७ ।।

जहाँगीरो महावीरो मनोभावतिकाधिया।
जहर्ष प्राप्य तां दासीं दासीकृतनृपोत्करः।।

।। ४८ ।।

भूपतेः पञ्च ये पुत्रास्तेषां नामानि कीर्तये।
मानसिंहोऽजनि ज्येष्ठः सिंहोपमपराक्रमः।।

।। ४९ ।।

यत्कीर्त्या कौमुदीकान्त्या भासितं भुवनोदरम्।
यस्मिन् रेजे महाराजशब्दो दिल्लीश्वराज्ञया।।

।। ५० ।।

मानसिंहानुजो जज्ञे नाम्ना माधवसिंहकः।
भुजाभ्यां यो विजित्य क्ष्मां बुभुजे भूरि वैभवम्।।

।। ५१ ।।

बभासे स यथा भानुर्भानुदुर्गे कृतस्थितिः।
माधाणिनो यतो जाता राज्यार्द्धांशभुजो भृशम्।।

।। ५२ ।।

सूरसिंहो महाबाहुः सूरश्रीर्माधवानुजः।
चन्द्रसेनः सुतो यस्य सूरसिंहोतकाग्रणीः।।

।। ५३ ।।

चन्द्रोदयविलासाख्यो ग्रन्थः सङ्ग्रहमेदुरः।
चन्द्रसिंहाज्ञया वासुदेवेन विदुषा कृतः।।

।। ५४।।
शूरः स सूरसिंहेन्द्रो दिल्ल्यामर्कवराज्ञया।
वासो वेष्मनि स व्यासेऽवात्सीद्भूदेववत्सलः।।
।। ५५।।
अथैकदा तु साहीन्द्रः श्रीमानर्कवरः प्रभुः।
कर्त्तुमाज्ञापयामास वप्रं दिल्ल्याः समन्ततः।।
।। ५६।।
तदुक्ताः शिल्पिनः सद्मान्याबभञ्जुर्महीभुजाम्।
वीक्ष्य वेष्मपुरः सौरं दिल्लीन्द्राय न्यवेदयन्।।
।। ५७।।
आगतं वप्रसूत्रस्य मध्ये सूरगृहं प्रभो।
तदाज्ञापय किं कार्यं सूरः क्रूरोऽद्य वर्तते।।
।। ५८।।
तेषां विज्ञप्तिमाकर्ण्य सावहित्थस्तुरष्कराट्।
निषिसेध स तान्भीतो नीतोपकरणान्स्वयम्।।
।। ५९।।
ततस्ते शिल्पिनः क्षिप्रं वप्रं वक्रं व्यधुर्भिया।
जिजीविषुर्बलवता को विरुद्धयेत बुद्धिमान्।।
।। ६०।।
ततः कालस्य माहात्म्यात्तथा दध्यौ नृपेश्वरः।
वर्णानामत्र विश्वेषां यथा मार्गैकता भवेत्।।
।। ६१।।
अन्यदा तस्य सदसि समायाता नरेश्वराः।
महार्हवस्त्राभरणाः सुधर्मायामिवामराः।।
।। ६२।।
ततस्तानाह दिल्लीन्द्रो ब्राह्मणान् क्षत्रियांस्तथा।
राजपुत्रान् महेश्वासान्महाबलपराक्रमान्।।

।। ६३।।
श्रीमद्वीरवरेन्द्रादीन् टोडरादीन्नृपानपि।
भो भो: प्रत्यङ्मुखैर्यावदस्माभि: क्रियते नति:।।
।। ६४।।
तावत्प्रत्यङ्मुखैरेव भवद्भिरपि गृह्यताम्।
ततस्तद्वचनं श्रुत्वा तेजसा तस्य धर्षिता:।।
।। ६५।।
सर्वे तमोमिति प्रोचु: शिरस्याधाय हस्तकम्।
तथैव चक्रुस्ते सर्वे यदाज्ञप्तं महात्मना।।
।। ६६।।
अथ समागतो वीर: सूरसिंहो महाबल:।
रूपेणाऽप्रतिम: श्रीमान् शम्बरारिरिवापर:।।
।। ६७।।
दाने बलिसम: कृष्णे प्रह्लाद इव सङ्ग्रह:।
तं दृष्ट्वाऽर्कवर: सीम्प्राण्मृगेन्द्रसमविक्रम:।।
।। ६८।।
उवाच प्रीणयन्वाचा मेघनादगभीरया।
सूरसिंह यथैवैते ब्राह्मणा: क्षत्रियास्तथा।।
।। ६९।।
राजानो राजपुत्राश्च हृष्टा: कुर्वन्ति मद्वच:।
तथैव त्वमपि श्रुत्वा कुरुष्व यदि मत्प्रिय:।।
।। ७०।।
महाप्रभोस्तु तां वाचं धर्मस्य परिपन्थिनीम्।
श्रुत्वा मनसि जज्वाल ज्वलनार्कनिभप्रभ:।।
।। ७१।।
जगत्प्रभो जगत्स्वामिन् मद्वच: श्रूयतामिति।
प्रत्यङ्मुखेन हि मया न कर्तव्या नतिर्ननु।।

।। ७२।।

न पूर्वजैर्मे विहिता न करिष्यन्ति चापरे।
तथा नाहं करोम्यद्य देहस्तिष्ठतु यातु वा।।

।। ७३।।

तदा हन्त प्रतिज्ञा मे विपर्येति जगत्पते।
यदाग्निः शीततां धत्ते सिंहः किं च शृगालताम्।।

।। ७४।।

सूरस्य सङ्गरं श्रुत्वा जज्वाल जगतीपतिः।
घृतसिक्तो यथा वह्निः संवर्त्ते धूर्जटिर्यथा।।

।। ७५।।

दृष्ट्वा तं कुपितं सूरश्चक्रवर्तिनमुच्चकैः।
चचाल खड्गमालम्ब्य तत्रस्थांस्तर्जयन्दृशा।।

।। ७६।।

मन्दं मन्दं स निर्गत्य साहीन्द्रसदसो बहिः।
यशः स्वमुच्चकैः शृवण्वन्नाजगाम स्ववाटकम्।।

।। ७७।।

निमग्नां हैन्दवीं सृष्टिं म्लेच्छाब्धावुद्दधार यः।
वक्तुं वीर्याणि कस्तस्य सूरसिंहस्य शक्नुयात्।।

।। ७८।।

सूरसिंहानुजौ कान्हप्रतापावनपत्यकौ।
स्वर्गतौ स्वप्रतापाग्निपतङ्गायितशात्रवौ।।

।। ७९।।

पुनरन्ये सुता राज्ञस्त्रीष्वन्यासु त्रयोऽभवन्।
कुसुमायुधसर्वस्वं कन्यैका कुसुमावती।।

।। ८०।।

जामडोल्यां स्थितस्तेषु वनमालिकदासकः।
ततोऽजायन्त दासोता वनमालिकपूर्वकाः।।

।। ८१।।

चन्द्रभानुस्तथा पृथ्वीदीपः सा कुसुमावती।
त्रीण्यप्येतान्यपत्यानि व्यपद्यन्त विशां पतेः।।

।। ८२।।

भगवद्दासतो दास्यां हरिदासः सुतोऽजनि।
सोऽप्यपुत्रः प्रपेदे स्वर्हरिदास्यप्रभावतः।।

।। ८३।।

अथैकदा स साहीन्द्रो भगवद्दासमादरात्।
न्युङ्क्त युद्धयुक्तिज्ञं गुर्जरे वीरदुर्जरे।।

।। ८४।।

तदुक्तः कच्छपः प्रास्थान्मानसिंहोऽपि पृष्ठतः।
स गच्छन्नाऽऽप चित्तौडदुर्गं चित्तोढविस्मयः।।

।। ८५।।

श्रुत्वा प्रतापसीवर्मा राणेन्द्रः कूर्ममागतम्।
अभ्याजगाम मिलितुं रीतिज्ञो मन्त्रिभिः सह।।

।। ८६।।

कथय जरति का त्वं हैन्दवी सृष्टिराद्या।
नवलयवनसिन्धुप्लावनेनाऽसि मग्ना।।
पथिक न विदितं ते सूरसिंहस्य हंहो।
जयति विजयचंगे बाहुदण्डे तरण्डः।।

।। ८७।।

नाभविष्यद् यदा सूर बाहुदण्डस्तरण्डकः।
अमङ्क्ष्यदेव हिन्दूनां सृष्टिर्म्लेच्छाम्बुधौ तदा।।

।। ८८।।

घट्टितोरःस्थलं स्पर्शहर्षमीलितलोचनम्।
अन्योन्यं कच्छसीसादौ समाश्लिष्य प्रणेमतुः।।

।। ८९।।

प्रीत्या प्रतापसीवर्मा सीसादकुलशेखर:।
न्यमन्त्र्यत्स सामन्तं भगवद्दासभूभुजम्।।

।। ९०।।

भगवद्दासवर्माऽपि स्वीचकार निमन्त्रणम्।
महान्त एव महतां भान्ति प्राघुणिका: परम्।।

।। ९१।।

सामन्तकटकं कर्षन्सद्रत्नकटकच्छवि:।
चित्तोढकटकात्प्राप प्रतापस्य स पस्त्यकम्।।

।। ९२।।

प्रविश्य सौधमुत्तुङ्गं प्रतापस्य प्रतापवान्।
आवां सहैव भोक्ष्याव: प्रतापमिति सोऽब्रवीत्।।

।। ९३।।

आहूत: सादरं तत्र भगवद्दासभूभृता।
प्रतापो व्यञ्जितानर्थं किञ्चिदित्थमुवाच ह।।

।। ९४।।

भवद्भि: प्रथमं तत्रभवद्भिरिह भुज्यताम्।
महत्सम्बन्धतो यूयं महान्त: सम्मता मम।।

।। ९५।।

तत्याज तद्वच: श्रुत्वा राजा कूर्मकुलेश्वर:।
आ: स्मृतं भो व्रतं मेऽद्य जल्पन्निति स जेमनम्।।

।। ९६।।

निशम्य तर्कजं क्षोभं क्षोणीन्द्रो धैर्यसागर:।
हसन्नुवाच दन्तांशुकौमुदीर्विकिरन्पुर:।।

।। ९७।।

एष्यति श्व: कुमारो मे मानसिंहो महामहा:।
तदग्रे जातु मा ब्रूया यन्मां प्रयुक्तवानसि।।

।। ९८।।
यत: स प्रकृतौ तीक्ष्णोऽभीक्ष्णमाहवदीक्षित:।
शिक्षयामि ततो राजन्यथा फलमाप्स्यसि।।
।। ९९।।
इति संशिक्ष्य तं सज्ज: स गर्जन्गुर्जरान्प्रति।
दर्शं दर्शं ययौ भिल्लीर्दिल्लीपतिहिते रत:।।
।। १००।।
दूरमुल्लङ्घ्य पन्थानं मन्थाचलनिभैरिभै:।
गुर्जराञ्जरजरीकुर्वन्नर्जयां जयमास स:।।
।। १०१।।
श्रीमान्पुनरितो हंहो मानसिंहो महामना:।
समीयायोदयपुरं पुरन्दरपराक्रम:।।
।। १०२।।
आकारित: प्रतापेन प्रतापजितपावक:।
ययावभीरिभं पश्यन्परसादं नृपात्मज:।।
।। १०३।।
इभ: प्रेक्ष्य कुमारेभं कुमारेभोऽपि तं पुर:।
उभौ द्राग्गण्डसंघट्टं जघटाते परस्परम्।।
।। १०४।।
एतस्मिन्नन्तरे यन्ता मानकुम्भीन्द्रकुम्भत:।
उत्पपात प्रतापस्य परसादाभिधे द्विपे।।
।। १०५।।
ततस्तमङ्कुशैर्भल्लैर्विधाय रुधिरोद्गिरम्।
मृतप्रायमिव ज्ञात्वा मोचयामास साहसी।।
।। १०६।।
प्रतापदत्तहस्तोऽसौ समासाद्यत्तदालयम्।
स जेमनाय सामन्तान्कारयामास मण्डलीम्।।

।। १०७।।
तत्रैव चैकतो दूरे मृगया कुक्कुरानपि।
आनाय्य स्थापयामास श्वपचाकृष्टशृङ्खलान्।।
।। १०८।।
स्वर्णद्रोणीषु सूदेन्द्रैः पायसे परिवेषिते।
भोक्तुमह्वास्त सीसादं मानसिंहो दुराग्रही।।
।। १०९।।
ततः प्रतापसीवर्मा हसन्वक्रोक्तियुक्तिभिः।
अजीर्णार्तिमिषाद् धूर्तो न स्वीचक्रे सहाशनम्।।
।। ११०।।
नभोजनसमानश्रीर्मानसिंहोऽपि भो जनाः!।
भोजनं सारमेयेभ्यो भोजयामास रोषतः।।
।। १११।।
उन्मुक्तशृङ्खलाः श्वानः श्वपचैः पायसादि तत्।
लिलिहुर्घुर्घुरारावनिनादितमहानसाः।।
।। ११२।।
प्रतापे पश्यति श्वभ्यो दापयित्वेति पायसम्।
उदतिष्ठदलं मानी मानो लोहितलोचनः।।
।। ११३।।
रोषपोषवशाद्बद्धभुकुटिर्माधवाग्रजः।
खड्गमुष्टौ दधन्मुष्टिं स्पष्टमित्थमुवाच तम्।।
।। ११४।।
भो भोः शृणुष्व सीसाद निर्जित्य लघु गुर्जरान्।
प्रत्यावृत्य निहन्तास्मि मेवाडविषपं तव।।
।। ११५।।
इत्युच्चैः स प्रतिज्ञाय सन्नाह्य प्रबलं बलम्।
पर्वतानर्वतां टापैः खर्वयन्गुर्जरानगात्।।

।। ११६।।
गुर्जरान्राज्ञि कुर्वाणे हत्वाऽऽजौ निर्जरातिथीन्।
मानोऽप्यमानदोर्दण्डप्रचण्डः प्राप पृष्ठतः।।
।। ११७।।
मानेन रञ्जितो राजा गञ्जयित्वाशु गुर्जरान्।
कार्यशेषं निवेद्याऽस्मै दिल्लीं प्रत्याययौ शनैः।।
।। ११८।।
मानसिंहोऽपि निर्वर्त्य जयं गुर्जरनीवृति।
न्यवर्तत ततस्तूर्णं ततकीर्तिः समन्ततः।।
।। ११९।।
मानमाननया जायमानशङ्काकुलाकुलः।
सज्जः प्रतापसीवर्मा महूसीम्नि व्यवस्थितः।।
।। १२०।।
आगच्छत् सह सामन्तैः सहसा कूर्मनन्दनः।
महूवप्रान्तरे रुद्धो मेवाडक्षितिजानिना।।
।। १२१।।
प्रांशुवप्रस्थितैस्तत्र सीसादै रुद्धपद्धतिः।
अयुद्धयत भृशं क्रुद्धः कुध्रकुक्षिवलद्बलः।।
।। १२२।।
रुध्वा पद्धतिमद्धा ते सीसादाः शितसायकैः।
मानसिंहस्य सैन्यानि निजघ्नुः स्थगिताः स्नुषु।।
।। १२३।।
मार्गम्लानशरीरोऽपि शरी रोपितकार्मुकः।
कदनं कर्तुमारेभे सदनं सर्तुमुत्सुकः।।
।। १२४।।
उदञ्च्य चर्मचक्राणि खड्गानाकृष्य कोषतः।
विघट्टयितुमाघाटं प्रयतन्ते स्म कच्छपाः।।

।। १२५।।

क्व ते सोऽर्कवरो बन्धुः क्वते भ्राता स माधवः।
इत्याक्षिप्य शरैर्मानं सीसादाः समवाकिरन्।।

।। १२६।।

एतस्मिन्नन्तरे श्रीमान्माधवो माधवोपमः।
कुतश्चिच्छ्रुतवृत्तान्तो मानमानेतुमागतः।।

।। १२७।।

शूरसेनोद्धवश्लाघी स्फूर्जत्प्रौढसुदर्शनः।
अलं प्रद्युम्नविच्छित्तिरग्रजं प्राप माधवः।।

।। १२८।।

अनाहतोऽप्येष तवाद्य दुन्दुभि-
र्ध्वनन्निहोपागतमाह माधवम्।
इति स्फुटं दौन्दुभिकेन वेदितः
स मानसिंहो मुदमानशे मृधे।।

।। १२९।।

अगाधरंहा द्रुतमेत्य माधवो
महासिमुद्यम्य परान्विपाटयन्।
प्रसह्य सीसादनिरुद्धनिर्गमं
वली तदाघाटपथं व्यघट्टयत्।।

।। १३०।।

अलं ज्वलत्खड्गघटाझलत्कृतिः
क्षतस्रवच्छोणितसिक्तपद्धतिः।
समुच्छलत्कच्छविमुक्तहुङ्कृतिः
प्रचण्डतां प्राप समिच्चमत्कृतिः।।

।। १३१।।

मानोऽपि माधवसखस्तपनप्रतापः
संताप्य भूपमिति तं समिति प्रतापम्।

मेवाडदेशवलयं वलयन्त्रणाभी
रुध्वा ध्वनद्विजयदुन्दुभिरुल्लुलुण्ठ।।

।। १३२।।

इति चिरयति श्रीमान्माने महार्कवराज्ञया
नृपतिर्भगवद्दासो भासो नितद्युमणिद्युतिः।
रणभरसहोऽरं लाहोरं प्रति प्रययौ बली
न हि परवतां हा विश्रामक्षणः क्षणमप्यहो।।

।। १३३।।

अथ स भगवद्दासो राजा प्रजाः प्रतिपालय-
ञ्छरशशिसमाः किं च श्रामान्दशद्वयहमास्थितः।
रसयुगरसक्ष्माब्दे मार्गे सिते दिनकृत्तिथा-
वतिथिरभवद्वीरो वैरिद्विपौघहरिर्हरेः।।

।। १३४।।

गतवति दिवं ताते ख्याते दिशासु विशां पतिः
समिति स महामानो मानं निहत्य विरोधिना।
तरलतुरगैस्तूर्णं पूर्णोत्सुकप्रकृतिः कृती
गुणगणकृतालम्बामम्बावतीं पुरमाविशत्।।

।। १३५।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे सप्तमसर्गस्य सर्गोऽभूत्।।**

***

## अष्टमः सर्गः

।। १।।

चक्रुः श्रीमानसिंहस्य सिंहासनमुपेयुषः।
राज्याभिषेकसंस्कारं यथाविधि पुरोधसः।।

।। २।।

तुङ्गपीठप्रतिष्ठोऽसौ जनताभिर्नमस्कृतः।
पूर्वाद्रिशिखरारूढो भासां निधिरिवाऽऽबभौ।।

।। ३।।

उत्सङ्गविस्फुरत्खड्गाः सामन्ता माधवादयः।
उपोपविष्टास्तं भेजुर्देवा जम्भजितं यथा।।

।। ४।।

तत्क्षणं तस्य सदसि सदसि ध्वस्तविद्विषः।
सनूपुरझणत्कारं नर्तक्यो ननृतुर्नवाः।।

।। ५।।

दानलज्जितसन्तानो मानो मानधनाग्रणीः।
अमानमहसोत्तानवितानं तिरयन्बभौ।।

।। ६।।

अर्कविस्फूर्त्तिरर्कांशः श्रीमदर्कवरादृतः।
स तर्कातीतसम्पत्तिः सम्पर्कं प्राप पण्डितैः।।

।। ७।।

इन्दुर्हिन्दुसमाजस्य कस्तूरीबिन्दुभालकः।
उदयं कलयामास स कलाः सकला दधत्।।

।। ८।।

प्रभावो मानसिंहस्य मम वाचां न गोचरः।
भयोज्झितोऽपि यो राज्ये राजते स्म भयाऽन्वितः।।

।। ९।।

हास्येऽपि नाब्रवीद्वाग्मी मानो मिथ्या वचः खलु।
अस्तु हृद्यमहृद्यं वा मा नो मिथ्या वचः खलु।।

।। १०।।

विना कवीश्वरं दिल्लीश्वरं वा जगदीश्वरम्।
ननाम मानसिंहस्य मानोदग्रं न मस्तकम्।।

।। ११।।

जितमाकाबिलं येन येन धौतोऽम्बुधावसिः।
येन प्रापि शिलादेवी स मानः कैर्न वर्ण्यते।।

।। १२।।

ललदुल्लोलदुल्लोललीलालङ्घितसागरः।
अखानि मानसिंहेन महीयान्मानसागरः।।

।। १३।।

रेजिरे मानराजस्य चतुर्विंशतिरङ्गनाः।
यथावदभिधास्तासामभिधातुमथारभे।

।। १४।।

राठोडरत्नदुहिता महिषी मानवर्मणः।
कनकाचलविस्पर्द्धिवक्षोजा कनकावती।।

।। १५।।

संसेव्य मानसिंहं या जगत्सिंहमजीजनत्।
ऊर्जोज्ज्वलप्रतिपदीष्वक्षिषड्विधुवत्सरे।।

।। १६।।

सीमा सौभाग्यभाग्यानां रूपविस्मारितस्मरः।
ववृधे युद्धविद्यासु जगत्सिंहो जगच्छ्रुतः।।

।। १७।।

अपि द्वादशवर्षीयो यो दिल्लीवल्लभाज्ञया।
खानजादाभिधं वीरं जिगाय युधि लीलया।।

।। १८।।
कुमारस्याऽप्यहो यस्य कुमारसमतेजसः।
वीर्यमर्कवरो वीक्ष्य तुतोष तुषितोपमः।।
।। १९।।
यस्मै श्रीरायजादेति वितीर्य पदवीं पराम्।
ददौ नैजं नवं नागं नागोरनगरं च सः।।
।। २०।।
नेत्रान्तसूत्रितारुण्यस्तारुण्यस्तिमितच्छविः।
राजकन्याः स जग्राह ग्राहध्वजदशो दश।।
।। २१।।
तासु तस्मादजायन्त सनयास्तनयास्त्रयः।
महासिंहो जुझारश्च ततारोऽपि तृतीयकः।।
।। २२।।
चतस्रः कन्यकास्तत्र मृतास्तिस्रः कुमारिकाः।
याऽवशिष्टा कनिष्ठा सा श्यामादिकुँवरा स्मृता।।
।। २३।।
अवराऽपि वरा श्यामकुँवरा रूपसम्पदा।
सीसादहररामेण परिणीता यथाविधि।।
।। २४।।
केचिदाहुर्जगत्सिंहाज्जज्ञिरे पञ्चकन्यकाः।
तासां मध्येऽवशिष्टे द्वे शेषास्तिस्रो विपेदिरे।।
।। २५।।
तयोर्ज्येष्ठा तु या कोककुँवरा लोकमोहिनी।
सा हि साहितुरासाहं वाग्मी नाहमतः परम्।
।। २६।।
धृत्वाऽसिं हो जगत्सिंहो वनसिंहान्विपाटयन्।
अम्बावतीपरिसरं परं करिसरं व्यधात्।।

।। २७।।
कुमारशब्दभागेव जगत्सिंहो व्यपद्यत।
प्राय: पुरुषरत्नानि द्रष्टुं न क्षमते विधि:।।
।। २८।।
जज्वलुर्ज्वलने पञ्चजगत्सिंहमनुस्त्रिय:।
त्यजन्त्यसून्सुखं वह्नौ पतिं न तु पतिव्रता:।।
।। २९।।
यन्नाम्ना कनकावत्या सुमेरुशिखरोन्नति:।
जगच्छिरोमणेरुच्चै: प्रासाद: किल कारित:।।
।। ३०।।
महासिंहस्य महतोऽभूवन्नैकादशस्त्रिय:।
तथैका काप्यहो दासी सदा शीलसमुज्ज्वला।।
।। ३१।।
तत्र चोदयसिंहस्य पौत्री सीसादगोत्रजा।
जयसिंहं सुतं लेभे दीपप्राक्कुँवरां सुताम्।।
।। ३२।।
शुचे: कृष्णप्रतिपदि वसुषट्षड्धराब्दके।
जयसिंहस्य जननं जननन्दथवेऽभवत्।।
।। ३३।।
ज्येष्ठायां मिथुने लग्ने योगे सिद्धौ भृगावयम्।
त्रिषु दण्डेषु मार्तण्डोदयात्खाक्षिपलेष्वभूत्।।
।। ३४।।
तनौ तमो धनेऽङ्गारगुरू केतुविधू मदे।
मन्दो झौम्भो भृगुं लेभे व्यये ज्ञे नौ ग्रहा: शिशो:।।
।। ३५।।
मानसिंहाज्जगत्सिंहो महासिंहस्ततो महान्।
जयसिंहो महासिंहादहोसिंहपरम्परा।।

।। ३६।।
अजनिष्ट तथा दास्यां पुत्रो मोहनदासक:।
ततोऽपि जज्ञिरे पुत्राश्चत्वारश्चतुरा: परम्।।
।। ३७।।
ते यथा रामचन्द्राख्यो द्वारिकादास इत्यपि।
नृसिंहदासो गोपालदासश्चत्वार आख्यया।।
।। ३८।।
तत्र गोपालदासस्य तनुजोऽतनुविक्रम:।
उत्सवप्रसवे तस्थौ वसवे वसुसम्भृते।।
।। ३९।।
अदायि दीपकुँवरा दीपकद्युतिरुच्चकै:।
राष्ट्रोढाऽमरसिंहाय सिंहायतमहौजसे।।
।। ४०।।
जयसिंहं तु जननी बालं व्याहतिशङ्कया।
आदाय विगलत्तन्द्रा द्यौसामध्यवसच्चिरम्।।
।। ४१।।
दक्षिणस्यां महासिंहो हतो बालापुराहवे।
वह्नौ विविशुरस्यानुदारा दारा दशाऽऽदरात्।।
।। ४२।।
बङ्गसान्त:समित्सङ्गी जुझारोऽपि जहावसून्।
अपरावर्त्तिनामाजौ जय: किं वा तनुव्यय:।।
।। ४३।।
जुझारस्य त्रय: पुत्रा ज्येष्ठ: संग्रामसिंहक:।
राज्यं य: कल्पयामास झलायपुटभेदने।।
।। ४४।।
पृथ्वीसिंहो द्वितीयो य: सोऽप्यस्थात्खिरणीपुरे।
तृतीयोऽनूपसिंहस्तु सुनारपुरसंस्थित:।।

।। ४५।।

अहो लाहोरकलहे किल हेति हतारिणा।
तृणवत्तनुरत्याजि ततारेण तरस्विना।।

।। ४६।।

एवमेषा यथासारं विचित्रविषया मया।
संक्षेपेण जगत्सिंहोतकानां कथिता कथा।।

।। ४७।।

द्वितीया मानसिंहस्य जाया जाम्बुमती मता।
हिम्मतं कुशलं चापि सुषुवे सा सुतावुभौ।।

।। ४८।।

हिम्मतस्य गुणैः सर्वसम्मतस्य महामतेः।
न काचित्संततिर्जज्ञे निर्दिशाम्यहमत्र याम्।।

।। ४९।।

तृतीया भूपतेर्भार्याऽभूद्रामकुँवराभिधा।
हम्बीरसेनतनया या श्रुता खीचणान्वया।।

।। ५०।।

अभूतां द्वे सुते अस्यां मानसिंहमहीशितुः।
याभ्यां स्वरूपतो मोमे जिते नो मेऽत्र संशयः।।

।। ५१।।

ज्यायसी रूपकुँवरा प्रवरा चातुरीषु या।
अदायि हड्डुगोत्राय हरनारायणाय सा।।

।। ५२।।

कनिष्ठा नाम बदनाकुँवरा कूर्मभूभुजा।
मेडतान्वयराष्ट्रोढबाहुजाय विवाहिता।।

।। ५३।।

बङ्गेन्द्रकृष्णराजस्य दुहिता विहितादरा।
राज्ञो भूरिमनोभावा मनोभावाभिधा वधूः।।

।। ५४।।

महिषी कापि राष्ट्रोढबाजराजकुमारिका।
सोलङ्खिजयलालोत्था चन्द्रादिकुँवराऽप्यभूत्।।

।। ५५।।

कटोचदा परादेवी विन्दुचन्द्रकुमारिका।
तथान्या प्रेयसी राज्ञो रामचन्द्रसुताऽच्छदा।।

।। ५६।।

गोडेन्द्ररायमल्लस्य सुता राज्ञीसहोदरा।
ज्वलत्तनूनपात्कल्पांस्त्रींस्तनूजानसूषुवत्।।

।। ५७।।

व्याख्याम्याख्याः क्रमात्तेषां ज्येष्ठो दुर्जनसिंहकः।
आसन्दुर्जनसिंहोता यस्माद्दोधीपुरस्थितेः।।

।। ५८।।

द्वितीयो नाम सबलो बसवं निर्ममे पुरम्।
छप्पराघाटसम्मर्दे यो वीरो वैरिभिर्हतः।।

।। ५९।।

तृतीयो भावसिंहोऽभूद्वीरभावप्रतिष्ठितः।
मानादनन्तरं यस्य राज्याप्तिर्वर्णयिष्यते।।

।। ६०।।

खाग्निषट्सोमशरदि भावसिंहोद्भवः श्रुतः।
सुतोऽस्य बदरीसिंहः सुतेन्द्रकुँवराभिधा।।

।। ६१।।

हा हन्त बदरीसिंहः कुमारो मारमञ्जुलः।
विषमैरामयैर्ग्रस्तो सीदति स्म मया श्रुतम्।।

।। ६२।।

ऊढा राष्ट्रोढराजेन राष्ट्रोढसितकीर्तिना।
गजसिंहाह्वयेनेन्द्रकुँवरा भावसम्भवा।।

।। ६३।।
आसीदासमती राज्ञीमहोराजकुमारिका।
तथैव श्यामकँवरा चित्रसेनसुता परा।।

।। ६४।।
असूत श्यामकँवरा श्यामसिंहाह्वमात्मजम्।
शक्तिस्त्रिसाधनोदग्रा कोशजातमिवाक्षयम्।।

।। ६५।।
भवराजभवा भर्त्तुर्भुवो भार्या बभूव भोः।
नवोन्निद्रवयोवल्गन्मदना मदनावती।।

।। ६६।।
कान्ता कोच्छकुला कच्छसुत्राम्णो लच्छभावती।
यस्याः केशवदासातिबलावतिबलौ सुतौ।।

।। ६७।।
चन्द्रसेनसुता चन्द्रमुखीजादमवंशजा।
पुष्पकेतो रतिरिव राज्ञो राज्ञी तिलोकदा।।

।। ६८।।
देवीदेवस्य रसदा श्रीबनारसदाऽप्यभूत्।
लेभे कल्याणदासं या पुत्रं कल्याणकारिणम्।।

।। ६९।।
चन्द्रलायी पुरस्थायी कल्याणो भूपतेः सुतः।
यतः कल्याणसिंहोताः कच्छाः कल्याणमूर्त्तयः।।

।। ७०।।
ब्रूमहे काञ्चन स्फूर्जत्काञ्चनप्रतिमप्रभाम्।
प्रमदां भूप्रभोर्भूरिप्रमदां परतापदाम्।।

।। ७१।।
गोडगोत्रोद्भवा गोत्रापुरुहूतस्य वल्लभा।
द्वे सुते प्राप मदनावती भक्तावरीति च।।

।। ७२।।
मदनावतिकाभक्तावर्यौ तर्यौ स्मराम्बुधेः।
श्रीबाघकर्मसेनाभ्यां परिणीते यथाक्रमम्।।
।। ७३।।
वटगुर्जरबाघस्य कन्या हम्बीरदाह्वया।
आसीदसीमसौन्दर्या महिषी मानवर्मणः।।
।। ७४।।
हम्बीरदायामुत्पन्ना या रामकुँवरा सुता।
दत्ता देवेन विधिवद्धड्डुनारायणाय सा।।
।। ७५।।
कामिनी मानसिंहस्य कामनीति विचक्षणा।
रराज राजकुँवरा चाहमानबलात्मजा।।
।। ७६।।
राष्ट्रोढवंशविख्याता ललना मानवर्मणः।
सुमित्रा चित्रविच्छित्तिरासीदीश्वरदासजा।।
।। ७७।।
मानसिंहात्सुमित्रायामात्मजौ द्वौ बभूवतुः।
प्रथमः शक्तिसिंहाह्वः फतेसिंहो द्वितीयकः।।
।। ७८।।
शक्तिसिंहो महाशक्तिस्तिष्ठति स्म पहाडके।
मानसिंहोतकानां यो निदानमभवत्परम्।।
।। ७९।।
प्रभावती प्रभोरासीद्देवी दिव्यप्रभावती।
कर्पूरचन्द्रजा चञ्चद्रत्ना रत्नावती तथा।।
।। ८०।।
राज्ञो राज्ञी स्फुरद्रत्नमालिका रत्नमालिका।
तथैव कापि पूर्णेन्दुवदना मदनावती।।

।। ८१ ।।
एवमेताभिरुर्वीन्द्रो राजकन्याभिरन्वितः।
विजहार यथाकामं करिणीभिः करी यथा।।
।। ८२ ।।
अथैकदा समाहूय साहीन्द्रो मानभूपतिम्।
योजयामास दिग्जैत्रयात्रासु परमादरात्।।
।। ८३ ।।
संनद्धसैन्यसन्मानो मानो राजा जिगीषया।
प्रातिष्ठत प्रतिष्ठावान्हरिप्रस्थहरेर्गिरा।।
।। ८४ ।।
मतङ्गजमदासारैरश्वटापोद्धतं रजः।
रजःपूतभटश्लाघी शमयन्समयान्नृपः।।
।। ८५ ।।
प्रयाणे मानवीरस्य प्रचेलुरचला अपि।
किं च स्थिरापि समभूदस्थिरा बलवल्गनैः।।
।। ८६ ।।
खीचाधिराजमुद्रिक्तं कृत्वा मुद्रिक्तमाहवे।
तन्नीवृति नृपः प्रोच्चैर्जयस्तम्भमरोपयत्।।
।। ८७ ।।
नृपो निर्जित्य सामन्तघटाभिरुमटादिकान्।
सम्पराये द्विषत्कालानलोज्झालाननीनमत्।।
।। ८८ ।।
परा ये सम्पराये तान्पराजित्य पराक्रमात्।
निर्मथ्य मालवं राज्ञा मालवोऽपि न शेषितः।।
।। ८९ ।।
मानो मालवमाक्रम्य लब्धमानोन्नतिः पुनः।
दिल्लीवल्लभमापृच्छ्य काबिलं जेतुमुद्ययौ।।

॥ ९०॥

सन्नाहसिंहनादेन व्याकुलीकृतशात्रवा।
चलतोऽनुचचालाऽस्य चमूश्चण्डचमत्कृतिः॥

॥ ९१॥

स गत्वा काबिलं सैन्यरजःशङ्काविलं बली।
द्राक् क्षाममध्वतः सैन्यं द्राक्षाभूमिष्ववासयत्॥

॥ ९२॥

कोपतस्तोपयन्त्राणि पुरस्कृत्य मदोत्कटाः।
योद्धुमारेभिरे दूरात्पारसीकचमूभटाः॥

॥ ९३॥

तोपाटोपपतद्गोलाघातोड्डीनमतङ्गजा।
सञ्चुकोच हतोत्साहा मानसिंहपताकिनी॥

॥ ९४॥

अपूर्त्त एव संग्रामे दिवसे पूर्त्तिमीयुषि।
सान्द्रा तमस्तमस्तोमैरुपावर्तत तामसी॥

॥ ९५॥

वर्वर्ति स्म वशेयस्य सर्वा प्राची मनस्विनः।
असमानमहामानः पठानमसमानकम्॥

॥ ९६॥

मानो मत्वा मृधे म्लेच्छान्दुर्जयान्निर्जरैरपि।
कल्याणकारिणीं काञ्चित्कल्पयामास कल्पनाम्॥

॥ ९७॥

आनाय्य महिषांस्तेषां बद्ध्वा मूर्द्धसु दीपिकाः।
कालयामास कालज्ञः शत्रूनुद्दिश्य सर्वशः॥

॥ ९८॥

द्विषामभिमुखीकृत्य लुलायानिति पार्थिवः।
रणात्तिर्यगपावृत्य पृष्ठतः पुनरापतत्॥

।। ९९।।

कल्पपावककल्पोऽसौ कल्पयन्व्यूहमर्वताम्।
चुकूर्दम्लेच्छवृन्देषु श्येनो यद्वत्पतत्रिषु।।

।। १००।।

तरवारिस्ततोऽन्योन्यं चचाल चपलोज्ज्वला।
क्षणेन सा रणक्षोणी बभूव क्षतजोक्षिता।।

।। १०१।।

सङ्ग्रामसीम्नि यवना जवनाः पवनादपि।
निपेतुः खड्गट्ठणितिरणितच्छिन्नमस्तकाः।।

।। १०२।।

उष्णीषचषकं मुण्डफलाढ्यं रुधिरासवम्।
बभावायोधनक्षेत्रं मृत्योः पानस्थलं यथा।।

।। १०३।।

एवं निहत्य यवनानवनीपाकशासनः।
अनाविलयशःस्फूर्त्तिः काबिलादग्रहीत्करम्।।

।। १०४।।

जित्वेति पश्चिमामाशां साहीन्द्रानुमतः पुनः।
पूर्वां कूर्मकुलोत्तंसो जेतुमारभत क्रमात्।।

।। १०५।।

गजनीपुरनीलोदप्रभृतिप्रभृतायुधः ।
वशयित्वा महः पारावारो वाराणसीं ययौ।

।। १०६।।

बाणवारावृतो बाणैर्जित्वा वाराणसीपतिम्।
भागीरथीतटे मानो निर्ममे मानमन्दिरम्।।

।। १०७।।

तत्र विश्वेश्वरं दृष्ट्वा विश्वविख्यातवैभवः।
मणिकर्ण्यामुपस्पृश्य ददौ दानानि पार्थिवः।।

।। १०८।।
अथो पपाट पटणापुरं कमठपुङ्गवः।
तत्रापि सिद्धिमापेदे सम्परायप्रसङ्गतः।।
।। १०९।।
वैकुण्ठपुरनामानं वैकुण्ठादपि सुन्दरम्।
निकायं कल्पयामास तत्र क्षत्रपुरन्दरः।।
।। ११०।।
रयस्मयैर्हयैर्गत्वा गयां वेगादयान्वितः।
चक्रे श्राद्धानि पूर्वेषां श्रद्धालुः पृथिवीपतिः।।
।। १११।।
ततो ययौ नृपो जेतुमसमानपठानकम्।
जित्वा तद्राज्यमावर्ज्य जगदीशं ददर्श सः।।
।। ११२।।
जगतीशः प्रतिष्ठाप्य जगदीशं यथाविधि।
व्यधादभीरुरुमरमीरुप्रभृतिकान्वशे ।।
।। ११३।।
मानप्रस्थानमाकर्ण्य कम्पमानः पठानराट्।
भिया ययावकूपारपारमीसनखाँभिधः।।
।। ११४।।
पौरस्त्यविषयानित्थमाक्रामन्क्रमकोविदः।
ब्रह्मपुत्रं प्रतिप्रास्थात्प्रस्थप्रख्यैर्द्विपैर्नृपः।।
।। ११५।।
तत्र प्रतापदीपेन्द्रो दुर्गदुर्गमवैभवः।
उत्तस्थौ मानसिंहेन योद्धुं मानधनाग्रणीः।।
।। ११६।।
प्रवृत्ते वीरसंहारे सम्प्रहारे परस्परम्।
प्राप प्रतापदीपो द्राक् त्रयोदशशतैरिभैः।।

।। ११७।।

गर्जता मानसिंहेन दंष्ट्रापितमहासिना।
द्विपाः प्रतापदीपस्य क्षणाज्जग्रसिरे युधि।।

।। ११८।।

करवालकरास्तत्ररणरङ्गधरा नटाः।
सम्मर्दे करिणामस्रकर्दमे च स्खलुर्भटाः।।

।। ११९।।

श्रीमान्दुर्जनसिंहो यो मानसिंहस्य शावकः।
प्रतापदीपपारीन्द्राञ्जघान घनहुङ्कृतिः।।

।। १२०।।

गण्डस्थलस्खलद्दानधाराप्लावितरेणवः।
तदीयकुन्तकृत्ताङ्गा व्यचेष्टन्त करेणवः।।

।। १२१।।

मानसिंहस्य नासीरवीरो दुर्जनसिंहकः।
सहस्रशो द्विषो हत्वा निपपात व्यसुः क्षितौ।।

।। १२२।।

पुरो निपतितं दृष्ट्वा पुत्रं दुर्जनसिंहकम्।
जज्वाल हविषेवाग्निर्मानसिंहनृपः क्रुधा।।

।। १२३।।

मानसिंहस्य संरम्भदुर्निरीक्ष्याकृतेः परैः।
पुनः प्रववृते युद्धं दन्तादन्ति तलातलि।

।। १२४।।

उन्मूलयन्द्विषवृक्षांस्तरस्वी मानमारुतः।
प्रतापदीपमाहत्य दुर्गे तस्य ससार ह।।

।। १२५।।

राज्ञा प्रतापदीपेन्द्रे दशामन्त्यामवापिते।
शेषतद्बन्धुचित्तेषु प्रावर्त्तततमान्तमः।।

।। १२६।।

इति प्रतापदीपं स निर्वाप्य कमठप्रभु:।
महसामेककेदारं केदारं नृपमासदत्।।

।। १२७।।

केदारराज्यसीमान्तशालिकेदारभूमिषु।
बलं निवेशयामास कूर्म: क्लान्तहयद्विपम्।।

।। १२८।।

विनीतमार्गखेदत्वादाप्यायितबलो बली।
आदिदेश स सामन्तान्योद्धुं केदारभूभृता।।

।। १२९।।

ते द्राक् तमोमिति प्रोच्य करौ सन्नीय तत्पुर:।
प्रभावं वर्णयामासु: केदारस्य विलक्षणम्।।

।। १३०।।

श्रुतमस्माभिरस्यास्ते गृहे शक्ति: शिलामयी।
राजन् रणे तया गुप्तो न पराजीयते परै:।।

।। १३१।।

तदत्र प्रतिकर्त्तव्यं विचारयत साम्प्रतम्।
अन्यथा नैव जेष्यामोऽस्याऽमोघं मन्महे मह:।।

।। १३२।।

एवं विज्ञापितो राजा बाहुजैर्बाहुशालिभि:।
भक्त्या शिलामयीं देवीमुपतस्थे स्तवैर्निशि।।

।। १३३।।

उच्चावचै: स्तवै: स्तुत्वा देवीं देव: शिलामयीम्।
सुष्वाप प्रयत: पृथ्व्यां कुशशय्यायुजि क्षणम्।।

।। १३४।।

स्वप्ने शिलामयी माया देवदायादजित्वरा।
मानं सम्मानयामास भक्तभद्रकृतत्वरा।।

।। १३५।।
इतः पुनर्निकायस्थः कायस्थकुलजो नृपः।
शिलामयीं समानर्च महाराजजिगीषया।।
।। १३६।।
तदानीं तत्र तन्वन्ती तदीयतनयातनुम्।
अर्चां विघट्टयामास महामाया शिलामयी।।
।। १३७।।
तां मत्वा स्वां सुतां दुष्टो दुष्टाऽसीति विगर्हयन्।
निषिषेध प्रसह्य त्रिस्त्वमितोऽपसरेति सः।।
।। १३८।।
इति निर्भर्त्सिता व्याजतनुजा व्याजहार तम्।
स्नपयन्ती स्मितज्योत्स्नासुधाभिर्वसुधां पुरः।।
।। १३९।।
स्मरस्यदः प्रतिज्ञातं यन्मया त्वत्पुरः पुरा।
वक्तासि त्रिःप्रयाहीति त्यक्ष्यामि त्वां ध्रुवं तदा।।
।। १४०।।
तद्गच्छामि पलायस्व यदि जीवितुमिच्छसि।
इत्यादिश्य वपुस्थेन्द्रं तिरोधात्सा शिलामयी।।
।। १४१।।
देव्यामन्तर्हितायां स केदारः क्रोधमूर्च्छितः।
शिलामयीं शिलाबुद्ध्या मज्जयामास सागरे।।
।। १४२।।
अन्येद्युः कमठेन्द्रस्य युद्धोद्योगं निषम्य सः।
समुद्रवर्त्मना भीतो नावा क्वापि पलायत।।
।। १४३।।
कन्यां तस्य पुरस्कृत्य धन्यां रूपेण मन्त्रिणः।
अभिमानं त्यजन्तो द्रागभिमानं समभ्ययुः।।

।। १४४।।
प्रविश्य कच्छकटकं ते बद्धाञ्जलिसम्पुटाः।
विजिज्ञपुः शनैरम्बावतीनगरनायकम्।।
।। १४५।।
सन्धानमिच्छुः कच्छेन्द्र त्वया केदारपार्थिवः।
उपढौकयति प्रह्वः स्वात्मजां तद्गृहाण भोः।।
।। १४६।।
पिञ्जरीकृतवक्षोजां कुङ्कुमैः किन्नरीस्वनाम्।
किं करीन्द्रगतिं नैनां किङ्करीकुरुषे प्रभो।।
।। १४७।।
इत्थमभ्यर्थितो देवो मुमुदे स मुहुर्मुहुः।
अप्रत्नं प्रमदारत्नं धत्ते कस्य न सम्मदम्।।
।। १४८।।
समानयत केदारमित्यादिश्य सतान्स्वयम्।
शिलामयीं नमस्कुर्वन्निदद्रौ प्रयतो नृपः।।
।। १४९।।
त्रिशूलशालिनीमुण्डमालिनीभक्तपालिनी।
उवाच मानमानन्दमयी स्वप्ने शिलामयी।।
।। १५०।।
भावेन ते प्रसन्नाऽहं सन्नाहङ्कृतयो द्विषः।
मग्नामप्रतिमां सिन्धौ प्रतिमां मे समुद्धर।।
।। १५१।।
कूर्मेन्द्र त्वत्कुले यावल्लप्स्ये नित्यमजं बलिम्।
तावत्स्थास्यामि ते राज्ये सत्यं विद्धि वचो मम।।
।। १५२।।
इत्थमम्बावतीनाथं जगदम्बा शिलामयी।
साग्रहं साऽनुजग्राह भाववश्या हि देवताः।।

।। १५३।।
प्रातः प्रोत्थाय देवो द्रागुधृत्याब्धेः शिलामयीम्।
न्ययुंक्त पूजने तस्या बङ्गान्ब्राह्मणसत्तमान्।।
।। १५४।।
वार्द्धिद्वीपादथाहूतो दूतैर्योगचिकीर्षया।
दारैः सम्मन्त्र्य केदारो ददौ राज्ञे स्वदारिकाम्।।
।। १५५।।
एवं विवाहितोदारदारः केदारसत्कृतः।
शिलामयीमयी सोऽञ्चन् रोहीतासमयात्स्मयात्।।
।। १५६।।
केचिदाहुः शिलादेव्या वञ्चितः स वपुस्थपः।
मानसिंहं ययौ योद्धुं सिंहं कुम्भीव कोपतः।।
।। १५७।।
अस्त्रप्रयोगसंहारविस्मापितपरस्परम्।
जजृम्भे कूर्मकायस्थराजयोर्जन्यमुच्चकैः।।
।। १५८।।
अस्त्राण्यस्त्रैः समुत्सार्य भगवद्दाससम्भवः।
सङ्ग्राममूर्ध्निमूर्द्धानं केदारस्य चकर्त्त सः।।
।। १५९।।
कायस्थस्थपतिं हत्वा शिलादेवीं नयन्नयम्।
अम्बावतीमगादत्र कथाभेदोऽप्ययं स्थितः।।
।। १६०।।
प्रस्तौमि प्रस्तुतं सोऽथ वपुस्थेन विसर्जितः।
वाहिनीं वाहयामास रोहीतासजिगीषया।।
।। १६१।।
तटिनीशतटेनाऽटन्दर्शं दर्शं महाटवीः।
रोहीतासं हयारोहैर्मोहितारी रुरोध सः।।

॥ १६२॥
संग्रामस्तत्र तस्यासीत्कबन्धारब्धताण्डवः।
निर्यदस्रनदीपूरमाञ्जिष्ठीकृतसागरः ॥

॥ १६३॥
विरुद्ध्य विद्विषां योधैर्यो धैर्यनिलयो नृपः।
दुर्गं दुर्गममप्यन्यै रोहीतासं रुरोह ह॥

॥ १६४॥
रोहीतासं वशे कृत्वाऽवशेषविषयान्वशी।
क्रामं क्रामं स विक्रान्तः क्रमादापदपाम्पतिम्॥

॥ १६५॥
एवं पुरं दरदिशं जित्वा राजपुरन्दरः।
उद्वेल्लद्वीचिवाचालं लुलोकेऽभ्यर्णमर्णवम्॥

॥ १६६॥
हेलाहताहितो हन्त वेलासीम्नि स नीरधेः।
न्यवेशयद्बले प्रेङ्खत्पञ्चरङ्गध्वजाञ्चलम्॥

॥ १६७॥
तुरङ्गमतरङ्गौघः करीन्द्रमकराकुलः।
जगर्ज ध्वजिनीव्यूहो द्वितीय इव सागरः॥

॥ १६८॥
तन्यमानपटावासं मृज्यमानरथादिकम्।
क्रियमाणार्णवस्नानं क्रमाद्बलमवातरत्॥

॥ १६९॥
सैन्येषु सन्निविष्टेषु निर्वर्तितभुजिक्रियः।
विजहार यथाकाममधिवेलमिलापतिः॥

॥ १७०॥
तरणौ त्यक्ततारुण्ये दिदृक्षुः सागरच्छविम्।
अच्छाच्छवालुके कच्छः कच्छरोधस्युपाविशत्॥

।। १७१ ।।
परिवार्योपविविशुः सामन्तास्तं समन्ततः।
स्फुरद्वज्रचमत्कारं लेखा लेखर्षभं यथा।।
।। १७२ ।।
कुत्रापि भङ्गमप्राप्ता जडसङ्गविवर्जिता।
अपङ्किलमहाकच्छा सागरं साऽहसत्सभा।।
।। १७३ ।।
तत्र द्वीपान्तरात्कोऽपि प्रणिधिः प्रतिपक्षिणाम्।
ससार सारजिज्ञासुर्मानदं मानमानतः।।
।। १७४ ।।
भ्राजमानं श्रिया मानं साभिमानं प्रणम्य सः।
निषसादोपदाव्याजविनुह्नितनिजाशयः।।
।। १७५ ।।
राजाऽप्यस्याशयं बुध्वा सावज्ञमुपदाः स्पृशन्।
वार्त्तां निर्वर्त्य करगमौज्झदब्जमुदन्वति।।
।। १७६ ।।
आज्ञाशक्तिं स्फुटीकर्त्तुं स कुतूहलकैतवात्।
आनयध्वमिदं पुष्पं सामन्तानित्थमादिशत्।।
।। १७७ ।।
आदिशत्यब्जमानेतुं माने तुङ्गपराक्रमे।
विविशुर्बाहुजा वार्द्धवाहवप्रौढबाहवः।।
।। १७८ ।।
तदाज्ञासमकालं द्राग्बध्वा परिकरं नृपाः।
निपेतुः प्रौढपाठीनदुर्गमे सागरोदरे।।
।। १७९ ।।
ते वारणकराकारबाहुवारितमद्गुराः।
तेरुस्तोयधिमग्रेहमग्रेहमितिवादिनः ।।

।। १८०।।
केऽप्यावर्त्तेष्ववर्त्तन्त परे पाठीनकुक्षिषु।
राज्ञोऽग्रे केऽपि तन्निन्युः सारसंसारसम्भृताः।।
।। १८१।।
चित्रं तच्चरितं प्रेक्ष्य चिरं चारस्य मुह्यतः।
आतङ्कविस्मयाभ्यां द्राक्सञ्चारोऽरचि चेतसि।।
।। १८२।।
तत्तादृक्साहसं दृष्ट्वा प्राह सन्नमनाश्चरः।
गन्तुं मामनुमन्यध्वं गृहानिति नृपं नतः।।
।। १८३।।
विज्ञापितो मुहुस्तेन विज्ञाताऽवनिनायकः।
तं विसर्ज्य समुत्तस्थौ सायं कर्मविधित्सया।।
।। १८४।।
अप्रमाणान्यनीकानि पश्यन्सज्जानि पङ्क्तिशः।
साध्वसोन्निद्ररोमाञ्चः स्पशेन्द्रः सोऽपलायत।।
।। १८५।।
गतेन तेन सपदि प्रत्यबोधि निजो नृपः।
सोऽपि कच्छकथां श्रुत्वा तूष्णीं तस्थौ भयाशयः।।
।। १८६।।
निर्विश्य धैर्यहसितसागरः सागरश्रियम्।
निवर्त्तते स्म मानोऽपि श्रीमानम्बावतीं प्रति।।
।। १८७।।
अम्बावतीं नृपः प्राप्य जगदम्बासहायवान्।
शिल्पिभिः कारयामास शिलादेव्या निकेतनम्।।
।। १८८।।
संस्कृत्य स्थापयामास शिलादेवीं स मन्दिरे।
स्थापितामनु तां तस्य विभवो ववृधेऽधिकम्।।

।। १८९।।
तदा प्रभृति कच्छानां नगरी स्वच्छनागरा।
अम्बावतीति विख्यातिमन्वर्थां दधती बभौ।।
।। १९०।।
अथो दिनेषु गच्छत्सु कच्छेन्द्रोऽगच्छदेकदा।
दिल्लीमर्कवराहूतः कर्षन्नुच्चैः पताकिनीम्।।
।। १९१।।
सम्राडर्कवरो वीक्ष्य मानमानतमन्तिके।
वार्त्तं सादरमापृच्छ्य व्याहर्त्तुमुपचक्रमे।।
।। १९२।।
श्रूयतां भो महाराज दक्षिणस्यां वरारके।
युद्ध्यतः खानखानस्य व्यतीयुः पञ्चहायनाः।।
।। १९३।।
तथापि नो समजनि जयो हन्त मनागपि।
तत्तत्र गच्छ कच्छेन्द्र त्वदेकगतयो वयम्।।
।। १९४।।
इत्थमाभाष्य साहीन्द्रो राज्ञे सत्कारमाचरन्।
केसरीन्द्रमुखाकारं हैममुच्चैर्ध्वजं ददौ।।
।। १९५।।
पारितोषं समादाय पृथवीपाकशासनः।
दक्षिणो वीरविद्यासु दक्षिणाभिमुखो ययौ।।
।। १९६।।
पुरः पयांसि सेनाभिः कुर्वन्यङ्गानि पृष्ठतः।
प्रजावृन्दावनो राजा श्रीवृन्दावनमासदत्।।
।। १९७।।
तत्र नक्तं शयानाय स्वप्ने कूर्मविडौजसे।
स्वरूपं दर्शयामास गोविन्दो भक्तवत्सलः।।

।। १९८।।

जापयिष्यामि जन्ये त्वां सौधमुच्चैः कुरुष्व मे।
एवमाज्ञाप्य भगवान्भूपमन्तरधीयत।।

।। १९९।।

स प्रातः स्मृतदृष्टान्तो दृष्टान्तो युधि विद्विषाम्।
जगाम यत्र गोविन्दप्रतिमा स्म विराजते।।

।। २००।।

नृपः सान्द्रघनश्यामं मुरलीचुम्बिताधरम्।
गोविन्दमरविन्दाक्षं विन्दन्निन्दन्नवन्दत।।

।। २०१।।

नत्वा गोविन्दमुर्वीन्द्रो गुर्वीं कृत्वा स्तुतिं मुहुः।
मन्दिरं कारयामास वृन्दाविपिनचन्दिरम्।।

।। २०२।।

सौधेऽसौ धेनुचित्रे तं प्रतिष्ठाप्य यथागमम्।
ययौ व्रजभुवं पश्यन्मथुरामथ राजघः।।

।। २०३।।

विश्रान्तस्तत्र विश्रान्तघाटे माथुरमण्डिते।
ददौ दानानि स स्नात्वा सलिले शमनस्वसुः।।

।। २०४।।

सङ्कलय्याऽथ कटकं भटकम्पितभल्लकम्।
राजा जट्टं जयन्नाजावाजगाम निजं पुरम्।।

।। २०५।।

नत्वा शिलामयीमम्बां प्रास्थाच्छम्बायुधी नृणाम्।
अम्बावतीपरिसरानैभैर्जम्बालयन्मदैः ।।

।। २०६।।

उन्नेत्रराजिभी राजा पौरैश्चुलुकितच्छविः।
प्रतस्थेऽगस्त्यहरितं साहीन्द्रहितकाम्यया।।

।। २०७।।

प्रतिष्ठमाने विजयाय माने
योऽभूद्भटानां ध्वनिरुद्भटानाम्।
प्रदिक्षिणीकृत्य स दक्षिणाशां
समाधिभेत्ताऽजनि कुम्भयोनेः।।

।। २०८।।

स तापतीतीरमुपेत्य भूपतिः
प्रनर्त्तितानोकहपङ्क्तिमारुतैः।
निवेशयामास बलं वलम्बित-
क्लमं क्रमक्रान्तपथो महारथः।।

।। २०९।।

विदारयन्ती प्रतिकूलभूभृतः
प्रतिक्षणोल्लासितरङ्गसङ्गिनी।
समुच्छलत्कूर्मकुलाकुलाशया
शनैः शनैः साऽवततार वाहिनी।।

।। २१०।।

परेद्युरुत्तीर्य स तापतीं हयैः
करस्फुरन्नग्नकृपाणभीषणः
जघान वेगेन भरोनपत्तनो-
पकण्ठमासाद्य बलानि विद्विषाम्।।

।। २११।।

ततो बराडं विघटय्य विक्रमी
जवादजैषीत्पुनरेलचं पुरम्।
विशिष्य लोकोत्तरभाग्यशालिनां
जयो न जातु व्यभिचारमृच्छति।।

।। २१२।।

विजित्य काष्ठामिति कौम्भसम्भवीं
शशाम तत्रैव स हन्त पार्थिवः

शुचेर्दशम्यां शकले शुचिच्छवौ
क्षमां क्षमाभृद्रसचन्द्रवत्सरे।।
।। २१३।।

समा: स मानो ननु पञ्चविंशतिं
समांशकान्पञ्चदिनानि विंशतिम्।
प्रजा: प्रशास्य स्वरवाप पुष्यवान्
महामुने: पीतपयोनिधेर्दिशि।।
।। २१४।।

स्त्रियश्चतस्रश्चतुरस्ररोचिष-
स्तमन्वयुस्तत्र पतिं पतिव्रता:।
इत: पुन: पञ्च मिषत्सु बन्धुषु
चिताध्वनाऽम्बावतिकागता गता:।।
।। २१५।।

अन्वीयुरेवं नव तं महिष्यो
नवैव तस्मात्प्रथमं विषेदु:।
शेषा नमस्कृत्य सुतैर्निषिद्धा
वैधव्यदीक्षाविधिमन्वतिष्ठन्।।
।। २१६।।

येनेश्वराय जगदीशपदं प्रदत्तं
गोविन्ददेवविभवे भवनं च दत्तम्
स प्रातरेव गृणतां गुणलाभरम्य:
श्रीमानसिंहमहिमा न हि मानगम्य:।।
।। २१७।।

दाता वीरोऽतिधीरो निपुणमधुरगीर्धर्मकर्माप्तशर्मा
भासां राशि: शुभाशी: प्रवरतरगुणग्रामभूमिर्यशस्वी।
सद्भक्तिव्यक्तियुक्तो हरिपदकमले सर्वश: कच्छपानां
सुत्रामा मानसिंहो जगति समजनि श्रीमहाराजसंज्ञ:।।

।। २१८।।

यद्राज्ये सुखिनो बभूवुरखिलक्षोणीजनाः सर्वतो
यस्तं काबिलमप्यगम्यमितरैर्जित्वाऽनयत्स्वे वशे।
यः शश्वन्निविडीचकार चरणैर्धर्मं चतुर्भिः कलौ
सोऽयं माननृपः स्तुतो भुवि न कैः साहीन्द्रगीतस्तुतिः।।

।। २१९।।

कीर्त्तिः स्वर्गतरङ्गिणी सुविशदा श्रीमानसिंहप्रभोः
प्रोद्यच्छत्रुकदम्बहृद्गिरिवरान्संदारयन्ती रयात्।
उच्चैस्तच्चरिताब्जपुञ्जपरमोल्लासा जगत्पाविनी
शक्तिस्तोमजलावहा त्रिजगतीमुल्लङ्घ्य दूरं गता।।

।। २२०।।

मातुं मानमहांस्यतीव न गुरुः प्रौढोऽपि सन्स्वर्गुरुः
सा गीर्गायति किन्तु नान्तमयते काव्यस्य कक्षा कुतः।
वल्मीद्वीपभवौ कवी तु जरठौ का मादृशानां कथा
यत्सङ्ख्याकलनक्रियासु विकलः शेषोऽपि शिष्यायते।।

।। २२१।।

एवं माननृपे वितत्य ककुभामन्तेषु कीर्त्तिं निजां
नाकं गच्छति कच्छवंशतिलके साकं कलत्रैरहो।
श्रीदिल्लीदयितेन दत्तमिरजाराजप्रशस्तिर्महा–
नध्यम्बावति भूपतिः समभवच्छ्रीभावसिंहः स्वयम्।।

।। २२२।।

धर्मे यस्य मतिर्मनो भगवतः पादारविन्दद्वये
देहो यस्य परोपकारकुशलो दानाय भूतिः पुनः।
वाणी यस्य हरेरभूत्स्तुतिषु स श्रीमानराजात्मजो
दौहित्रः क्षितिपश्चचन्द चरमः श्रीरायमल्लेशितुः।।

।। २२३।।

यस्य प्रचण्डतरवारिहतैर्द्विषद्भिः
संदर्शिता समरसीमनि पृष्ठलक्ष्मीः।

विद्विष्टदारनयनाश्रुमयार्णवोद्यत्-
कीर्तीन्दुरत्र जयति स्म स भावभूपः।।
**।। २२४।।**

अन्योक्तिदर्शितरसं रसवीतिहोत्र-
रात्रीशवृत्तरुचि भावविलासकाव्यम्।
विद्याविलाससुतरुद्रकवीश्वरेण
भावस्य भावमधिगम्य विधीयते स्म।।
**।। २२५।।**

भावः स्वभावचतुरश्चतुरस्रकीर्ति-
र्वर्षाणि सप्तपृथिवीं पृथुधीः प्रशास्य।
वस्वद्रिषड्विधुशरद्यधितैष्यमच्छे
खण्डे तिथौ पितृपतेः पितृलोकमाप।।
**।। २२६।।**

इत्थं समुन्मिषति भावविभोरभावे
भूपो बभूव विजयी जयसिंहवर्मा।
योऽम्बावतीं प्रभवताऽर्कवरेण दत्तां
द्यौसात एत्य मघवेव दिवं जुगोप।।
**।। २२७।।**

बभूव भावप्रतियोगितां नृपे स्पृशत्यभावप्रतियोगिवर्मणि।
जयो महासिंहसमुद्रचन्द्रमाः पटुः प्रजाशर्मविधानकर्मणि।।
२२८

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते**
**काव्येऽत्र कच्छवंशे पूर्त्तिमगादष्टमः सर्गः।।**

****

## नवमः सर्गः

।। १।।

जयसिंहं प्रकृतयः स्थितमम्बावतीपदे।
अभ्यषिञ्चन्यथाम्नायमुज्ज्वलैः स्वर्धुनीजलैः।।

।। २।।

चामरोद्वीज्यमानश्रीर्नयरीतिविचक्षणः।
आवर्जयज्जयो राजा जयोदयमयो महीम्।।

।। ३।।

अकलङ्कः कलापूर्णः स्फीतः पक्षद्वयेऽपि सः।
क्षत्रराजोऽधिकं रेजे रुचा नक्षत्रराजतः।।

।। ४।।

अन्ये ये केऽपि सिंहास्ते जयहीना जगत्तले।
एकं तमेव नृपतिं जयसिंहं जगुर्जनाः।।

।। ५।।

जित्वा दिशः समानीतैरुपहारैः समर्चयत्।
उच्चैः शिलामयीमम्बां पुरीमम्बावतीं च सः।।

।। ६।।

अम्बावती जये राज्ञि प्रतिसद्म ततातता।
बभौ समृद्धसामन्तक्रियमाणगतागता।।

।। ७।।

रणक्षेत्रेष्वविश्रान्तं शरधारा ववर्ष सः।
चित्रं पुनरमित्राणां गृहेषु तृणजन्म यत्।।

।। ८।।

यस्य मार्तण्डचण्डेषु तेजस्सु प्रज्वलत्स्वलम्।
तमः सम्भूय सहसा निलिल्ये द्विषतां हृदि।।

।। ९।।

चतुर्जलधिवेलान्तवृक्षवाटीविकासितम्।
उच्चैरुत्तंसयन्ते यत्कीर्तिपुष्पं दिगङ्गनाः।।

।। १०।।

सकृतपरिचयप्रीतसम्राडर्कवराग्रहात्।
गतागतमभूदस्य दिल्ल्यां पुरि मुहुर्मुहुः।।

।। ११।।

शुभोदयो महाकेतुरमन्दश्रीः शनैश्चरः।
यः प्रधानं नृणां खड्गी प्रमदेद्धो मदोज्झितः।।

।। १२।।

इन्द्रध्वजमिवात्युच्चैर्यशःख्यातिसमुच्छ्रितम्।
प्रजाः प्रजातहर्षास्तं स्तवैः समुपतस्थिरे।।

।। १३।।

षडस्य जज्ञिरे जायास्तास्वाद्या तु मृगावती।
इन्द्रदुर्गेन्द्रराष्ट्रोढरायसिंहस्य या सुता।।

।। १४।।

सुता केशवदासस्य जादमान्वयजन्मनः।
जाने जयस्य भूजानेः स्त्रीराजकुँवराऽवरा।।

।। १५।।

राजानं राजकुँवरा कलयन्ती कलागुणैः।
एकामसूत तनुजां जातमात्रां ममार सा।।

।। १६।।

सीसादनगराजस्य तनुजा तनुमध्यमा।
भूपते रूपकँवरा तृतीया महिषी मता।।

।। १७।।

तुर्या बीकावती कान्ता कृष्णसिंहभवा प्रभोः।
हरिसिंहः सुतो यस्या बाल एव व्यपद्यत।।

॥ १८॥
चाहमाणचणा काचिदानन्दकुँवराऽप्यभूत्।
या करोलीपतेः पुत्रीश्यामदासस्य कीर्तिता॥

॥ १९॥
राजानं रञ्जयित्वा या कञ्जमञ्जुविलोचना।
दापयामास राणोलीं पुरं पित्रे पुरुश्रियम्॥

॥ २०॥
नृपप्रसङ्गमासाद्य मासस्नाता क्षणादसौ।
कच्छेन्द्रकुलविच्छित्यै स्वच्छं गर्भमविन्दत॥

॥ २१॥
या प्रकृत्यैव रोचिष्णुः पुनस्तद्गर्भरोचिता।
दौहृदासिचमत्कारानञ्चती रुरुचे चिरम्॥

॥ २२॥
दृगङ्करसभूवर्षे भाद्रे कृष्णे तिथावहेः।
आनन्दकुँवराकुक्षौ रामसिंहजनुर्ननु॥

॥ २३॥
गतासुताननाडीषु मिहिरोदयतो निशि।
नक्षत्रे भरणीसंज्ञे धरणीशसुतोद्भवः॥

॥ २४॥
धने कविकुजौ ज्ञेनशिखीज्याः सहजे स्थिताः।
मदे शनिस्तमो भाग्ये लाभे ग्लौर्युग्मलग्नतः॥

॥ २५॥
षष्ठी तु राजकुँवरा कूर्मराजस्य कामिनी।
पूर्वनीवृन्नृपालस्य सूरसिंहस्य कन्यका॥

॥ २६॥
चत्वारो जज्ञिरे यस्यां सुता जयमहीपतेः।
तत्र द्वौ बालकावेव कालेन कवलीकृतौ॥

।। २७।।

शेषौ तु द्वौ ययोरासीज्ज्यायान्विजयसिंहक:।
कीर्तिसिंह: कनिष्ठो य: स कामापत्तने स्थित:।।

।। २८।।

राजाऽथ रामसिंहेन विद्यानां पारदृश्वना।
जिष्णुर्यथा जयन्तेन जयं तेन क्व नाप्तवान्।।

।। २९।।

शनै: शनैर्मृदुकरे जयेन्दावुदिते सति।
मान्द्यं चण्डकरोऽप्यर्कवरो दिल्ल्यां जगाम ह।।

।। ३०।।

दारासाहो मुरादाख्यां नवरङ्गश्च सुज्जक:।
चत्वारोऽर्कवरस्यासन्पुत्रा: पूतपराक्रमा:।।

।। ३१।।

दारासाहं हरिप्रस्थे प्राच्यां सुज्जं तुरष्कराट्।
नवरङ्गं मुरादं च दक्षिणस्यां न्ययुङ्क्त स:।।

।। ३२।।

स्थापयित्वा यथास्थानं सुतानिति स साहिराट्।
क्रमेण लघयामास धुरं दिल्ल्याश्चिरं धृताम्।।

।। ३३।।

नवरङ्गस्य निभृतं जयसिंहेन रङ्गिणा।
सख्यमासीदिह प्राय: कारणं रङ्गशीलता।।

।। ३४।।

मार्गकृष्णप्रतिपदि वर्षे बाणाद्रिषड्विधौ।
ब्रह्मर्क्षे वासरे शौरे: कन्यायां वरियानके।।

।। ३५।।

रवेरिष्विषुनाडीषु बाणदृष्टिलवेषु च।
अर्कश्रीरर्कवरतो नवरङ्गनृपोऽजनि।।

।। ३६।।
धने ज्ञेनौ भृगुर्याने सुते राहू रिपौ गुरुः।
भाग्येऽब्जार्की शिखी लाभे व्ययेऽङ्गारो जनुर्ग्रहाः।।

।। ३७।।
माघे शुक्लेऽनलतिथावब्दे वस्वब्धिषड्विधौ।
बुधे श्रवणनक्षत्रे कन्याङ्के वज्रयोगके।।

।। ३८।।
सप्तत्रिंशद्घटीष्वर्को नोदयात्त्रिषु पलेषु च।
सम्राडर्कवरो जज्ञेऽमुष्य जन्मच्छदो यथा।।

।। ३९।।
सहजे गीष्पतिर्याने त्वुशनाः सह केतुना।
सुतेज्ञेनेन्दवो भौमो मदे राज्ये तमःशनी।।

।। ४०।।
युगेन्द्वद्रीन्दुशरदि दारासाहेन लोभतः।
अर्कस्त्वर्कवराबादे कारागारे नियन्त्रितः।।

।। ४१।।
भाद्रे साहिजिहाकोऽर्कः खदृगद्रीन्दुवत्सरे।
दीर्घनिद्रातमोग्रस्तो निमिमील विलोचने।।

।। ४२।।
अर्केऽस्तं याति सहसा नवरङ्गमुरादकौ।
सुज्जश्चेति त्रयो वीरा दिल्लीं जेतुं प्रतस्थिरे।।

।। ४३।।
एवं सति भयाविष्टो ढुण्ढारिमरुपार्थिवौ।
प्रेरयामास दारेन्द्रो रोद्धुं तानभियास्यतः।।

।। ४४।।
जेतुं तदाज्ञया कूर्मः सुज्जं याति स्म पूर्वतः।
नवरङ्गमुरादौ तु राष्ट्रोढो दक्षिणां प्रति।।

।। ४५ ।।
नवरङ्गस्य सङ्कल्पं दारासाहे विदन्नपि।
ययौ सुज्जं जयो जेतुं सहृदर्थं क्षिणोति कः ।।
।। ४६ ।।
जयं तथागतं श्रुत्वा नवरङ्गो मुरादयुक्।
पश्यन् राष्ट्रोढपृष्ठानि दिल्लीगोपुरमाविशत् ।।
।। ४७ ।।
स प्रविश्य हरिप्रस्थं दारासाहं निगृह्य च।
मुरादमपि जग्राह सौभ्रात्रं नास्ति लोभिनाम् ।।
।। ४८ ।।
इत्थं निगृह्य बलवान्दारासाहमुरादकौ।
दिल्लीमञ्चं समाक्रम्य नवरङ्गो व्यराजत ।।
।। ४९ ।।
एतस्मिन्नन्तरे कूर्मो गयासीम्नि रयाधिकः।
सुज्जं सज्जमपि क्षिप्रं च क्षणेऽधिकरणाङ्गणम् ।।
।। ५० ।।
रणनिर्जितसुज्जाय नवरङ्गः स्वमीयुषे।
जयाय मिरजाराजप्रशस्तिं व्यतरन्मुदा ।।
।। ५१ ।।
नवरङ्गाज्ञया रङ्गी युद्धभङ्गीविचक्षणः।
जम्बूजनपदोद्देशान्विजेतुं प्रययौ जयः ।।
।। ५२ ।।
स गत्वा तत्र बलवान् दुर्गमानपि पर्वतान्।
निघ्नीचकार तं निघ्नञ्जगतं जगतीपतिः ।।
।। ५३ ।।
इत्थं स जगतं जित्वा स्थित्वाऽहानि कियन्त्यपि।
न्यवर्तत बलैः सार्द्धं नवरङ्गदिदृक्षया ।।

।। ५४।।
समागत्य हरिप्रस्थं ढुण्ढारिपरमेश्वरः।
मिमेल नवरङ्गेण जातसङ्गेन सम्मदैः।।
।। ५५।।
आसीदत्र कथासन्धौ दक्षिणस्यां नराधिपः।
घोषलेन्द्रसुतः कोऽपि सेवाशम्भुरिति श्रुतः।।
।। ५६।।
चैत्रे कृष्णे चतुर्थ्यां षड्वसुषट्क्ष्माब्दके कुजे।
करे खाग्निघटीष्वक्षिदृग्लवेषूदयाद्रवेः।।
।। ५७।।
कन्यायां गण्डयोगे यो गेयोदारगुणोऽजनि।
यस्य जन्मदले लग्नो लग्ने ग्लौर्द्रविणे शनिः।।
।। ५८।।
सुखे केतुररौ सेज्यो भृगुः किं च मदे बुधः।
आयुषि द्युमणी राज्ये रेजतू राहुमङ्गलौ।।
।। ५९।।
दानवीरो द्विपञ्चाशल्लक्षाणि रजतस्य यः।
कवये भूषणाय द्राग्ददौ स्वं स्तुवते यशः।।
।। ६०।।
यं यात्रोन्मुखमाकर्ण्य दरादिल्ली पुनः पुनः।
कपाटमुद्रणव्याजान्मीलिताक्षीव हाऽभवत्।।
।। ६१।।
सङ्कुचेष्वसङ्कुचरङ्गेण येन दोर्दण्डशालिना।
प्रसह्य नवरङ्गेन्द्रे रङ्गोऽप्येको न शेषितः।।
।। ६२।।
त्विङ्गत्तुङ्गतुरङ्गालीटापव्याधूतधूलिभिः।
असकृद्येन संरुद्धाः सन्दिग्धार्कदशा दिशः।।

।। ६३।।
यं यान्तमनुयान्ति स्म कोटिशो हयसादिनः।
येन दिग्दक्षिणाऽप्यासीदुत्तरा दिक्षु वैभवैः।।

।। ६४।।
कदाचिन्नवरङ्गोऽथ सेवाशम्भुकदर्थितः।
उवाच जयवर्माणं धृतवर्माणमुच्चकैः।।

।। ६५।।
उच्छृङ्खलं महाराज सेवाशम्भुर्विचेष्टते।
सम्म्राजमपि मां दर्पात्तृणवन्मनुते बली।।

।। ६६।।
तदद्य याहि सन्नद्धो बद्ध्वा द्राक् तमिहानय।
किं बहूक्त्या महाबाहो मदीयं शल्यमुद्धर।।

।। ६७।।
दिल्लीश्वरस्य विज्ञप्तिं श्रुत्वा सोऽम्बावतीश्वरः।
न भेतव्यमहं यामीत्युक्त्वा सद्म स्वमासदत्।।

।। ६८।।
जैत्रयात्रार्थमादिश्य सामन्तान्स समन्ततः।
इति कर्त्तव्यतां चिन्वञ्जजागार नृपो निशि।।

।। ६९।।
उत्तस्थौ सूर्यमल्लाह्वो भौम्यः कोऽपि नृपाग्रतः।
द्यौसायां विद्यते यस्य मठच्चित्रोज्ज्वलच्छटः।।

।। ७०।।
तालोत्सेधो महाबाहुः श्मश्रुलो लोहितेक्षणः।
दन्दशूकं दधत्कण्ठे भूम्योऽदृश्यत भल्लभृत्।।

।। ७१।।
राजाऽपि पूर्वकायेन त्यक्तपल्यङ्कमण्डलः।
खड्गमालम्ब्य पप्रच्छ दूरात्कस्त्वमसीति तम्।।

।। ७२।।
भृशं भीमाकृतिर्भूम्यः पुरस्तादुपसृत्य सः।
जयसिंहाय किमपि विज्ञप्तुमुपचक्रमे।।
।। ७३।।
द्यौसाया विद्धि मां भूम्यं सूर्यमल्लाभिधं प्रभो।
प्रागिवाद्य तवामात्यैर्न दीपो मे प्रवर्त्त्यते।।
।। ७४।।
एतदेवाऽत्र कूर्मेन्द्र मदागमनकारणम्।
गतिर्मे देवयोनित्वान्न क्वापि प्रतिहन्यते।।
।। ७५।।
विज्ञप्तिं सूर्यमल्लस्य कूर्ममल्लो निशम्य सः।
उवाच वचनं वाग्मी स्मितजयोत्स्नोज्ज्वलाधरः।।
।। ७६।।
भवतो दीपकज्योतिरखण्डं ज्वालयिष्यते।
किन्तु मामनुवर्तस्व सज्जः सन्सङ्कटे स्मृतः।।
।। ७७।।
तथेति स परिज्ञाय भूम्यः सद्यस्तिरोदधे।
राजाऽप्युदञ्चिताश्चर्यः कथमप्यथ सोऽस्वपत्।।
।। ७८।।
उत्थायोषसि निर्वर्त्य सूर्यमल्लस्य शासनम्।
प्रतस्थे सेनया कूर्मोऽगस्त्यपस्त्यायितां दिशम्।।
।। ७९।।
उल्लङ्घ्य दूरमध्वानं ध्वनद्दुन्दुभिरग्रतः।
बीजापुरं महीजानिर्जयति स्म जयी जयः।।
।। ८०।।
जन्ये निर्जित्य सर्ज्जेखाँह्वयं यवनपुङ्गवम्।
प्राप पृथ्वीप्रभुः सेवाशम्भुं शम्भुनिभप्रभः।।

॥ ८१ ॥

तत्र शोभाविनि मृधे सेवाशम्भुजिगीषया।
सस्मार नृपतिर्नक्तं भूम्यं तं सूर्यमल्लकम्॥

॥ ८२ ॥

चिन्तितोपस्थितो भूम्यो महाबलपराक्रमः।
उवाच वाचमेषोऽहं किङ्करः किं करोमि ते॥

॥ ८३ ॥

राजाऽपि जातविश्वासः स्तुत्वा तं भूम्यतल्लजम्।
अलिखल्लेखविल्लेखं सेवाशम्भुं प्रति स्वयम्॥

॥ ८४ ॥

शम्भो मे दीयतां दण्डः प्रणतेन पदोस्त्वया।
अन्यथोष्णीषमिव ते हरिष्यामि शिरोऽचिरम्॥

॥ ८५ ॥

इति लेखं पत्रमध्ये लिखित्वादित तस्य सः।
शिरोवेष्टनमादाय पत्रं संस्थाप्य याहि माम्॥

॥ ८६ ॥

इति राज्ञो वचं श्रुत्वा तथैव विदधे च सः।
पुनर्भूपतिमायातस्तमापृच्छ्य गतः पदम्॥

॥ ८७ ॥

प्रबुद्ध्योषसि विस्मेरः शिरोऽनुष्णीषमात्मनः।
पश्यन्पत्रं ततो लब्धं वाचयित्वाऽन्वशङ्कत॥

॥ ८८ ॥

अथो गलदहङ्कारो न्यस्तशस्त्रोऽतिसम्भ्रमः।
उपेत्य तं नरपतिं पादयोः प्रणनाम सः॥

॥ ८९ ॥

प्रणिपातपरं तस्मिन्कृत्वाऽनुग्रहमुच्चकैः।
निजगाद नृपो वाचा मेघनादगभीरया॥

।। ९०।।
सेवाशम्भो त्वयाऽवश्यं वश्येन द्विषां सता।
एकवारं मदादेशाद् दिल्ली सपदि दृश्यताम्।।
।। ९१।।
तत्र गत्वा विनीतः सन्नवरङ्गेण सन्मिलः।
न भेतव्यं यतस्तत्र रामसिंहोऽस्ति मे सुतः।।
।। ९२।।
स हि वर्मभृतामग्र्यः सत्यसन्धो महामतिः।
सम्प्राजे दर्शयित्वा त्वामिह द्राक् प्रापयिष्यति।।
।। ९३।।
तद्गच्छ किं विलम्बेन चिन्तामुन्मुच्य मानसीम्।
न त्वां हन्तुं क्षमः कश्चिद्रामसिंहे हि तिष्ठति।।
।। ९४।।
नृपेणेति समादिष्टः शम्भुः शं भुवि वर्तयन्।
दिल्लीं वीरमतल्ली द्रागाऽऽप टापवताऽर्वता।।
।। ९५।।
सोऽकस्मादेत्य हरिणा हरिप्रस्थं हरिद्युतिः।
रामसिंहेन निभृतं मिमेल मिलदञ्जलिः।।
।। ९६।।
रामसिंहोऽपि वीरस्तं दिल्लीन्द्राय निवेदयन्।
व्याजहारस्मितव्याजज्योत्स्नाविक्षुरिताननः।।
।। ९७।।
असकृद्येन साहीन्द्रसैन्यानि क्षपितानि ते।
सोऽयं दक्षिणदिग्देवः सेवाशम्भुर्निरीक्ष्यताम्।।
।। ९८।।
किमत्र मनुषे स्वामिन्समाज्ञापय मा चिरम्।
महाराजास्तु तत्रैव सन्ति दन्तिक्रयोन्मुखाः।।

।। ९९।।
इति विज्ञप्तिमाकर्ण्य रामसिंहस्य साहिराट्।
उच्चैर्विचिन्तयामास सेवाशम्भुं निभालयन्।।
।। १००।।
अहो सत्त्वमहो धैर्यमहो अस्याकृतिच्छटा।
इति चिन्तां चिरं कृत्वा रामसिंहं समादिशत्।।
।। १०१।।
न्यासोऽयं रक्ष्यतां राम त्वयि न्यस्तो मयाऽधुना।
इत्यादिश्य च्छलं चिन्वन्नुभौ बिभ्यन्व्यसर्जयत्।।
।। १०२।।
ततः साहितुरासाहा सेवाशम्भुं जिघृक्षता।
अभितो रामशिविरं न्यधायिषत यामिकाः।।
।। १०३।।
रामसिंहो महाबुद्धिर्ज्ञातसाहीन्द्रविक्रियः।
पिधाय वीवधपुटे शम्भुं द्राङ् निरकासयत्।।
।। १०४।।
स द्रुतस्तूर्णमश्वेन शम्भुर्मारुतरंहसा।
प्राप्य राज्यं निजं तत्र तत्रास जयसिंहतः।।
।। १०५।।
जयोऽपि शम्भुमाश्वास्य शरणागतवत्सलः।
न्यवर्तत स्फुरत्कीर्तिः कृतदक्षिणदिग्जयः।।
।। १०६।।
इतः पुनस्तुरष्केन्द्रः श्रुतशम्भुपलायनः।
राममाहूय मे न्यासो दीयतामित्ययाचत।।
।। १०७।।
वाचमाचम्य सम्म्राजः कर्णाभ्यां कूर्मनन्दनः।
उज्जगार गिरं गुर्वीं धैर्यखर्वीकृतार्णवः।।

।। १०८।।

यस्त्वया भूभुजां स्वामिन्नासीन्न्यासीकृतो मयि।
सेवाशम्भुः स शम्भुश्रीर्जठरे मेऽद्य वर्तते।।

।। १०९।।

निशम्य रामसिंहस्य वाचं सिंहास्पदस्य सः।
जज्वाल कल्पमार्तण्डकल्पः सङ्कल्पमुद्रणात्।।

।। ११०।।

बद्धभ्रुकुटिदुर्दर्शो दशनैरधरं दशन्।
रामसिंहं समुद्दिश्य सम्राडुदचरद्वचः।।

।। १११।।

तं प्रसूष्व सुखं राम नवमासाः कृतोऽवधिः।
व्यतीते चावधौ किञ्चिच्चिन्तयिष्ये चिकित्सितम्।।

।। ११२।।

श्रुत्वा प्रभोर्गिरं रामः संस्तभ्यात्मानमात्मना।
नोवाच धृतिमान्किञ्चित्किन्त्वगात्सद्म निर्भयः।।

।। ११३।।

दिवसेषु व्यतीतेषु दिल्लीन्द्रो गूढविक्रियः।
प्रससाद बहिर्यद्वदन्तर्लीनग्रहो ह्रदः।।

।। ११४।।

एवं सत्येकदा दिल्लीपतिर्भल्लिभिरन्वितः।
जगाम मृगयाहेतोर्वनं रामोऽपि तद्गिरा।।

।। ११५।।

सिंहेन रामसिंहस्य चिकीर्षुर्वधमञ्जसा।
वनं जगाहे दिल्लीन्द्रो मुदा भिल्लिभिरीक्षितः।।

।। ११६।।

अथ प्रदर्श्य वप्रान्तर्दूरात्क्रूराशयो हरिम्।
रामसिंहं महासिंहं वाचमित्थमुवाच सः।।

।। ११७।।

रामसिंहोऽसि लोके त्वं किञ्चाऽयमपि सिंहराट्।
योद्धुमर्हस्यतोऽनेन समयो: शोभते रण:।।

।। ११८।।

इत्थमाज्ञापितो भर्त्रा बद्ध्वा परिकरं परम्।
रामसिंहो महासिंहो धृत्वा द्राक् समसज्जत।।

।। ११९।।

सिंहमुद्दिश्य चलति रामसिंहे दधत्यसिम्।
पुन: पापमतिर्दिल्लीपतिरुच्चैरभाषत।।

।। १२०।।

पश्य भो रामसिंहाऽयं सिंह: स्फूर्जत्यनायुध:।
त्वं पुन: सायुधोऽसीति वैषम्यं न धिनोति माम्।।

।। १२१।।

तद्याहि खड्गमुत्सृज्य केसरीन्द्रं नृकेसरिन्।
द्रक्ष्यामि युवयोर्युद्धं परं कौतूहलं हि मे।।

।। १२२।।

इत्थं प्रभो निर्दिशति खड्गमुत्सृज्य साहसी।
बद्धवर्मा महाकर्मा जगर्जाभिमुखं हरे:।।

।। १२३।।

श्रुत्वा तद्गर्जितान्युच्चैर्विनद्य च मुहुर्मुहु:।
अभ्युत्पपात पञ्चास्य: पुच्छमुच्छालयन् रुषा।।

।। १२४।।

तत्क्षणं रामसिंहोऽपि हस्तं संवेष्ट्य कर्पटै:।
प्रवेशयामास हरेरुच्चैर्विस्फारिते मुखे।।

।। १२५।।

पूरयित्वा करेणास्यं मृगेन्द्रस्य विवल्गत:।
तलातलि चिरं वीरो युयुधे महदद्भुतम्।।

।। १२६।।
निपात्य सिंहमुत्तानं वक्षस्यारुह्य मुष्टिभिः।
निर्दयं ताडयामास मर्मस्थानेषु मर्मवित्।।
।। १२७।।
बहुशस्ताड्यमानस्य रक्तमुद्गिरतो भृशम्।
क्रन्दितं केसरीन्द्रस्य व्यानशे विपिनोदरम्।।
।। १२८।।
हतप्रायमिव ज्ञात्वा सिंहं श्रीजयसिंहजः।
पश्यतो नवरङ्गस्य पशुमारममारयत्।।
।। १२९।।
गृहीत्वा पादयोः पश्चाद् भ्रामयित्वा समन्ततः।
शिलायां पोथयामास शीर्णसर्वाङ्गयोजनम्।।
।। १३०।।
इत्थं विपोथ्य सिंहं स रक्तबिन्दुभिरुक्षितः।
ननाम नवरङ्गेन्द्रं दंष्ट्राविद्धेन पाणिना।।
।। १३१।।
दुष्करं वीक्ष्य तत्कर्म दिल्लीन्द्रः स दरादरः।
स्तुवन्मुहुरगाद्दिल्लीं दूयमानेन चेतसा।।
।। १३२।।
दले तत्सर्वमालिख्य वृत्तान्तं वार्त्तपूर्वकम्।
वृत्तान्तहारिणा रामः प्रापयामास भूभुजे।।
।। १३३।।
अथ विज्ञानवृत्तान्तो राजा कमठगोत्रजः।
दलं विलिख्य सम्म्राजे प्रेषयामास तद्यथा।।
।। १३४।।
स्वस्ति श्रीसाहिराजेषु जयस्य नतिरेधताम्।
आस्ते शमत्र तत्रास्तु वित्त मां शीघ्रमागतम्।।

।। १३५।।
किञ्च श्रुतं मया यूयं रामसिंहेऽन्यथादृशः।
तत्किं साम्राज्यसम्पत्तिर्भवद्भ्यो नाद्य रोचते।।
।। १३६।।
सुज्जः स यस्य धारायां ममज्ज सह सेनया।
संहर्त्ता विद्विषामुच्चैर्मदसिर्विस्मृतः कथम्।।
।। १३७।।
प्रेष्य प्रेष्येण पत्रं स जेष्यन् दिल्लीपतिं रुषा।
प्रतस्थेऽपां पतिद्वेष्यमहर्षेः ककुभो जयः।।
।। १३८।।
दिल्लीवृद्धश्रवाः श्रुत्वा पत्रोदन्तमशेषतः।
उवाहान्तर्भृशं चिन्तामब्धिरौर्वशिखामिव।।
।। १३९।।
सादः पापमतिर्घातं कलयामास भूभुजि।
उपकारः कृतोऽसत्सु ह्यपकाराय कल्पते।।
।। १४०।।
जानन्बलं जयस्याऽसौ निगृहीतुमनीश्वरः।
निश्चिकाय विषं दातुमुपायमनपायिनम्।।
।। १४१।।
भरोनपत्तनप्रान्तेऽध्युषिताय नृपाय सः।
भृत्येन विषमुत्कोचप्रीतेन समदापयत्।।
।। १४२।।
अन्नपानेषु भृत्येन गुप्तरीत्यावचारितम्।
शिश्ये विश्वासमापन्नो विषं भुक्त्वा विशां पतिः।।
।। १४३।।
अथ तद्वेगविध्वस्तमर्मनिर्माणविह्वलः।
महात्मा जयसिंहेन्द्रो जहौ हा हन्त जीवितम्।।

।। १४४।।
पौरुषं नवरङ्गस्य कीर्त्तये किमतः परम्।
शतमल्लाधिको राजा शतमल्लेन घातितः।।
।। १४५।।
आश्वयुक्कृष्णपञ्चम्यामब्धिदृक्कुध्रकौ नृपः।
वत्सरे वत्स रे क्वाऽहं जल्पन्निति तनुं जहौ।।
।। १४६।।
एवं सति सतीगण्या मण्याऽभरणभूषिता।
तत्र बीकावती देवी देवं तमनुगाऽभवत्।।
।। १४७।।
तातं तथा मृतं श्रुत्वा रामसिंहोऽश्रुलोचनः।
क्रिया निर्वर्त्य सकला द्रागासीद्राजशब्दभाक्।।
।। १४८।।
दिल्लीन्द्रोऽपि विशल्यः सन्कमठेन्द्रनिमीलनात्।
स्वायत्तीकृत्य मुमुदे पुरीमम्बावतीं खलः।।
।। १४९।।
रञ्जयन्नवरङ्गेन्द्रं रामसिंहोऽपि धीरधीः।
तूष्णीमेवास समयमीक्षमाणो विचक्षणः।।
।। १५०।।
स्त्रियोऽस्य पञ्च तत्राद्या हड्डगोत्रा मुकुन्दजा।
हित्वाऽष्टदिनदेशीयं कृष्णसिंहं ममार या।।
।। १५१।।
भाद्रे कृष्णदशम्यां यो मन्देऽब्दे क्ष्मेन्दुशैलकौ।
आसीदैशे तुलालग्ने नाडीषु नवसूदयात्।।
।। १५२।।
राष्ट्रोढान्वयजालोरराजकेसरिसिंहजा ।
द्वितीया रामराजस्य स्त्री रामकुँवरा वरा।।

।। १५३।।
राज्ञो भगेली महिषी बभूवानूपसिंहजा।
यां विदुः साहिकुँवरां नामधेयेन तद्विदः।।
।। १५४।।
समये समयोल्लासा ययेन्द्रकुँवरा सुता।
प्रसूयते स्म नीत्येव सम्पत्तिः सुप्रयुक्तया।।
।। १५५।।
गोडेन्द्रानर्दसिंहस्य पुत्री सिंहकृशोदरी।
रामा रामस्य शुशुभे शुभलक्षणलक्षिता।।
।। १५६।।
चाहमानचणस्यामसिंहजा काऽप्यभूत्परा।
यस्यामनूपकुँवरा नृपतेरास कन्यका।।
।। १५७।।
तनौ शनिः सुते राहुर्द्विषीज्यो ग्लौस्तु धर्मणि।
भृगुः खे लाभगा भौमशिखीना व्ययगो बुधः।।
।। १५८।।
किं चैका श्रेष्ठिकवधूश्चम्पा शम्पासमच्छविः।
उत्तार्य सौधतो राज्ञा नीता नीतिः क्व कामिनाम्।।
।। १५९।।
क्रोशतोऽभिसमं तस्या बन्धूनाश्वास्य युक्तिभिः।
अशक्तः शासितुं रामं रुरोदान्तस्तुरष्कपः।।
।। १६०।।
यस्यामास सुतो राज्ञः किशोरो दासपूर्वकः।
किशोरदासतो जज्ञे चूडसी तनयो बली।।
।। १६१।।
रामसिंहः कृष्णसिंहं सप्तसप्ताश्वतेजसम्।
राजकन्यागुणैर्धन्या युवानमुदवाहयत्।।

।। १६२।।

रामसिंहात्मजः श्रीमांस्ताभिरद्भुतकान्तिभिः।
विजहार गवाक्षेषु पुष्पतल्पसुगन्धिषु।।

।। १६३।।

तासु काचित्ततः पुत्रमजनिष्ट महौजसम्।
ज्येष्ठकृष्णत्रयोदश्यामब्देऽष्टाक्ष्यद्रिकौ भृगौ।।

।। १६४।।

कृत्तिकासूदयाद्भानोश्चमूनाडीष्वितासु च।
वृषलग्ने सुवेलायां कृष्णसिंहात्मजोऽजनि।।

।। १६५।।

लग्नेऽब्जे नौ धने भौमभृगुज्ञाः सहजे गुरुः।
तनुजे केतुरायस्थः सैंहिकेयः सहाऽर्किणा।।

।। १६६।।

राजाऽथ वितरन्वित्तं पौत्रजन्मप्रहर्षितः।
ययावन्तःपुरे विज्ञो लक्षणान्यस्य लक्षितुम्।।

।। १६७।।

अरिष्टात्स्त्रीभिरानीतं वीक्ष्य तं विष्णुविक्रमम्।
निधिं धाम्नामसौ नाम्ना विष्णुसिंहमिति व्यधात्।।

।। १६८।।

विष्णुसिंहः कुमारोऽसौ सुकुमारतरोऽपि सन्।
अनेहसाऽथ कियता जन्येष्वजनि कर्कशः।।

।। १६९।।

शङ्खचक्रगदापद्मस्फुरत्पाणिर्वलद्बलः।
न कं सहर्षमकृत विष्णुरक्रूरसत्कृतः।।

।। १७०।।

दारक्रियोचितावस्थं वीक्ष्य विष्णुं विशाम्पतिः।
राज्ञां विवाहयामास कन्याः पञ्च यथाक्रमम्।।

।। १७१।।

तत्राद्या त्विन्द्रकुँवरा राष्ट्रोढकुलकन्यका।
हंवीरचाहमानोत्था फुल्लादिकुँवरा परा।।

।। १७२।।

हड्डुजाऽच्छकुँवरा भावभूपसमुद्भवा।
वटगुर्जररावेन्द्रदुहिता महिताऽभवत्।।

।। १७३।।

पञ्चमीं विष्णुसिंहस्य रामामोकमसिंहजा।
चाहमानभवां प्राहुर्यां प्राञ्चो बहुरङ्गदाम्।।

।। १७४।।

स कृष्णविष्णुसिंहाभ्यां समनुष्ठितशासनः।
शशास रामसिंहेन्द्रो ढुण्ढारिविषयं वशी।।

।। १७५।।

श्रीलालमिश्रतनुजो मिश्रः स हरिजीवनः।
रामाज्ञया प्रहसनं चक्रेऽद्भुततरङ्गकम्।।

।। १७६।।

अनन्तवैद्यजनुषा वैद्यशङ्करशर्मणा।
ग्रन्थो वैद्यविनोदाख्यः प्रणोदाय कृतो रुजाम्।।

।। १७७।।

कृष्णसिंहस्तु संम्राजा प्रेषितः कृष्णविक्रमः।
दक्षिणां दिशमासाद्य युयुधे युद्धलालसः।।

।। १७८।।

तत्र स्वकीयवीरेषु मूर्च्छितेष्वनिवर्त्तनः।
परः शतान्परान्हत्वा शङ्खं दध्मौ क्षतोऽप्यलम्।।

।। १७९।।

जित्वेति कृष्णवर्माऽजौ बीतवर्मा प्रहारतः।
वैद्यैः परावरादुर्गे रक्षितोऽप्यजहादसून्।।

।। १८०।।
फाल्गुने मासि धवलद्वितीयायां क्षतातुरः।
नन्दाद्रिसप्तकावब्दे कृष्णसिंहो व्यपद्यत।।
।। १८१।।
सप्तसु द्वे स्त्रियौ तस्य वियोगं सोढुमक्षमे।
तमन्वम्बावतीसीम्नि चितामारुह्य जग्मतुः।।
।। १८२।।
शुशोच नाधिकं राजा जयिनं व्यसुमात्मजम्।
क्षतारिः क्षत्रियः शस्त्रक्षुण्णाऽसुर्न हि शोच्यते।।
।। १८३।।
दाक्षिणात्या जगू रामो विजेतुं दक्षिणां दिशम्।
प्रतस्थे कृष्णसिंहेन युद्धहेवाकिना सह।।
।। १८४।।
अथ दक्षिणराजेन कूर्मराजस्य दृप्यता।
ववृधे दशवक्त्रेण राघवस्येव सङ्गरः।।
।। १८५।।
परिघेण रिपोस्तत्र क्षतवक्षा विशाम्पतिः।
मुमूर्छ रथमालम्ब्य मुष्टिश्लथशरासनः।।
।। १८६।।
मूर्च्छिते नृपतावुच्चैर्मूर्च्छितान्तरमुद्यरौ।
युयुधे रोषरक्ताक्षो रामसिंहसुतो बली।।
।। १८७।।
निचखान रिपोर्वीरो हृदये द्वारपञ्चकम्।
गामगात्तद्विधायेव प्राणानां द्वारपञ्चकम्।।
।। १८८।।
क्षुरप्रैःक्षतहृच्छत्रुः क्षतजच्छुरितच्छविः।
उत्पपात रथात् क्रुद्धो धृतासिः श्येनलाघवः।।

।। १८९।।

परेणागत्य समरतत्परेण निजासिना।
चिच्छिदे कृष्णसिंहस्य मस्तकं मुकुटोज्ज्वलम्।।

।। १९०।।

स कृत्तमस्तकत्वेन कबन्धो भीमदर्शनः।
बलगतो वैरिणः कण्ठमवगृह्य ममर्द ह।।

।। १९१।।

सङ्ख्ये संस्थामिति प्राप्य विमाने संस्थितावुभौ।
वीरौ वीरेषु पश्यत्सु स्वर्गतौ महदद्भुतम्।।

।। १९२।।

नृपो बुद्ध्वाऽथ पुत्रस्य श्रुत्वाऽजौ विक्रमं मृतिम्।
वीरभावं स्तुवन्साश्रु जहर्ष च शुशोच च।।

।। १९३।।

दक्षिणस्यां दिशि स्वीयमङ्घ्रिमित्थं निधाय सः।
अम्बावतीं निववृते विष्णुसिंहेन पालिताम्।।

।। १९४।।

अम्बापुरीं प्रविश्याऽसौ कृष्णसिंहं विनोन्मनाः।
विष्णुसिंहे धृताशंसो राजा राज्यं दधाविति।।

।। १९५।।

इत्येष रामसिंहस्य परिवारः प्रपञ्चितः।
पराक्रमविचित्राणि चरित्राण्यथ कीर्तये।।

।। १९६।।

जये दिवं गते राज्ञि रामे च शिथिलोद्यमे।
आसामकाबिलादीनि स्थलानि स्थितिमत्यजन्।।

।। १९७।।

अथाऽनन्यगतिः संम्राड्देशोपप्लवशान्तये।
विनिश्चिकाय मनसा राममेव धुरन्धरम्।।

।। १९८।।

गच्छत्स्वहःसु निर्वर्त्य मृत्युप्रश्नादिसत्कृतिम्।
साहीन्द्रो रामसिंहाय ददावम्बावतीं पुरीम्।।

।। १९९।।

प्राप्तामपि गुरोः पश्चात्पुरीमम्बावतीमसौ।
दिल्लीश्वराज्ञया भूयः प्राप्यासीद्राजशब्दभाक्।।

।। २००।।

अथैकदा समाहूय हरिप्रस्थपुरन्दरः।
राममाज्ञापयामास बहुमानपुरःसरम्।।

।। २०१।।

रामसिंहमहासिंहकुलकाननसिंहक।
आसामासादनायाऽहं प्रायशः प्रैषयं नृपान्।।

।। २०२।।

न तेषु केनचित्तात विजितं तत्र युद्धतः।
तद्गच्छ कच्छ दक्षोऽसि स्वच्छमर्जय दोर्यशः।।

।। २०३।।

दिल्लीमघवता प्रोक्तो मघवा कूर्मभूभुजाम्।
मुद्रादरिद्रपृतनः प्रतस्थे योद्धुमुच्चकैः।।

।। २०४।।

प्रसस्रे भीमनिर्ह्रादैस्तस्य स्थगितभूतलैः।
अस्थानोद्वेलपाथोधिपाथोभिरिव सैनिकैः।।

।। २०५।।

उपमा कूर्मदेवस्य द्विपमारुह्य गच्छतः।
स्यादेव चेद्रविर्यायाद् व्योम्नि सोदयपर्वतः।।

।। २०६।।

छत्रेण रुचिरच्छायो धवलेन धराधवः।
बभौ चन्द्रमसा वक्त्रविजितेनेव सेवितः।।

।। २०७।।

तेजोभिरुज्ज्वलद्योतं तं सर्वोपरि वर्तिनम्।
ध्रुवं ग्रहा इव भ्रेमुरारात्सामन्तपार्थिवाः।।

।। २०८।।

अश्वव्यूहखुराग्राङ्कनखक्षतविसंष्ठुला।
भूरभूदुपभुक्तेव भृशमध्वनि भूपतेः।।

।। २०९।।

एवं कच्छनृपो गच्छन् ग्राहं ग्राहं नृपोपदाः।
सीमानमाससाद द्रागासामस्य परन्तपः।।

।। २१०।।

तत्राऽजनि महाजन्यं तस्याऽसाममहीभुजा।
धावद्धयखुरोद्धूतधूलीदर्शिततदुर्दिनम्।।

।। २११।।

युद्ध्यन्तं वीक्ष्य रामेन्द्रं गगनाङ्गणगास्तदा।
शक्रादयो ह्यनिमिषा रामचन्द्रस्य सस्मरुः।।

।। २१२।।

धृतधन्वाऽधिकं गर्जंस्तडिदुज्ज्वलभूषणः।
अवर्षदाशुगं वर्षं जीमूत इव कच्छपः।।

।। २१३।।

एवं प्रसह्य शत्रूणां कुलान्याकुलयञ्छरैः।
जन्यान्तर्जयजो राजा जुजुषे जयजं यशः।।

।। २१४।।

हठादासाममासाद्य स्वमुद्घोष्य जयं नृपः।
रङ्गामाटीं चमूसङ्गामगाद्भङ्गाय विद्विषाम्।।

।। २१५।।

समवायं द्विषां तत्र संक्षोद्य क्षितिवासवः।
गुहावाटीमपि बली वशयामास वामतः।।

।। २१६।।

जित्वेति सर्वतः सैन्यान्युद्वृत्तानां महीक्षिताम्।
स ब्रह्मनदमासाद्य स्नातो विप्रानपूजयत्।।

।। २१७।।

कियन्ति किञ्च तत्रैव दिनानि दिनकृन्महाः।
स ब्रह्मनदकल्लोलकिर्मीरिततटेऽवसत्।।

।। २१८।।

इतः पुनः काविलतः पराजिते
हुसेनखाँ नाम्नि निमील्य तिष्ठति।
तुरष्कवास्तोष्पतिराकुलान्तरो
महीन्द्रमह्वास्त महेन्द्रविक्रमम्।।

।। २१९।।

बरूथिनीं ब्रह्मनदोपकण्ठतः
समुत्समुत्थाप्य समन्ततो वहन्।
चचाल दिल्लीदयितेन सन्निधा-
वनुष्ठिताहुतिररिन्दमो नृपः।।

।। २२०।।

तुरङ्गमव्यूहखुरोद्धतैरलं
रजोभरैर्धूसरकेतुधोरणिः।
अतीत्य मार्गं मृगराजचङ्क्रमः
क्रमेण दिल्लीं प्रविवेश पार्थिवः।।

।। २२१।।

पुराङ्गनाभिः परिपीतयौवनः
समुच्छलच्चामरवीजितच्छविः।
स सप्तकक्षाः समतीत्य सायुधो
ननाम रामो नवरङ्गमग्रतः।।

।। २२२।।

नमन्तमासामजयोज्ज्वलं नृपं
निपीय संम्राडनिमेषया दृशा।
त्वयाऽस्मिवीरेण जयीति तं स्तुव-
न्नितो निषीदेति पुरो न्यवेशयत्।।

।। २२३।।

समर्च्य तं सत्क्रियया विशिष्टया
कथाप्रसङ्गैः समयं व्यतीत्य च।
न्ययुङ्क्त दिल्लीशतमन्युरादृतो
विमर्दितुं काविलमाविलं परैः।।

।। २२४।।

जयात्मजोऽप्यर्कवरात्मजार्थितो
लघु प्रतस्थे विजयाय काविलम्।
नहि क्षमन्ते प्रभुणा प्रचोदिता
विलम्बमुद्दामकुलोद्भटा भटाः।।

।। २२५।।

ततो हरिप्रस्थपुरात्पुरुक्रमो
बलैर्विनिर्गत्य गतिः सतामहो।
स विष्णुसिंहेन सहायवानलं
रयादयात्काविलदेशसम्मुखः।।

।। २२६।।

महीपतेरध्वनि मत्तकुञ्जर-
स्रवन्मदैः पङ्किलभावमृच्छति।
महाहवोपस्करभारवाहिना
स्खलत्पदन्यासमयुः क्रमेलकाः।।

।। २२७।।

स काविलं प्राप्य हिमाविलं बली
व्यधत्त युद्धं प्रतियोधिभिस्तथा।
नवैर्ननु प्राघुणिकैस्ततान्तरा
नितान्तमासीदमरावती यथा।।

।। २२८।।

हता रणे रामनृपेण काबिला
दिवं विमानैरयुरप्सरोवृता:।
गुरोर्गृहं दुश्च्यवनेन लम्भिता
शिशिक्षिरे संस्कृतवाचमुच्चकै:।।

।। २२९।।

अहह निजनिवेशाद्विश्लथश्मश्रुकेशा
भयविघटितवेषा जातकम्पप्रवेशा:।
कथमपि हतशेषास्तं प्रणेमुर्विशेषा-
द्विलसति विजितानां प्रायशो रीतिरेषा।।

।। २३०।।

इति विजयमवाप्य क्ष्मापति: काविलान्त:
क्षततनुरसिघातैर्गोस्तनीमण्डपस्थ:।
समधिकमभियोद्धुं बङ्गसेन्द्रेण साकं,
रिपुकुलकरिसिंहं विष्णुसिंहं न्ययुङ्क्त।।

।। २३१।।

नरपतिमथ नत्वा पादयोर्विष्णुसिंह:
कवचकलितमूर्तिर्युद्धविद्याविदग्ध:।
अनुपवनविधूतै: केतुभिर्दिक्षु कूर्मै-
र्विधदिव................................।।

।। २३२।।

बलकलकलकूर्दत्कीशबुङ्कालपूर्णा
निविडविपिनवीथीर्लोकयंल्लोलदश्वः।
कटुककटककक्षालक्षितानेकलक्ष-
प्रतिभटविकटं द्राग्बङ्गसं विष्णुराप।।

।। २३३।।

अन्योन्यमुक्तशरवर्षनिकृत्तकुम्भि-
कुम्भस्थलोच्छलितमौक्तिकपुञ्जमञ्जु।
प्रावर्तत प्रधनमस्य परैः परेत-
पोलोदरम्भरिकबन्धकदम्बभीमम्।।

।। २३४।।

कीर्तिं करिष्णुरसहिष्णुररिप्रकर्षं
विष्णुः स जिष्णुरुचिराहवसञ्चरिष्णुः।
तस्तार तारतरहुङ्कृतिभिः कृपाण-
कृत्तैः शिरोभिरवनीं द्विषदावलीनाम्।।

।। २३५।।

तृष्णार्त्तराक्षसपरम्परया समन्ता-
दध्यासितोन्नततटा विकटास्यपङ्क्त्या।
निश्चक्रमुः क्षतगजाश्वभटाङ्गकूटा-
त्कोष्णाः क्षणात्क्षतजशैवलिनीप्रवाहाः।।

।। २३६।।

इत्थं प्रमथ्य रणसिन्धुमुदग्रखड्ग-
मन्थेन शत्रुमकराकुलमाशु विष्णुः।
देवेन्द्रवृन्दकलनीयचरित्रराशि-
रुच्चैः स्थिरां स विजयश्रियमाससाद।।

।। २३७।।

गुल्मं स तत्र विनिधाय निजं कुमारः
शत्रुप्रहारविहितव्रणमुग्धमूर्त्तिः।

आगत्य काबिलमनाविलकीर्तिरारात्
स्वं श्लाघमानमवनीदयितं ववन्दे।।
**।। २३८।।**

श्रीविष्णुसिंहविजयं विजयोपमर्द्धिः
श्रुत्वा मुदाविदलितव्रणमर्मदुःस्थः।
अम्बावतीमव चिरं रुचिरोऽसि वत्स
व्याहृत्य भूपतिरिति श्लथचेतनोऽभूत्।।
**।। २३९।।**

**श्रीमत्कुन्दननन्दनवैद्य श्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे नवमः सर्गः समाप्तिमापेदे।।**

****

## दशमः सर्गः

।। १।।

रामेऽमरावतीं याते विष्णुसिंहो दधद्धृतिम्।
निर्वर्तयितुमारेभे प्रक्रियामौर्द्धदैहिकीम्।।

।। २।।

विधिवन्मुण्डितश्मश्रुरयसव्योपवीतवान्।
दशगात्राधिकं चक्रे पुरस्कृतपुरोहितः।।

।। ३।।

अस्मिन्पुनः कथासन्धौ नवरङ्गो बलैः सह।
प्रतस्थे दक्षिणामाशां दक्षिणो जेतुमुच्चकैः।।

।। ४।।

एतस्मिन्नन्तरे दिल्लीं बुद्ध्वा प्रोषितभर्तृकाम्।
विश्वतो रुरुधुर्जट्टाः साध्वीमिव महाविटाः।।

।। ५।।

श्रुत्वाऽथ नवरङ्गेन्द्रो जट्टानां तद्व्यतिक्रमम्।
स्पशं सम्प्रेषयामास कूर्माह्वानकृते कृती।।

।। ६।।

स्पशः स दक्षिणात्क्षिप्रं प्रतस्थे कार्यसिद्धये।
उल्लङ्घ्याध्वानमापेदे कियद्भिः काबिलं दिनैः।।

।। ७।।

निशम्य विष्णुसिंहेन्द्रो निदेशं चक्रवर्तिनः।
संमन्त्र्य मन्त्रिवर्गेण लिलेख छदनं यथा।।

।। ८।।

स्वस्ति श्रीनवरङ्गेषु रणरङ्गेषु रिङ्गतु।
काबिलाद्विष्णुसिंहस्य नमस्कारपरम्परा।।

।। ९।।

निक्षिप्य मां महाराजो भवतां पाणिपल्लवे।
काबिलं कालयित्वाजौ स्वर्गतामुत्स्फुटक्षताः।।

।। १०।।

तदद्य सर्वशस्तेषां कृत्वा द्रागुत्तराः क्रियाः।
गन्तास्मि जट्टकाञ्जेतुं शङ्कां कुरुत मा वृथा।।

।। ११।।

विलिख्येति दलं विष्णुस्तथा सम्मुद्रय लाक्षया।
स्पशेन प्रेषयामास संम्राजे सत्कृतात्मना।।

।। १२।।

ततः समाप्य नृपतेः श्राद्धानि श्रद्धया शुचिः।
निवेश्य गुल्ममात्मीयं सानीकः काबिलाद्ययौ।।

।। १३।।

चीत्कारैः करिणामश्वहेषितैर्भटगर्जितैः।
स प्रतस्थेऽवधिरयन्रोदसीं रोदिताहितः।।

।। १४।।

पुराणि द्विषतां कुर्वन्वनानि वनजेक्षणः।
जट्टैर्जन्यं करिष्णुर्द्राग्विष्णुः पन्थानमत्यगात्।।

।। १५।।

इतः पुनर्महोष्णीषा जट्टा घट्टितपट्टिशाः।
कूर्मप्रस्थानमाकर्ण्य मन्त्रार्थं विविशुः सदः।।

।। १६।।

सभायामुपविष्टेषु जट्टेषु तदधीश्वरः।
श्रूयतामित्युदीर्योच्चैर्व्याहर्त्तुमुपचक्रमे।।

।। १७।।

अस्त्येव विदितं वीरा विष्णुरेति महाबलः।
तदद्य किं नु कर्त्तव्यं स्वाकूतं ब्रूत मा चिरम्।।

।। १८।।
स हि कूर्मकुलाकाशपूषणो दूषणोज्झितः।
बङ्गसाधिपदर्पाद्रिपविःप्रधनपण्डितः।।

।। १९।।
व्यरंसीदेवमाभाष्य जट्टराजः शुचिस्मितः।
अर्थजिज्ञासवो धीरा न बहु प्रलपन्ति हि।।

।। २०।।
बीजमावाप्य मन्त्रस्य विरते सति जट्टपे।
जट्टाः संरम्भसंघट्टाः स्वं स्वमुच्चैर्मतं जगुः।।

।। २१।।
तदानीं तत्र केऽप्युच्चैश्चक्षुर्विस्फार्य लोहितम्।
योद्धव्यमेव सम्भूय राद्धान्तमिति मेनिरे।।

।। २२।।
केचित्तु ज्ञातकूर्मेन्द्रवीर्या दशमिनस्तदा।
क्रियतां सन्धिरेवेति श्रेयस्कामाश्चचक्षिरे।।

।। २३।।
प्रत्यूचुः केऽपि बेदारवतेनाऽपि तादृशाः।
जन्येष्वनिर्जिता यूयं विष्णोर्विभ्यां किं मुधा।।

।। २४।।
इति प्रत्यहमन्योऽन्यं मन्त्रयन्तोऽप्यनेकधा।
जग्मुर्न निश्चयं जट्टा भये धीरवसीदति।।

।। २५।।
विष्णुसिंहस्तु सैन्येन सर्वतो रुन्धता दिशः।
संववल्ग वली वल्गावक्रग्रीवार्वतावृतः।।

।। २६।।
सहसा सहसाहीन्द्रद्वेषिभिर्ज्जट्टदेशिभिः।
शस्त्रोद्भटभटग्रामः संग्रामः समपद्यत।।

।। २७।।
प्राप पत्तिपरं पत्तिं हयस्थो हयसादिनम्।
स्यन्दनी स्यन्दनारूढं गजस्थोऽपि गजस्थितम्।।
।। २८।।
कोऽपि कस्यापि मूर्द्धानं चकर्त्त रणमूर्द्धनि।
कृत्तमूर्धा पुनः सोऽपि तस्य मूर्द्धानमप्यहो।।
।। २९।।
जघ्नुरेकमनेकेऽपि तद्वदेकोऽप्यनेकशः।
बहवोऽपि बहूनित्थं निर्मर्यादमभूद्रणः।।
।। ३०।।
केनाप्येकेन वीरेण शक्तिः शक्त्या प्रयोजिता।
ममज्ज हृदये शत्रोः सलिले शफरी यथा।।
।। ३१।।
जलमानय मे मङ्क्षु किमलं वीर ताम्यसि।
हतोऽस्मि हा क्षतार्तानामिति शुश्रुविरे गिरः।।
३२।।
जट्टेषु क्षीयमाणेषु कच्छपा जितकासिनः।
दुन्दुभीन्ध्वनयन्ति स्म यन्ति स्म महतीं मुदम्।।
।। ३३।।
विष्णुसिंहं पुरस्कृत्य सामन्तान्पटलीकृतान्।
जवारिदुर्गमग्न्यस्त्रैर्घटमानो व्यघट्टयत्।।
।। ३४।।
इत्थं विजित्य जट्टानामन्वयं नन्वयं बली।
जट्टेन्द्रमौलिमणिभिर्नीराजितपदो ययौ।।
।। ३५।।
द्वे वा तिस्रो निशा नीत्वा पथ्यसौ कथ्यविक्रमः।
अम्बावतीं समासाद्य राजासीद्राजभिर्नुतः।।

।। ३६ ।।

सप्रसादं हरिप्रस्थहरिणा कृतसत्कृतिः।
भेजे राज्यश्रियं विष्णुर्जिष्णुश्रीः कृष्णसिंहजः।।

।। ३७।।

स राजा पञ्चभिदारैर्गुणोदारैः समादृतः।
तृतीयमर्जयामास पुरुषार्थमनारतम्।।

।। ३८।।

अथेन्द्रकुँवरा राज्ञी राष्ट्रोढकुलसम्भवा।
गर्भं बभार महितमहितानुशयप्रदम्।।

।। ३९।।

सा लक्ष्यत विलक्षाभमुखमुग्धाऽल्पमण्डना।
अतन्द्रचन्द्रा विरला नक्षत्रा क्षणदा यथा।।

।। ४०।।

गर्भोद्वहनखेदेन तनुस्तस्यास्तनुर्ननु।
कञ्जकिञ्जल्कितव्यञ्जत्कर्णिकेव व्यराजत।।

।। ४१।।

अलङ्कृतीर्विजहतीर्गुर्वीरुर्वीपतेः प्रिया।
निसर्गसुन्दरैरङ्गैः शोभामनुपमां दधौ।।

।। ४२।।

चकासाते कुचौ तस्याः पीवरौ श्यामचूचुकौ।
दुग्धमुग्धाविव घटौ नीलाश्मपिहिताननौ।।

।। ४३।।

बलिष्ठसत्त्वसम्बन्धात्तस्याः प्रबलवैभवम्।
उदरं कलयामास बलिध्वंसमसंशयम्।।

।। ४४।।

तस्याः सीमन्तसंस्कारं चक्रे कूर्मपतिर्मुदा।
शुश्रुवेऽन्वर्थनाम्नी सा तदा सीमन्तिनी परम्।।

।। ४५ ।।

यथोत्साहं यथाप्रीति यथासम्पत्ति पार्थिव: ।
क्रमान्निर्वर्तयामास कर्म पुंसवनादिकम् ।।

।। ४६ ।।

वैद्यै: कुमारकर्मज्ञैर्गणकैरिष्टशोधिभि: ।
श्रितेऽरिष्टगृहे राज्ञी विवेश प्रसवोन्मुखी ।।

।। ४७ ।।

तत्र कृत्तनखा: प्रौढा गर्भावक्रान्तिकोविदा: ।
आसन्विश्रम्भशलिन्यो द्वित्रा: सन्निहिता: स्त्रिय: ।।

।। ४८ ।।

सप्रच्छदोपधानश्रीरन्तिकस्थहसन्तिका ।
उट्टङ्कितविशल्याङ्का शय्यारिष्टगृहे बभौ ।।

।। ४९ ।।

लोकोल्लासमये शुद्धसमये समसूत सा ।
इन्दिरेव स्मरं राज्ञी सुतं तेजसि विश्रुतम् ।।

।। ५० ।।

शराब्ध्यद्रीन्दुशरदि मार्गे पक्षे शशिद्विषि ।
षष्ठ्यां शनौ गुहतिथावश्लेषायां तुलातनौ ।।

।। ५१ ।।

भामनाडीष्वितास्वर्कोदयात्त्रिंशत्पलेषु च ।
महिष्यां विष्णुसिंहस्य पुत्ररत्नमजायत ।।

।। ५२ ।।

कुजार्किकेतवो लग्ने धनेज्ञेनौसभार्गवौ ।
सुखे गुरु: कलत्रे तु राहू राज्ये शशी शिशो: ।।

।। ५३ ।।

भण्डताण्डवभव्यानि ध्वनत्तूर्याण्यनेकश: ।
निरर्गलानि न ममुर्मङ्गलानि गृहे गृहे ।।

।। ५४।।

तानि तान्यपि भूतानि तदा सद्‌गुणवन्त्यभुः ।
भवो हि तादृशां लोककल्याणाय प्रकल्पते।।

।। ५५।।

शय्यालोलस्य बालस्य बालार्कमसृणं नभः ।
निशीथदीपदीप्तीनां चन्दिरत्वमचूचुरत्।।

।। ५६।।

तेजस्विना कुमारेण प्रापदुच्चैः प्रभां प्रसूः ।
प्रभाकरेण नव्येन प्रभाते द्यौरिवामजा।।

।। ५७।।

ग्रहघ्नधूपधूम्रान्तं विकोशासिविकासितं।
सौभाग्यमोदकामोदं मुदं सद्म ततान तत्।।

।। ५८।।

द्विषत्तमांसि बालार्केऽभ्युदिते तत्र तत्रसुः ।
सुहृद्वक्त्रसरोजानि परितः प्रचकाशिरे।।

।। ५९।।

आकुञ्चिताङ्गुलिर्बालो बालार्कमसृणच्छविः ।
बभाविव द्विषल्लक्ष्मीकेशाकर्षणकौतुकी।।

।। ६०।।

बलिना कलिनाग्रस्तः स्रस्तपादपरम्परः ।
मर्मतः प्राप धर्मोऽपि शर्मसत्कर्मवर्तनात्।।

।। ६१।।

ववृधे सोऽधिकं जातः जातकर्मादिसंस्कृतिः ।
नृपेन्द्रतनुजो विन्दन्मनूक्षणमनुक्षणम्।।

।। ६२।।

द्विषद्गजाञ्जयेदेष सिंहरंहा रणेऽर्भकः ।
इत्यालोच्य नृपो नाम्ना जयसिंहं तमभ्यधात्।।

।। ६३।।

विप्रान् संपूज्य बहुशः सुतजन्मनि पार्थिवः।
अमीभिर्मुदितैर्दत्ताः स्वीचकार शुभाशिषः।।

।। ६४।।

दोलालोलद्युतिर्बालो मणिमालोल्लसद्गलः।
पित्रोरमन्दमामोदमाततान कुतूहलैः।।

।। ६५।।

सुतिथौ पायसाद्यश्नन् स्वर्णस्थालीस्थमर्भकः।
पुपोष दोषनिर्मुक्तैर्वृद्धिमङ्गैर्यथायथम्।।

।। ६६।।

जातचूलो लिपिग्राही कुमारः शुभलक्षणः।
अचिरेणैव कालेन महाबुद्धिरजायत।।

।। ६७।।

प्रकामं कामकान्तश्रीर्विलोलत्काकपक्षकः।
हर्षमङ्कुरयामास न कस्य नृपनन्दनः।।

।। ६८।।

अथापरं प्रसूते स्म सुतं राज्ञी शुभोदया।
यः प्रशस्तैर्गुणैस्तैस्तैरनुचक्रे तमग्रजम्।।

।। ६९।।

जन्माऽस्य रसपाथोधिशैलशीतांशुवत्सरे।
चैत्रे चान्द्रे दले षष्ठ्यां गुरौ हरिणशीर्षभे।।

।। ७०।।

निशारम्भाद् व्यतीतासु षड्विंशतिघटीष्वथो।
त्रिंशत्पलेषु मिलितं व्रजमोहनसङ्ग्रहे।।

।। ७१।।

बुधेज्यभृगवः कुम्भे मीनेऽर्कस्तमसा सह।
सोमाङ्गारौ वृषे केतुः कन्यायां वृश्चिके शनिः।।

।। ७२।।

द्युतिविद्योतितदिशं विजयोर्ज्वस्वलाकृतिम्।
एनं चकार कूर्मेन्द्रो नाम्ना विजयसिंहकम्।।

।। ७३।।

दस्राविव भिदाबुद्धिं तौ न धत्तः स्म पश्यताम्।
तथापि कापि विच्छित्तिस्तयोरासीद्विभेदिका।।

।। ७४।।

अभातामर्भकौ भाभिः सूर्याचन्द्रमसाविव।
आभ्यां च विष्णुभवनं ताभ्यामिव वियद्बभौ।।

।। ७५।।

पितुः पुरः कुमारौ तौ शुशुभाते शुभोदयौ।
पुरस्तादिव पीयूषकिरणस्य पुनर्वसू।।

।। ७६।।

पीताम्बरावृते बालौ पितुरङ्के विरेजतुः।
कल्पभूमिरुहौ स्वर्णवेद्यामङ्कुरिताविव।।

।। ७७।।

कुमारकौतुकालोकी कालं न बुबुधे नृपः।
महीयानप्यनेहायन्नहि विज्ञायते सुखे।।

।। ७८।।

पुत्रोत्पत्तौ प्रहृष्टात्मा संयतान्स विमोचयन्।
व्यधात् कारोदवसितं छागमात्रावशेषितम्।।

।। ७९।।

कुमारयोः कलालापकलापाकर्णनोत्सवैः।
अन्तःपुरमभूदन्तःपुरुप्रीतिपरम्परम्।।

।। ८०।।

ताभ्याममंस्त भूजानिरात्मानं धुरि पुत्रिणाम्।
पुरा प्रद्युम्नसाम्बाभ्यां यथा गरुडकेतनः।।

।। ८१।।

अभूतामद्भुतस्फूर्ती राज्ञो दुहितरौ ययोः।
प्रथमा नूनममरकुँवरा भक्तिरप्यनु।।

।। ८२।।

यथासत्कारममरकुँवरा स्फीतकीर्तये।
अदायि बुद्धसिंहाय बुन्दीपत्तनभूभुजे।।

।। ८३।।

अपत्यान्येवमुत्पाद्य प्रत्युत्पन्नमतिः प्रजाः।
जुगोप लोपितारातिर्माऱात्तिग्मगुणो नृपः।।

।। ८४।।

पर्वणीग्रामवास्तव्यः स्तव्यधीर्भट्टमाधवः।
महाराष्ट्रकुलाब्धीन्दुः कूर्मेन्दुं सहसासदत्।।

।। ८५।।

तं भट्टजितमभ्यर्च्यमभ्यर्च्य स्थितमासने।
ससर्ज गिरमुत्सर्पत् स्मितश्रीः क्ष्मापुरन्दरः।।

।। ८६।।

स्वागतं भवते विद्वन्समाज्ञापय मामपि।
त्वादृशां को न कुर्वीत वाक्यं वेददृशां सुधीः।।

।। ८७।।

इत्येव वाचमुच्चार्य तूष्णीमास महीवृषा।
पुरस्ताद्विदुषां प्रौढमयुक्तं बहुभाषणम्।।

।। ८८।।

श्रुत्वा श्रुत्यर्थविद् भट्टो भट्टारकवचोऽद्भुतम्।
आविष्कुर्वन्नभिप्रायमुच्चैर्वाचमुवाच सः।।

।। ८९।।

आकर्षिता महाराज यशोभिस्तावकैर्वयम्।
उपेतास्त्वामयांसीव चुम्बकाश्मभिरुल्बणैः।।

।। ९०।।
भक्तिलोकोत्तरा भूप भवदीया द्विजन्मसु।
निराधारा कलावद्य स्थिता ब्रह्मण्यतास्वपि।।

।। ९१।।
श्रीविष्णो विष्णुमपि तं गुणैर्ह्रेपयसि ध्रुवम्।
नम्यसे त्वं बलव्यूहैर्बलिस्तेन प्रणम्यते।।

।। ९२।।
तव प्रतापसूर्येण यशश्चन्द्रेण चोद्यता।
बोद्धुं निद्रातुमपि वा पङ्कजानि प्रपेदिरे।।

।। ९३।।
मूढे व्युत्पत्तिमाधातुं शक्तिर्मे गुरुसेवया।
किमन्यदत्र युष्माकं संशयश्चेत् परीक्ष्यताम्।।

।। ९४।।
ब्रुवाणमिति भट्टेन्द्रं जगाद जगतीपतिः।
सितीभावं सभामुच्चैर्लम्भ्यन् स्मितदीप्तिभिः।।

।। ९५।।
किमत्र संशयो ब्रह्मन् सर्वं सम्भाव्यते त्वयि।
जयन्ति जातिमाहात्म्याद् ब्राह्मणेष्वेव सिद्धयः।।

।। ९६।।
मद्भावभाजनं काञ्चित् स्त्रियमध्यापय द्रुतम्।
द्रष्टुमुत्कण्ठितोऽस्म्यद्य भारतीवैभवं तव।।

।। ९७।।
तद्गच्छ कापि वामाक्षी सद्मन्येष्यति तावके।
यतात्मा पाठय क्षिप्रं तां ततावरणस्थिताम्।।

।। ९८।।
इत्युक्त्वा चञ्चदाश्चर्यसमुद्रतरदन्तरः।
सत्कृत्य विससर्ज द्राङ् माधवं क्ष्माधवो मुदा।।

।। ९९।।
इत्थं विसृज्य भट्टेन्द्रं विष्णुर्विष्णुचमत्कृतिः।
कामप्याज्ञापयामास पुरन्ध्रीं पुरतः स्थिताम्।।
।। १००।।
को दोषः सुभ्रु गच्छाऽद्य गुरोः सद्म मदाज्ञया।
सावगुण्ठपटा तत्र काव्यकौशलमभ्यस।।
।। १०१।।
पार्थिवेनेति साऽदिष्टा प्रमदा प्रमदाकुला।
रथमास्थाय संवीतं वाससाऽगाद् गृहं गुरोः।।
।। १०२।।
उपाध्यायं समासाद्य सा राजपरिचारिका।
स्थितेषु सम्यगपठदवरोधाधिकारिषु।।
।। १०३।।
अभ्यसन्ती तदाभ्यासे काव्यानि कमलेक्षणा।
बभावुपसुराचार्यं पठन्तीव पुलोमजा।।
।। १०४।।
आम्रेडितोद्गताकम्पस्रस्तकर्णोत्पला मुहुः।
अध्याप्यमाना गुरुणा व्युत्पत्तिं प्राप कामपि।।
।। १०५।।
कदाप्येनां जलार्द्राभिर्वीजयन्तीं शनैः शनैः।
कच्छ पप्रच्छ जिज्ञासुरभ्यासं देवभाषया।।
।। १०६।।
उत्तरं कलयन्ती सा गिरा छन्दोनिबद्धया।
राजानं रञ्जयामास रञ्जगञ्जनलोचना।।
।। १०७।।
निशम्य संस्कृतगिरो मुखात्तस्या विनिर्यतीः।
चमत्कारान्वितमनाः प्रससाद विशिष्य सः।।

।। १०८।।
महार्हं हारमुत्तार्य कण्ठादुत्कण्ठितो नृपः।
दत्वा विसर्ज्य तामन्तः क्ष्माधवोऽह्वास्त माधवम्।।
।। १०९।।
छत्रच्छविमहोष्णीषः साक्षादिव बृहस्पतिः।
माधवः क्ष्माधवाऽऽहूतः प्राप दूतेन वेदितः।।
।। ११०।।
अधोवसनमागुल्फं पट्टसूत्रदशं दधत्।
स कौङ्कुमोपवीतश्रीर्देवेनादर्शि दूरतः।।
।। १११।।
महाराष्ट्रद्विजं दृष्ट्वा महाराष्ट्रपतेरभूत्।
किमेष मूर्तिमानेति शान्तो रस इति स्म धीः।।
।। ११२।।
आगच्छन्नच्छमहसं दूरात्कच्छपतिं मिषन्।
आसीत्स पर्वणिकरो विस्मयातङ्कगोचरः।।
।। ११३।।
वहन्सुदर्शनं वज्रवलयं दोष्णि दुर्धरम्।
विष्णुः किमेष जिष्णुर्वा तेनाऽतर्कि तदा नृपः।।
।। ११४।।
मयाध्यापयता राज्ञः स्त्रियं नो साध्वनुष्ठितम्।
यतः स्त्रीजातिसम्पर्कं कटूदर्कं विदुर्विदः।।
।। ११५।।
कर्त्तुमर्हमकर्त्तुं वाऽन्यथा कर्तुमपीश्वराः।
विवेकं न प्रकुर्वन्ति राजानो राजदोजसः।।
।। ११६।।
इत्यादिभिरसौ तैस्तैः संशयैर्व्यग्रधीर्द्विजः।
उपेत्य भूमिपतये ददावाशिषमुच्चकैः।।

।। ११७।।

नमस्ते, पीठमध्यास्व धीधिक्कृतगुरो गुरो।
इत्यादृत्य नृपो नन्दन्नासने तं न्यवीविशत्।।

।। ११८।।

अथ कूर्मेन्द्रविप्रेन्द्रावुभावध्यासितासनौ।
सुरेश्वरसुराचार्याविव तत्र विरेजतुः।।

।। ११९।।

नत्वा क्वाप्यनतेनाऽपि नतेन शिरसा शनैः।
बभाषे भट्टमुर्वीन्द्रः सभक्तिविनयस्मितम्।।

।। १२०।।

ज्ञाताऽद्य भवतः शक्तिः शिष्याध्यापनकर्मणि।
अतः परमिमौ विद्वन्कुमारौ मम शिक्षय।।

।। १२१।।

अत्र यः कोऽपि पठने न कुर्याद्भवतो वचः।
गुरो सन्ताड्य सन्ताड्य शिक्ष्यः सोऽपि कुशिष्यकः।।

।। १२२।।

इत्थमाज्ञाप्य भूपालः पुत्रावस्मै समर्प्य तौ।
प्रददौ राजगुरुतां दाक्षिणात्याय दक्षिणाम्।।

।। १२३।।

सोऽपि सङ्गृह्य भट्टेन्द्रः कुमारौ लिपिशिक्षितौ।
सत्यश्लाघी पुनः क्षोणीमघवन्तमभाषत।।

।। १२४।।

पाठकाले मयाऽवश्यं ताडनीयाविमौ शिशू।
शास्त्रेषु नान्यथा स्फूर्तिर्भविष्यति भुवः पतेः।।

।। १२५।।

जनः स्याद्वा सुतः स्याद्वा मदागस्ते श्रुतौ पतेत्।
तदा मयि भवद्वृत्तिः कीदृशी स्याद्विविच्यताम्।।

।। १२६।।
माधवस्य वचः श्रुत्वा क्षमावान्स क्षमाधवः।
मुद्रां मुमोच मौनस्य मुद्राजितमुखद्युतिः।।

।। १२७।।
अवैमि गुरुणा शिष्यस्ताडितस्तरति श्रुतम्।
तरलस्तुरगस्तुङ्गं प्राकारमिव वेगतः।।

।। १२८।।
तस्मादधीतिसमये ताडनीयौ त्वयाऽर्भकौ।
शाणक्षुण्णो मणिग्रावाऽप्युत्कर्षमधिरोहति।।

।। १२९।।
इति प्रोत्साह्य विद्वांसं विष्णुरोमिति वादिनम्।
आदिदेश कुमारौ तौ प्राञ्जली पुरतः स्थितौ।।

।। १३०।।
अहो वत्सौ वचोऽस्माकं शृणुतं हितमुच्चकैः।
एक एष गुरुर्भक्त्या सेवनीयः शमाऽऽप्स्यथः।।

।। १३१।।
आरभेतां ततः पित्राज्ञया तौ पठनं क्रमात्।
गुरुरप्यात्मकलया पाठयामास सन्ततम्।।

।। १३२।।
विद्याः सुखमवेदिष्टां दिष्टेन कियताऽपि तौ।
संस्कारशालिनां विद्याः सद्य एव स्फुरन्ति हि।।

।। १३३।।
अथो गुरुः परीक्षायां तौ परीक्ष्य प्रमादिनौ।
अन्तर्मृदुर्बहिश्चण्डश्चपेटाभिरचेतयत्।।

।। १३४।।
चपेटां गुरुणा दत्तां लब्ध्वा ज्येष्ठस्तयोर्द्वयोः।
रुषे सञ्चरितुं स्वान्तरवकाशं शनैर्ददौ।।

।। १३५।।
सहसा साहसी रोषलोहितायतलोचनः।
जज्वाल जयवर्मा द्राग् घृतसिक्तो यथानलः।।
।। १३६।।
प्रपेदे कोपकरुणाशबलीकृतमानसः।
दत्वा मुष्टिमसेर्मुष्टौ हन्तुं मोक्तुं च तं जयः।।
।। १३७।।
जयस्य वीक्ष्य संरम्भं गुरुः स गुरुवेपथुः।
व्याजं कञ्चिदुपन्यस्य भीतो द्रुतमपासरत्।।
।। १३८।।
वेगात्तमुपसर्पन्तं गृहीत्वा विजयो जयम्।
प्रणम्य ब्राह्मणवधात्प्रयत्नेन न्यवर्तयत्।।
।। १३९।।
ततः स शान्तसंरम्भो भीतः पित्रे निवेदनात्।
जनन्यै जोषमाचख्यौ रोषचेष्टितमात्मनः।।
।। १४०।।
व्यतिक्रममथाकर्ण्य प्रसूः पुत्रस्य तादृशम्।
धिक् त्वामिति विनिन्दन्ती तमुपालभत स्थितम्।।
।। १४१।।
किमर्थं मूढ भवता गुरुं हन्तुं मतिः कृता।
चपेटा गुरुणा दत्ताऽविद्याविद्याप्रकाशिका।।
।। १४२।।
मात्रा मुहुरुपालब्धः प्रतिजज्ञे जयः क्रुधा।
नन्वहं प्रहरिष्ये स पुनश्चेत् प्रहरिष्यते।।
।। १४३।।
क्षत्रिया वयमन्यस्य सहेम प्रहृतिं कथम्।
क्षत्रियस्तु स एवोक्तो धर्षणां यो न मृष्यति।।

।। १४४।।
नातः परं पठिष्यामि मास्तु मत्तो गुरोर्वधः।
शस्त्रोपजीविनां मातः शास्त्रं शस्तं न कृत्स्नशः।।
।। १४५।।
प्रतिज्ञां तस्य निश्चित्य सा तमाश्वास्य भूरिभीः।
राज्ञे निवेदयामास तत्सर्वं सुतचेष्टितम्।।
।। १४६।।
निशम्य साहसं सूनोर्दूनो मनसि पार्थिवः।
चिन्ताकुलतया तस्थौ निश्चलः स्तम्भवत् क्षणम्।।
।। १४७।।
अथो सुतं द्विजातिं च सममेव समाह्वयत्।
एत्य तौ तेन तू राज्ञे नतिं, सोऽपि शुभाशिषः।।
।। १४८।।
विष्णुना जिष्णुसदृशा स दृशा वीक्ष्य वक्रया।
जयसिंहोऽथ जगदे जगदेकतरस्विना।।
।। १४९।।
अरे दुर्वृत्तवृत्तिस्ते श्रूयते कलुषा गुरौ।
दण्ड्योऽसि किन्तु किं कुर्यां ज्येष्ठः पुत्रोऽसि मे यतः।।
।। १५०।।
निर्भर्त्स्र्येति जयं देवो भूदेवं पृच्छति स्म तम्।
उच्यतां मुच्यतां भीतिः कथं कोपः शिशोरिति।।
।। १५१।।
आज्ञापितोऽथ राज्ञा स प्राणभीवेपिताञ्जलिः।
वक्तुमारभत स्पष्टं यथावद् भट्टसत्तमः।।
।। १५२।।
पाठे प्रमादमसकृद् वीक्ष्य मिथ्यैव कुप्यता।
सकृन्मया मनागेव ताडितोऽसौ त्वदाज्ञया।।

।। १५३।।
अतः परं प्रभोराज्ञा यथा स्यादिति स द्विजः।
निवेद्य मौनमाधत्त सूरयः सारशंसिनः।।

।। १५४।।
श्रुत्वा सत्यं वचः प्रीतः क्ष्माधवो माधवोदितम्।
क्षमस्वेति तमाश्वास्य सान्त्वपूर्वमभाषत।।

।। १५५।।
अतः परं त्वया विद्वन्नध्याप्यो विजयः परम्।
जयस्तु चण्डचरितो विश्वासं जातु नार्हति।।

।। १५६।।
एवमध्ययनाज्ज्येष्ठं विनिषिध्य तमात्मजम्।
द्विजं च सान्त्वयित्वोच्चैरुदस्थादासनान्नृपः।।

।। १५७।।
अध्यापितस्ततस्तेन गुरुणा विजयस्तथा।
यथा स पाटवं लेभे विद्यासु सकलास्वपि।।

।। १५८।।
परीक्ष्य विजयं राजा प्रीतस्तत्संस्कृतोक्तिभिः।
हिन्दोनपीठसाम्राज्ये श्रीनिवेशी न्यवेशयत्।।

।। १५९।।
समनन्तरमेवाहो जयसिंहं विनीय सः।
उच्चैरम्बावतीपीठयौवराज्येऽभ्यसेचयत्।।

।। १६०।।
गिरा विजयसिंहस्य माधवो माधवाशयः।
हिन्दोनमेव नगरमध्युवास सगौरवम्।।

।। १६१।।
रूप्यकप्रयुतोन्मानं राज्यं हैन्दोनमेत्य सः।
विजयो विजयी नीत्याऽगोपायन्माधवोक्तया।।

।। १६२।।
सङ्कल्प्य विजयो बिल्ल्हीग्रामं स्वगुरवे ददौ।
सोऽपि तं ग्राममासाद्य स्वकुटुम्बं स्वमभीभरत्।।

।। १६३।।
माधवस्य त्रयः पुत्रा बभूवुर्बुधचुञ्चवः।
जयवंशे महाकाव्ये तेषां वर्वर्ति वर्णनम्।।

।। १६४।।
तदीयवंशजा बिल्ल्हीग्राममद्यापि भुञ्जते।
किं च भूमिभृते नित्यमाशिषं च प्रयुञ्जते।।

।। १६५।।
अथासीद्दुःसहो विष्णुर्जयसिंहेन धन्विना।
यथा जिष्णुर्जयन्तेन यथा विष्णुः सुमेषुणा।।

।। १६६।।
श्रीः पतिं स्थविरं हित्वा युवानं पतिमश्रयत्।
गुणलुब्धाः स्त्रियः प्रायो नैकत्र चिरमासते।।

।। १६७।।
राजापि सूनुमाजानुबाहुं वीक्ष्य धुरन्धरम्।
राज्यकार्याण्यशेषाणि तस्मिन्नेवाससंज सः।।

।। १६८।।
इत्थं विभज्य पुत्राभ्यां पदं पृथगिलापतिः।
नवरङ्गाज्ञया भूयो जेतुं काबिलमभ्ययात्।।

।। १६९।।
ययावध्वनि वेगेन साकं भादरसाहिना।
विष्णुसिंहो द्विषद्दन्तावलसिंहो महाबलः।।

।। १७०।।
गच्छतः कच्छराजस्य मार्गे वसतयस्तदा।
नानोपदाभिराक्रीडक्रीडाकल्पाश्चकाशिरे।।

।। १७१।।

बलेन वल्गता विष्णुर्दिक्करिष्णुयशा ययौ।
मथुरां माथुराकीर्णयमुनाघाटवाटिकाम्।।

।। १७२।।

पटेरपुटके टेरः कृत्वा कोलफलान्यलम्।
विष्णुं प्राप यथा विष्णुं सुदामा द्विजसत्तमः।।

।। १७३।।

कर्कन्धुनिभृतं टेरः पटेरकपुटं पटुः।
विष्णवे विनिवेद्येति प्राह पद्यं पदोज्ज्वलम्।।

।। १७४।।

श्रीद्वारिका सा मथुरेयमुत्तमा
स वै सुदामा पुनरस्मि टेरकः।
ते शालयः कोलफलान्यमून्यहो
विष्णुः स विष्णुस्त्वमपीह दीप्यसे।।

।। १७५।।

विष्णुस्तदुक्तिमाकर्ण्य चमत्कृतमनाः कृती।
कोलमेकं समास्वाद्य प्रसशंस पुनः पुनः।।

।। १७६।।

मितभाषी महारम्भस्तं नियन्त्र्य स्वसन्निधौ।
कारयामास तद्ग्रामे तत्स्थानं स्थिरवैभवम्।।

।। १७७।।

श्रियं निक्षिप्य तत्स्थाने विष्णुर्गूढविचेष्टितः।
भोजयामास तं भक्त्या वीजयन्व्यजनानिलैः।।

।। १७८।।

इति सन्तर्प्य सत्कृत्य विससर्ज स टेरकम्।
विदायं किन्तु न ददौ मनागपि महामनाः।।

।। १७९।।
विसर्जितो महीन्द्रेण दारिद्र्योद्रेकदूनधीः।
ध्यानग्रस्तमनाष्टेरः सदनं स्वमुपासदत्।।
।। १८०।।
समीक्ष्य स्थानमात्मीयं सप्तभूमिकमुच्चकैः।
क्व सा कुटीति साश्चर्यो विष्णोः कृत्यममन्यत।।
।। १८१।।
तत्पत्नी सह दासीभिः स्वर्णालङ्कारभूषिता।
सौधाद् बहिर्विनिःसृत्य तं ननाम पतिव्रता।।
।। १८२।।
उदीतविस्मयातङ्को ब्राह्मणो ब्राह्मणीं मिषन्।
निःशेषं श्रुतवृत्तान्तो दध्यौ राज्ञे विशिष्य शम्।।
।। १८३।।
इतः पुनर्नृपो विष्णुस्तर्पिताशेषमाथुरः।
मथुरातो लघु प्रास्थाद् भादरेण कृतत्वरः।।
।। १८४।।
याति विष्णौ बलव्यूहैर्भारभुग्नफणागणः।
शेषोऽप्यशेषयत्नेन दधौ क्ष्मां कथमप्यधः।।
।। १८५।।
हारहरामनोहारि काबिलाघाटवर्त्मनि।
वाहैरुद्विजमानाङ्घ्रि चुक्षुदे हिमसंहतिः।।
।। १८६।।
अध्यध्ववासं पाकाय प्रवृत्तैस्तुहिनस्थले।
यत्नेन महता सूदैरज्वालिषत् चुल्हिकाः।।
।। १८७।।
आसेदिरे स्फुरत्सेवाङ्कूरलुम्बमतल्लिकाः।
हिमाम्बुनिर्झरोद्गाराः काबिलोपान्तभूमयः।।

।। १८८।।

कपिकम्पितसालाग्रा शुकसारणशालिनी।
लङ्केव काबिलक्षोणी क्षोणीन्द्रेण व्यतर्कयत।।

।। १८९।।

आचचाम शनैः कर्षन्गोस्तनीरसशीकरान्।
ललल्लतासुमामोदी श्रमवारिवनानिलः।।

।। १९०।।

क्षमस्व नेक्षितो भ्रातर्वनीदत्तदृशा मया।
इति स्वप्रपदा स्पृष्टमनुनिन्ये भटो भटम्।।

।। १९१।।

मध्येमार्गं मिषन्मीनदृशमुन्मूर्च्छितो भटः।
मेदिनीं प्राप मैरेयमोदोद्यन्मौग्ध्यमन्तिमः।।

।। १९२।।

इत्येष काबिलं प्राप्य विष्णुः शङ्काविलप्रभुम्।
कार्याणि साधयामास नवरङ्गस्य सर्वशः।।

।। १९३।।

तत्रैव विष्णुसिंहेन्द्रो विष्णुस्मृतिपरायणः।
जिष्णोरातिथ्यमापेदे शुद्धसत्कर्मपद्धतिः।।

।। १९४।।

स्वः प्रयाणतिथिर्विष्णोर्वलक्षा माघसप्तमी।
सा तु षड्बाणशैलेन्दुसम्वत्सरसरा श्रुता।।

।। १९५।।

उष्णस्पर्शानि शत्रूणामश्रुवर्षाणि वर्त्तयन्।
प्रजाः प्रहर्षयन्नेष दशवर्षाणि कुं दधौ।।

।। १९६।।

विष्णौ राज्ञि गते स्वर्गं जयसिंहस्तदात्मजः।
अम्बावतीपदे पौरैरभ्यसेचि यथाविधि।।

।। १९७।।

जयसिंहोऽथ राजा सन्सुरराजसमप्रभः।
उपायनानि जग्राह सामन्तसामवायतः।।

।। १९८।।

दधतालमलङ्कारान्मङ्गलानि च गायत।
नटान्नर्तयतेत्युच्चैर्गिरः शुश्रुविरे तदा।।

।। १९९।।

अम्बावती भृशं रेजे प्रतिरथ्यं रथोज्ज्वला।
उत्तुङ्गगोपुरालम्बितोरणावलिशोभिता।।

।। २००।।

यस्य प्रतापदहनो विश्वं व्याप्य ज्वलन्नपि।
दन्दहीति स्म हृदयान्येव विद्विषतामहो।।

।। २०१।।

प्रकृतिप्रत्ययश्लाघी सम्यगर्थं समर्थयन्।
यः परं पाणिनिरिव प्रीणयामास पण्डितान्।।

।। २०२।।

यज्वभिधर्मधीधुर्यैर्वेदसागरपारगैः।
यो द्विजेन्द्रैरलञ्चक्रे ब्रह्मभिर्भूगतैरिव।।

।। २०३।।

ददौ न किं न किं जज्ञौ न दधौ कां च सम्पदम्।
किं धर्मं विदधे नैष न बभौ कैर्गुणैरयम्।।

।। २०४।।

आधिपत्यं प्रपद्याऽसौ राजा ढुण्ढारिनीवृतः।
निरस्ततन्द्रिरुदयं प्रेप्सुरन्वैक्षत प्रजाः।।

।। २०५।।

राज्यासनं समासीनो जयसिंहो जयोद्वहः।
चामरैश्चामरेशश्रीः सामन्तैः समबीजयत्।।

।। २०६।।
जयो जयोर्जितस्तेने गर्वभाजि रिपौ रुषम्।
तथाऽप्यनमति क्षिप्रं क्षुरप्रैस्तत्र पौरुषम्।।
।। २०७।।
यथायथं स सामादीनुपायाननपायिनः।
वीक्षां चक्रे विशेषज्ञश्चक्रेण सह मन्त्रिणाम्।।
।। २०८।।
यन्न कूर्मे न कच्छेऽपि नापि प्रद्युम्नवर्मणि।
न पुनर्मानसिंहेन्द्रे तत्तेजोऽस्मिन् व्यजृम्भत।।
।। २०९।।
कच्छोऽपि न जलप्रायो विष्णुजोऽपि न दर्पकः।
न भीमो विजयज्येष्ठोऽप्यभूदद्भुत एव सः।।
।। २१०।।
यत्प्रतापोऽम्बुधौ खेलन्दधार ध्रुवमौर्वताम्।
सामान्याधिकरण्यं स्याज्जलज्वलनयोः कथम्।।
।। २११।।
प्रत्यर्थिप्राणपवनपानप्रौढमहोद्भवः।
निस्त्रिंशभुजगो यस्य भुजगो भृशमाबभौ।।
।। २१२।।
जयेन्द्रे प्रोषिता राज्ञि गृहेभ्यो विदुषां विपत्।
आसीत्प्राघुणिका किञ्च भूयसी सम्पदन्वहम्।।
।। २१३।।
स्वे स्वे धर्मणि वर्णेषु तिष्ठत्सु जयशिक्षया।
अम्बावतीमधिष्ठातुं न शशाक बली कलिः।।
।। २१४।।
ताततोऽपि ततस्तेने सततं सततं यशः।
पार्वणेन्दुरपि प्राप्तुं तुल्यतां येन नाशकत्।।

।। २१५।।

यत्प्रतापपतङ्गस्य पतङ्गः पुरतः परम्।
दक्षिणाशाश्रितो यद्वन्मान्द्यमाऽऽपि शुचावपि।।

।। २१६।।

मुहुर्मुहुर्यदीयाङ्घ्रिनखशाणविघट्टनात्।
क्ष्माक्षितां मौलिमणयः पुनरुत्तेजनां दधुः।।

।। २१७।।

पावयन् स्वं कुलं तैस्तैः प्रशस्तैः क्षत्रकर्मभिः।
जयो भूजानिरजनि जोषव्याकोशयौवनः।।

।। २१८।।

गतोऽपि नाथ तां सेहे नाथतां न जनेषु सः।
सङ्कल्पाम्बुप्रवाहेण तां निरास यतः स्वयम्।।

।। २१९।।

अप्यौजसा स मित्रश्रीस्तापयन्नपि विद्विषः।
दानाम्भोभिरपःसिन्धोर्वर्द्धयन्नित्यमैधत।।

।। २२०।।

निनाय यो नयेनैव भूतलं विप्रलम्बिताम्।
प्रतिपक्षवधूटीनां चूर्णकुन्तलमप्यहो।।

।। २२१।।

असिर्यस्य द्विषत्कण्ठच्छेदजातपरिश्रमः।
कुम्भीन्द्रमुक्तमुक्तांशुज्योत्स्नाभिः प्राप निर्वृतिम्।।

।। २२२।।

यस्मिन्घ्नति रिपूंस्तेषामवलम्बं विनाऽबलाः।
कालानलं महाहालाहलं वा लघु भेजिरे।।

।। २२३।।

पात्रमात्रं विदेशस्थं भूभुजा दानरज्जुभिः।
आकर्षि स्वे पुरे तस्मात्पुरमस्याऽऽस पात्रयुक्।।

।। २२४।।
दानं किरति कूर्मेन्द्रे हित्वाऽन्यान्दातृपादपान्।
अनेकपममुं भेजुः समन्तादर्थिनोऽलयः।।
।। २२५।।
एकं सहायमालम्ब्य खड्गमस्य क्षतद्विषः।
विभोर्विभुत्वमुद्रैकविजृम्भणमभूद् बलम्।।
।। २२६।।
यत्प्रतापानलो वैरियशोऽब्धिमपि शोषयन्।
विसृजत्यब्धिमपरं तद्वधूवाष्पवारिभिः।।
।। २२७।।
न कोऽप्युवास कारासु तदर्हं कर्म नाऽकरोत्।
वार्ताऽपि दुरदृष्टस्य न वृत्ता राज्ञि राजति।।
।। २२८।।
स्वधर्मं नातिचक्राम प्रजा भूभुजि शासति।
चतुष्पादिव धर्मोऽभादुष्टवृत्तौ कलावपि।।
।। २२९।।
जये जयजीमूतो जहौ जीवनमुच्चकैः।
तलाहतिं तु मुरजः सेहे पौरो न कश्चन।।
।। २३०।।
मन्त्रं प्रयुज्य विज्ञेन नरेन्द्रेणाशु कीलिताः।
सामन्ता न कुलद्वेषं चक्रुः कुण्डलिनः परम्।।
।। २३१।।
त्रीणि लक्ष्याण्यहो कच्छास्तदाज्ञां शिरसा दधुः।
यथा देवपतेर्देवा यक्षा यक्षपतेर्यथा।।
।। २३२।।
दोषोदग्रान् द्विषो जित्वा दण्डप्रभृतिसाधनैः।
जयेनाद्रढि राज्याङ्गं हिताहितविवेकिना।।

।। २३३।।

राज्ञो भाति यशश्चन्द्रे वदनैर्वैरियोषिताम्।
मुक्ताऽपि पुनरग्राहि लोचनैश्चन्द्रकान्तता।।

।। २३४।।

लम्भितो नीतिसरणिं धरणिशतमन्युना।
तथाऽप्यनीतिमानेव ढुण्ढारिविषयो बभौ।।

।। २३५।।

कोमलश्यामलश्मश्रु यूनस्तस्याननं बभौ।
यथा निभृतरोलम्बपुञ्जमञ्जुलमम्बुजम्।।

।। २३६।।

वेधा विधाय मुखमस्य पुनः कराब्ज-
मक्षालयन्निजकमण्डलुजैः पयोभिः।
स्त्यानीबभूव तदधः खलु यो मलांशः
सोऽयं शशी स्फुरति तत्कणिकाश्च ताराः।।

।। २३७।।

आजानुलम्बिनावस्य सद्रत्नाङ्गदरञ्जितौ।
शयौ ताम्राशयावास्तामर्गलानुशयप्रदौ।।

।। २३८।।

नागरीलोलनचनपीतनूतनयौवनः।
राजकन्या महाराजः परिणेतुं प्रचक्रमे।।

।। २३९।।

बनेरनगरीनाथभीमराणेन्द्रनन्दिनीम्।
व्युवाह प्रथमं राजा देवराजः शचीमिव।।

।। २४०।।

अकिरत्स कुबेरश्रीर्विवाहे पारितोषिकम्।
समन्ततः समेतेषु सूतमागधबन्दिषु।।

।। २४१।।

समेत्य रूपनगरं नगररञ्जितमण्डलम्।
मानसिंहनृसिंहस्य जयसिंहोऽग्रहीत्सुताम्।।

।। २४२।।

वित्तं वितीर्य तत्रापि चारणेभ्यो विचारवान्।
सान्तःपुरः पुरं प्राप पुरुपौरपरम्परम्।।

।। २४३।।

अम्बावतीं प्रविशतो व्यूढदारस्य पद्धतिः।
करेणुदानधाराभिर्विरेणुरभवद्भृशम्।।

।। २४४।।

ताभ्यां स धर्मपत्नीभ्यां भुञ्जानो भोगवैभवम्।
कालमल्पेतरमपि बुधोऽपि बुबुधेऽल्पकम्।।

।। २४५।।

दुर्गं खेलनमादातुं दक्षिणस्यां प्रयुध्यता।
समाहूतो हरिप्रस्थहरिणा विजयी जयः।।

।। २४६।।

पृथवीपुरुहूतोऽसौ रजःपूतोढशासनः।
तुरष्कपुरुहूताय साहाय्यं दातुमैहत।।

।। २४७।।

तत्क्षणं मन्त्रिभिर्वृद्धैरागत्य गतदूषणैः।
उच्चैर्दत्वाऽऽशिषं क्षेमं शिशिक्षेऽमन्दवज्जयः।।

।। २४८।।

एवमायुष्मता वाच्यमेवं संम्राजि पृच्छति।
तमित्युपादिशन् हन्त सर्वतः सर्वतत्त्वगम्।।

।। २४९।।

युक्तं ब्रूथेति तान्मन्त्रीनभिनन्द्य नरेश्वरः।
गामपूर्वामिति प्राह स्मितपूर्वाभिभाषणः।।

।। २५० ।।

युष्मदुत्प्रेक्षितं हित्वा चेदन्यत्प्रक्ष्यति प्रभुः ।
तदा वक्ष्ये किमु ब्रूत कस्य को वेत्ति हृद्गतः ।।

।। २५१ ।।

तस्मादस्मि यथाप्रश्नं व्याहरिष्यामि तत्पुरः ।
तूष्णींकृत्येति तान्प्राज्ञः प्रस्थातुं समसज्जत ।।

।। २५२ ।।

स दत्वा सूतसंघेभ्यः समृद्धिसदृशं वसु ।
भुक्त्वा पीत्वा बलैः प्रास्थाच्छ्वशुरेण विसर्जितः ।।

।। २५३ ।।

सुवर्णमुष्टिमुद्रश्मिरत्नरञ्जितकोषगम् ।
ज्वालाजटावमहितघस्मरं स दधावसिम् ।।

।। २५४ ।।

तैलधौता तडिद्द्योता सर्पिणीव विसर्पिणी ।
शक्तिरालम्बितीक्ष्णाग्रा दंष्ट्रेव समवर्तिनः ।।

।। २५५ ।।

व्यामदीर्घं श्रुतिच्छिद्रसम्भृताग्नेयचूर्णकम् ।
पटवासशयं नेतुर्नलिकास्त्रमशोभत ।।

।। २५६ ।।

वंशजत्वात् स्थिरं वैरिभेददक्षं पुरःफलम् ।
सन्मित्रमिव भीतिघ्नं भव्यं भल्लमधत्त सः ।।

।। २५७ ।।

सुवर्णन्युप्तरत्नेन निवीतो नववर्मणा ।
रेजे राजा ज्वलच्छम्बाजालच्छन्नघनच्छविः ।।

।। २५८ ।।

स प्रतस्थे बली वेगाद् विजेतुं दक्षिणां दिशम् ।
प्रायेण रघुवंश्यानां करस्थस्तज्जयः स्मृतः ।।

।। २५९।।

मद्भर्तुरद्य भवदीययशोभिरच्छै-
लर्क्ष्मीरलुण्ठि तदिदं किमु कूर्म युक्तम्।
विज्ञप्तुमित्युडुभिरस्य समीपमासीत्
सद्रत्नचर्मवलयच्छलतस्तमिस्रा।।

।। २६०।।

मद्भर्तुस्त्वद्यशोभिः श्रीर्हृता तदुचितं किमु।
इतीव वक्तुमस्यासीत्पुरश्चर्ममिषान्निषा।।

।। २६१।।

रेजिरे कुञ्जरा राज्ञः कुञ्जरेषु मदापगाः।
मदापगासु रोलम्बा रोलम्बेष्वपि निक्वणाः।।

।। २६२।।

सुवर्णस्यूतपल्याणा लक्ष्यकल्याणलक्षणाः।
उदञ्चच्चामररुचो वाहव्यूहास्तमन्वयुः।।

।। २६३।।

रथाः सद्वर्मभिरथाच्छन्नाश्चक्रक्षतक्ष्माः।
किङ्किणीक्वाणरणितारणिभिश्चेलुराश्रिताः।।

।। २६४।।

पत्तयः प्रोद्धतप्रासाः शत्रुत्रासार्थमुद्यताः।
कल्पान्तमिव कुर्वन्तः प्लवन्ते स्म पुरः पुरः।।

२६५

चोचूष्यमाणचारुश्रीश्चार्वङ्गीलोचनैश्चिरम्।
स चामराञ्चलचलच्चलाचान्तश्रमोऽचलत्।।

।। २६६।।

निर्वाताब्जनिभेनाक्ष्णा वातायनगताः स्त्रियः।
विलोकयन्विलोलाश्वो निश्चक्राम पुरः पुरम्।।

।। २६७।।
जयेन्द्रजैत्रयात्रायै याति साहसशालिनि।
अन्योऽन्यं मन्त्रयामासुर्जातातङ्का दिगीश्वराः ।।
।। २६८।।
लङ्घिताध्वा जयो राजा जङ्घालैर्वाजिभिर्व्रजन्।
दिनैः कतिपयैः प्रापच्छ्रीमच्छिवपुरं पथि।।
।। २६९।।
स तत्रोद्योतसिंहस्य सुतां शिवपुरेशितुः।
सेनानिवेशमादिश्य नृपतिः परिणीतवान्।।
।। २७०।।
पिबन्नपि धरां धुर्यैर्धुर्य्यः कच्छकुलस्य सः।
तूर्याणि ध्वनयन्सूर्यं रजोभिः स्थगयन्नगात्।।
।। २७१।।
तुङ्गैस्तुरङ्गमै राज्ञि दक्षिणाशामुपेयुषि।
उच्छ्वसन्नवरङ्गोऽपि जयांशां समुपेयिवान्।।
।। २७२।।
यथाविभागमङ्गेषु स सज्जायुधपञ्चकः।
उपसाहीन्द्रशिबिरं शीघ्रमश्वादवातरत्।।
।। २७३।।
क्रामं क्रामं क्रमात्कक्षां ग्राहं ग्राहं नमस्कृतीः।
श्रावं श्रावं यशः प्राचां नवरङ्गान्तिकं ययौ।।
।। २७४।।
हन्ताऽथ खानखानाद्यैर्धूतोच्चैश्चारुचामरम्।
हसन्तमिव विस्फूर्ज्जत्स्वीयस्फाररुचाऽमरम्।।
।। २७५।।
मुक्तागुलच्छज्वलितोल्लोचाच्छच्छविविच्छुरम् ।
नमन्नृपेन्द्रमौलिस्रक् तमर्चितपदाम्बुजम्।।

।। २७६ ।।

समुद्रमिव गम्भीरं रत्नसानुमिवोच्छ्रितम्।
देवद्रुमिव दातारं कन्यार्कमिव दुःसहम्।।

।। २७७ ।।

पश्यन्तमुपदाराशीन्नासीनमधिमञ्चकम्।
अनेकगुणसम्पन्नं सम्पन्नन्दितकोविदम्।।

।। २७८ ।।

जयसिंहो दराश्चर्यरंहोलोलमना मनाक्।
अद्राक्षीदिन्दुयशसं हिन्दुस्थानविडौजसम्।।

।। २७९ ।।

दिल्लीदुश्च्यवनोऽप्यारात् पश्यञ्जयमुपागतम्।
प्राचीनजयसिंहस्य सस्मार दरमुग्धधीः।।

।। २८० ।।

किमेष मिरजोपाधिर्जयसिंहो महामहाः।
वैरनिर्यातनं प्रेप्सुः प्रसवं पुनराश्रितः।।

।। २८१ ।।

नूनं स एष चण्डात्मा दिल्लीमुन्मूलयिष्यति।
गृह्णन्ति जन्म भूयोऽपि वीरा वैरपरायणाः।।

।। २८२ ।।

इत्यनेकविधातङ्कजालरुद्धमनः खगः।
उद्वेगागस्त्यनिःपीतधैर्याब्धिर्वेपते स्म सः।।

।। २८३ ।।

किं च स्वेदकणक्लिन्नतनुः स ननु विव्यथे।
हतोऽपि बलवान्वैरी व्यथयत्येव हि स्मृतः।।

।। २८४ ।।

समीपमुपसर्पन्तं प्रणमन्तं पुनः पुनः।
सावहित्थस्तुरष्केन्द्रो जयं जग्राह हस्तयोः।।

।। २८५।।
किमद्य ते बलं वीर कथ्यतां तथ्यमुच्चकैः।
इत्युवाचाऽस्य विज्ञातुं कौतुकी शेमुषीबलम्।।
।। २८६।।
श्रुत्वा वाचमिति म्लेच्छस्वाराजः स्फूर्तिमान्नृपः।
द्रागेवोत्तरमाचख्यौ सानन्दविनयस्मितम्।।
।। २८७।।
स्वामिन्दिष्ट्याऽद्य मे दोष्णोर्बलं वक्तुं न पार्यते।
गृह्णाति यत्स्वयं स्वामी मुदा द्वावपि मे करौ।।
।। २८८।।
गृह्णाति पुरुषः पाणिमेकमेव स्त्रियः खलु।
साऽबलापि भवेद्भूयः प्रबला किं पुनः पुमान्।।
।। २८९।।
अथो निषम्य तत्कालस्फूर्तिपेशलमुत्तरम्।
प्रससाद भृशं तस्मै भूभुजां परमेश्वरः।।
।। २९०।।
अधिकस्तात जातोऽसि मिरजाजयसिंहतः।
इति प्रशंसयन्नस्मै ''सवायी'' पदवीं ददौ।।
।। २९१।।
ततो बहुतिथे काले व्यतीते सादपुङ्गवम्।
व्यजीज्ञपत्सविनयं सवायी जयसिंहराट्।।
।। २९२।।
यात यूयं हरिप्रस्थं पैर्योत्स्यामहे वयम्।
न चाऽत्र प्रभुभिः स्थेयं युद्धे श्रीर्न स्थिरा यतः।।
।। २९३।।
इत्युक्तः स हरिप्रस्थं भास्करो दक्षिणायनात्।
परावृत्य प्रचण्डौजाश्चक्रे द्रागुत्तरायणम्।।

।। २९४।।
जयसिंहोऽथ मतिमान्नद्यावेनानुमोदित:।
सन्धिप्रपञ्चमुद्भाव्य खेलनं भेत्तुमैहत।।
।। २९५।।
सन्धिच्छद्म पुरस्कृत्य स्वकीयपरसद्मत:।
प्रच्छन्नसज्जसर्वार्थ: खण्डितुं खेलनं ययौ।।
।। २९३।।
स दुर्गद्वारमासाद्य हत्वा द्वाराधिकारिण:।
अन्तर्विवेश सहसा सह सामन्तसेनया।।
।। २९७।।
विकिरन्तं महुर्दृग्भ्यामत्युष्णतरवारि स:।
विहितार्तरवारिं द्राक् तरवारिग्रहोऽग्रहीत्।।
।। २९८।।
जित्वेति खेलसद्वप्रं खेलया खेलनं खलु।
प्रतापैकमठ: प्रास्थात्कमठ: साहिसन्निधिम्।।
।। २९९।।
जितकाशी जयो राजा घोटकौघैरनुद्रुत:।
नवरङ्गेण हि नवरङ्गाबादपुरेऽमिलत्।।
।। ३००।।
अखिलं खलु तच्छ्रुत्वा खेलनस्य विखण्डनम्।
खिलीकृत्खलं खेलत्खड्गमस्तौज्जयं प्रभु:।।
।। ३०१।।
एतस्मिन्नन्तरे कोऽपि कोपी सैयदसत्तम:।
खरगोनमापेदे द्राङ् निजावतखाँभिध:।।
।। ३०२।।
आसीद्योऽशीतिसाहस्रबलप्रबलवैभव:।
दूरव्यालम्बिधूम्राभश्मश्रुभीषणदर्शन:।।

।। ३०३।।

खरगोनकसीमायां प्राप्तमाकर्ण्य सैयदम्।
नवरङ्गेण संम्राजा जगदे जगतीपतिः।।

।। ३०४।।

सैय्यदं जय जन्यान्तर्जयसिंहबलद्बलम्।
रविं विना तमस्तोमखण्डने कोऽस्ति पण्डितः।।

।। ३०५।।

गृह्णन्नोमिति तस्याज्ञां ज्याजानिर्विजयाग्रजः।
चमूमायोज्य चटुलां सैय्यदं शासितुं ययौ।।

।। ३०६।।

चमूपादरजोभिः खं वितन्वन्नस्तभास्करम्।
क्रमक्रान्तपथः प्रापत्तं निजावतखाँह्वयम्।।

।। ३०७।।

ततः प्रववृते युद्धं राज्ञः सैय्यदसैनिकैः।
तुङ्गतोयप्रतिध्वानभिद्यमानरसातलम्।।

।। ३०८।।

आपदापद्विवलिते बले सैय्यदवासवम्।
ववल्ग वल्गिताश्वौघो राजा तस्य जिघृक्षया।।

।। ३०९।।

जिजीविषुः स सपदि सम्परायात्पलायत।
भयेभ्यः सकलेभ्योऽपि परं प्राणभयं महत्।।

।। ३१०।।

दूरं पलाय्य सोऽलुण्ठद्द्रोनपुटभेदनम्।
लगंस्तदनु भूमीन्द्रस्तत्र भूयोऽप्ययुध्यत।।

।। ३११।।

स द्रुतो जयसिंहेन पृष्ठतो नुनुदे शनैः।
पलायमानमनघा नुदन्ति न विशेषतः।।

।। ३१२।।
समुन्नतशिराः स्वर्णकटको भूभृदग्रणीः।
अलं विलोडयामास सैय्यदानीकनीरधिम्।।
।। ३१३।।
कूर्मकृता मृधे पेतुर्बाहवो बाहुशालिनाम्।
जनमेजयस्य सत्रान्तःसर्पाः पञ्चफणा इव।।
।। ३१४।।
धूलीध्वान्ते समिद्दोषामुखे यत्खड्गदूतिका।
समं द्युस्त्रीभिरकृत वीराणामभिसारणम्।।
।। ३१५।।
खड्गखण्डितविद्वेषिमुण्डनिर्गतलोहितैः।
तर्पयामास यो युद्धे कालभैरववाहिनीम्।।
।। ३१६।।
जयेऽर्के शोषयत्यस्त्रकरैस्तद्बलपल्वलम्।
भिया सैय्यदयादो द्राक् पलाय्य क्वाप्यलीयत।।
।। ३१७।।
लुलुण्ठुः कच्छपाः कोषं सैय्यदस्य जयाज्ञया।
को विमुञ्चति मूढोऽपि रायो राशिमनायकम्।।
।। ३१८।।
जयो विजित्य सामन्तराजितो वाजिराजितः।
आससाद प्रभाचक्रवर्तिनं चक्रवर्तिनम्।।
।। ३१९।।
श्रुत्वा महाबलवतः सैय्यदस्य पराभवम्।
विततार जयेन्द्राय पुरीमुज्जयिनीं प्रभुः।।
।। ३२०।।
राजाऽप्युज्जयिनीं प्राप्य जयनीतिर्ननाम तम्।
पारितोषप्रसन्नानां भृत्यानां घटने रतिः।।

॥ ३२१॥
दिनेषु तत्र गच्छत्सु चिकीर्षन्तः प्रजाक्षयम्।
समन्ततः समुत्तस्थुर्दाक्षिणात्या महाबलाः॥
॥ ३२२॥
श्रुत्वा दिल्लीपतिस्तेषामुत्थानं तत्प्रशान्तये।
न्ययुङ्क्त जयसिंहेन्द्रं धुर्य्ये धूर्हि निधीयते॥
॥ ३२३॥
अन्वयुङ्क्त च पौत्रं स्वं वेदारबखताभिधम्।
आहुराजिमसं तस्य तनयं ननु यं बुधाः॥
॥ ३२४॥
सैन्येन कटुना काष्ठाकूलङ्कषरवेण सः।
विश्रम्भाज्जयसिंहस्य समसज्जत तत्क्षणम्॥
॥ ३२५॥
दिङ् निखातजयस्तम्भदम्भशङ्कुश्चिरुच्चकैः।
कीलिताऽपि चकम्पे कुर्यद्वलेषु वलत्स्वलम्॥
॥ ३२६॥
वाजिव्याधूतधूलीभिः पङ्किले स्वर्धुनीजले।
जातानि पङ्कजातानि पङ्कजातानि वस्तुतः॥
॥ ३२७॥
जयो बेदारबखतो द्वाविमौ वीरवन्दितौ।
चक्रतुः पद्धतिं पत्तिपद्धतिक्षुण्णपर्वताम्॥
॥ ३२८॥
जयसिंहो महारंहा बेदारबखतं वहन्।
प्रमदावादवाचालममदाबादमासदत्॥
॥ ३२९॥
विचित्रचित्रमाणिक्यचतुष्कचटुलच्छविम्।
भद्राख्यगोपुराभ्यर्णविराजद्भद्रकालिकम्॥

।। ३३० ।।
सालविस्फालवाचालसाभ्रमत्यूर्मिपावितम् ।
प्रतिस्थानस्फुरद्दोलालीलालोलावलावलिम् ।।
।। ३३१ ।।
प्रतिरथ्यं द्विजश्रेणीभुज्यमानाज्यलप्सिकम् ।
भोजनानन्तरं दीयमानताम्बूलदक्षिणम् ।।
।। ३३२ ।।
क्षौमवासांसि वयतां श्रेणीभिरुपलक्षितम् ।
अभ्रङ्कषमहासौधपताकाबीजितान्तरम् ।।
।। ३३३ ।।
प्रकृष्टानेकवाणिज्यं त्रियोजनपरिक्रमम् ।
रथ्या विभागललितं कलितं परमोत्सवैः ।।
।। ३३४ ।।
प्रायः पक्केष्टिकाक्लृप्तनिकेतनपरम्परम् ।
काष्ठप्रकल्पिताकल्पच्छादनोच्छ्रायसुच्छटम् ।।
।। ३३५ ।।
सुगन्धिमन्द्रशिशिरपवनोपवनोदयम् ।
शिल्पोपजीविजनतालङ्कृतालङ्कृतालयम् ।।
।। ३३६ ।।
अमदाबादमासाद्य प्रमदाभिर्निरीक्षितः ।
न्यवेशयद्बली राजा बलं साभ्रमतीतटे ।।
।। ३३७ ।।
रेवां तरति संग्रामहेवाकिनि बले द्विषाम् ।
कच्छोभ्यगच्छदच्छासिरमदाबादपत्तनात् ।।
।। ३३८ ।।
अभेद्यं चर्मवलयं कलयन्पृष्ठदेशतः ।
कच्छराडुच्छलत्कच्छसैन्यसागरगो बभौ ।।

।। ३३९।।

स महीन्द्रो महीं मार्गे तन्वन्नश्वमयीमयी।

वटोदरं समुल्लङ्घ्य रेवारोधो रुरोध ह।।

।। ३४०।।

अन्तःफलितमार्तण्डमण्डलास्तद्बलाशयः।

बभुरत्तुं रिपूनन्तर्ज्वलद्वह्निशिखा इव।।

।। ३४१।।

तथा तत्र प्रववृते मृधो वीरक्षयावहः।

यथा पुनर्विधेरासीद् वीराणां सर्जने श्रमः।।

।। ३४२।।

रेवाकच्छेषु कच्छानां हन्तुमुच्छलतां पुरः।

मकरैरप्यभूदाजिः परैर्भीमकरैरपि।।

।। ३४३।।

हन्त तत्र क्षणेनैव मांसासृग्विस्रसंवरा।

रेवावैतरणीवाऽभूत् परलोकप्रवाहिणी।।

।। ३४४।।

जयेन विजिता जन्ये दाक्षिणात्या पताकिनी।

क्षतान्तःस्रवदस्रौघा चतुरस्रं पलायत।।

।। ३४५।।

जयवर्मा विजित्यादौ दाक्षिणात्यानिति क्षणात्।

नर्मदातो निववृते प्रजाशर्मणि दीक्षितः।।

।। ३४६।।

इतः पुनर्जराजीर्णः पुत्रपौत्रवियोगवान्।

नवरङ्गोऽप्यथ नवरङ्गाबादे व्यपद्यत।।

।। ३४७।।

तदारभ्य हरिप्रस्थसाम्राज्यपदमुच्चकैः।

अव्यवस्थमतीवासीदस्तसूर्यमिवाम्बरम्।।

।। ३४८।।

कूर्मो निष्ठान्तमाकर्ण्य विमनाश्चक्रवर्तिनः।
तत्वरे तूर्णमागन्तुं बेदारबखतान्वितः।।

।। ३४९।।

दिवानिशं चलन्वेगवद्भिरर्वद्भिरध्वनि।
स धोलपुरमापेदे कथञ्चित्क्लान्तसैनिकः।।

।। ३५०।।

तथा तत्रैव तान्तश्रीःस्थानाद्बालानहाह्वयात्।
समाजगाम सम्राजः सूनुराजिमसाहकः।।

।। ३५१।।

अत्रान्तरे पुनस्तत्र साहिजातद्वयीमवन्।
धूलीधूसरितश्मश्रुः काबिलाद्भादरोऽप्ययात्।।

।। ३५२।।

समाकर्णितदिल्लीन्द्रविपत्तिः पत्तिभिर्वृतः।
अप्राप्तशोकसीमो द्रागसीमोऽप्याऽऽप पूर्वतः।।

।। ३५३।।

एवमेकत्र सप्तैते सप्तसप्तिसमौजसः।
संहता वर्णितोदन्ता हन्ताकुर्वन्त मन्त्रणम्।।

।। ३५४।।

मन्त्रे स्वतन्त्रमतयः सर्वे स्वार्थपरायणाः।
दिल्लीहेतोः स्फुटीचक्रुः कलहं द्वैधमास्थिताः।।

।। ३५५।।

जयश्चाजिमसाहिश्च द्वाविमौ कृतसम्मती।
बेदारबखतं प्रीत्या शिश्रियाते निराश्रयम्।।

।। ३५६।।

राजानोऽन्ये तु सम्पेतुः पक्षे श्रीभादरेशितुः।
समाश्रयन्ति सर्वेऽपि प्रायः प्रबलमेव हि।।

।। ३५७।।

तदा भादरसाहेश्च बेदारबखतस्य च।
अहं सम्राडहं सम्राडित्यन्योन्यमभूत्कलिः।।

।। ३५८।।

एकतो जयबेदारबखताजिमसाहयः।
अन्यतो भूरिशो भूया भादराद्यावताऽभवन्।।

।। ३५९।।

विवादे प्रौढिमापन्ने पक्षयोरुभयोर्भटाः।
कोषाकर्षितनिस्त्रिंशा योद्धुमारेभिरे मिथः।।

।। ३६०।।

ववृधे तत्र संरम्भो वीराणां धीरचेतसाम्।
द्वन्द्वयुद्धव्यवस्था तु क्षणमात्रमवर्तत।।

।। ३६१।।

जयसिंहो दधद्रंहो हंहो गर्जन्नजर्जरम्।
बेदारस्य पुरो युध्यत्सामन्तपरिवारितः।।

।। ३६२।।

वक्षः कवाटचक्राणि भित्वा भल्लेन विद्विषाम्।
उग्रोदग्रासिरव्यग्रं जयो जुग्रो च जीवितम्।।

।। ३६३।।

जयेन जन्ये द्विषतां हतानां
विशिष्य चुच्योत न तादृगस्त्रम्।
प्रागेव यस्माददसीयभल्ल-
प्रतापतः शुष्यदवाप नाशम्।।

।। ३६४।।

नासीरं क्ष्मासु नासीरे क्षुरैः क्षपयति द्विषाम्।
निर्विघ्नं जग्मतुः शत्रून्वेदारबखताजिमौ।।

।। ३६५।।
क्षणाज्जन्याजिरं जज्ञे मांसशोणितकदर्मम्।
कूर्दत्कबन्धसम्बन्धं भीरुदुष्प्रेक्ष्यदर्शनम्।।
।। ३६६।।
जये जयैषिणि जवाद्भादरं प्रति धावति।
भादरो न मनागासीत्पक्षयोरुभयोरपि।।
।। ३६७।।
तदा पदातिपटली पटलीनवपुः परः।
जयं हन्तुं जयाकांक्षी शरं धनुषि सन्दधे।।
।। ३६८।।
बाढप्रचण्डकोदण्डमण्डलादम्बराच्च्युतः।
मस्तके जयसिंहस्य लगति स्म महाशरः।।
।। ३६९।।
शरशीर्णशिरोमर्मनिर्यल्लोहितलोहितः ।
पपात मूर्च्छितः कच्छः साकं स्वसुहृदश्रुभिः।।
।। ३७०।।
ददृशे तत्क्षणं राजा मौलिलग्नेन पत्रिणा।
समुद्गतैकतीक्ष्णांशुस्तीक्ष्णांशुरिव सैनिकैः।।
।। ३७१।।
जये मूर्च्छति सम्भूय राजानो भादराज्ञया।
शस्त्रैश्चाक्षणिरे क्षिप्रं बेदारबखताजिमौ।।
।। ३७२।।
मूर्च्छितं कच्छपं मंक्षु गृहीत्वा पार्श्ववर्तिनः।
पलायन्त शरासारप्रसरात् समराङ्गणात्।।
।। ३७३।।
बेदारं भादरो भङ्क्त्वाऽभादरं भव्यभादरः।
बेदारोऽपि दिवं जित्वा बभौ रम्भादरोऽधिकम्।।

।। ३७४।।

आत्मसात्कृत्य कृत्यज्ञो दिल्लीमिति स भादरः।
चकाशेऽर्कबराबादे राजमञ्चप्रतिष्ठितः।।

।। ३७५।।

जयोऽथ चेतनां लब्ध्वा जलार्द्रानिलवीजितः।
शुशोच साश्रु बेदारं श्रुत्वोदन्तमशेषतः।।

।। ३७६।।

धीरवीरोऽयमुर्वीन्द्रः सेनया हृतशेषया।
प्रकर्षतन्त्रमुत्पश्यञ्जयं जन्यान्न्यवर्तत।।

।। ३७७।।

भादरेन्द्रमनापृच्छ्य मनस्वी खिन्नमानसः।
निभृतं प्राप्य नृभृतं पुरमुच्छ्वसति स्म सः।।

।। ३७८।।

जयेऽजनि तदारभ्य प्रतिकूलः स भादरः।
अन्वग्रहीच्च विजयं दास्ये तेऽम्बावतीमिति।।

।। ३७९।।

दीयतां हन्त मे पीठं स्वसा भक्तिस्तु नीयताम्।
विजयः प्रतिश्रुत्येति भादरादाप दादरम्।।

।। ३८०।।

श्रुत्वा व्यतिक्रमं भ्रातुर्भीतो गूढोद्यमो नृपः।
भक्तेर्वैवाहिकीं भङ्गीं निवायीनगरे व्यधात्।।

।। ३८१।।

प्रच्छन्नमीयुषे तत्र बुद्धसिंहाय सत्वरः।
ददौ संकल्प्य भगिनीं भक्तिं भक्तिपुरःसरः।।

।। ३८२।।

भक्तिं निषम्य बुद्धाय जयेन प्रतिपादिताम्।
वैमनस्यं दधौ सम्राड् विजयेऽपि विशेषतः।।

।। ३८३।।

गते बहुतिथेऽनेहस्यन्तः कोपकषायितः।
जहार हा रजोऽस्पृष्टां जयादम्बावतीं प्रभुः।।

।। ३८४।।

कच्छपालोऽपि कालज्ञः कलयन्बहिरार्जवम्।
ददावम्बावतीं हन्त शयान्न तु निजाशयात्।।

।। ३८५।।

कामवक्षं यदा जेतुं भादरो दक्षिणं ययौ।
राजाऽपि स्वीयसामन्तैरेनमन्वग्ययौ तदा।।

।। ३८६।।

अध्वन्यध्वैव संधाय स योधपुरभूभुजा।
अजितेन सहैवाहो नर्मदातो न्यवर्तत।।

।। ३८७।।

मिलित्वा तावुभावम्बावतीयोधपुराधिपौ।
प्रातिष्ठे तां प्रतिष्ठार्थं परिमेयपरिच्छदौ।।

।। ३८८।।

समीयतुः कथास्तास्ताः कथयन्तौ परस्परम्।
ढुण्ढारमारवाटेन्द्रौ श्रीमन्मेवाटमण्डलम्।।

।। ३८९।।

राणेन्द्रोऽमरसिंहेन्द्रो मेवाटविषयेश्वरः।
उपान्तमागतौ कूर्मराष्ट्रोढौ सहसाऽशृणोत्।।

।। ३९०।।

सभामास्थाय सामन्तैः सामन्ताद्धूतचामरः।
उवाच वचनं वाग्मीमुग्धस्मितरुचाऽमरः।।

।। ३९१।।

दिष्ट्याऽद्यैष विपत्तिस्थो विपक्षोभ्यर्णमेतिनः।
वैरनिर्यातनस्याऽयं कालः सम्यगुपस्थितः।।

।। ३९२।।
किमत्र प्रतिपत्तव्यं मन्त्रिणो ब्रूत तन्त्रतः।
गतो ह्यवसरः पुंसां पुनर्नैवोपतिष्ठते।।
।। ३९३।।
यत्र पञ्चापि पुरुषास्तत्रैव परमेश्वरः।
इत्यभिप्रायमुद्भाव्य तस्थौ श्रोतुं सभामतम्।।
।। ३९४।।
राणेन्द्रेण स्वयं पृष्टाः सर्वे संमन्त्र्य मन्त्रिणः।
विज्ञा विज्ञापयामासुः समानीय करान्पुरः।।
।। ३९५।।
पदापरः पदभ्रष्टो पापादतिथिवद्गृहम्।
तदा सत्कृत्य कुर्वीत तत्पदप्राप्तये श्रमम्।।
।। ३९६।।
लम्भिते विद्विषि पदं प्रयतेत नियन्त्रितुम्।
एष पन्थाः सतां तुभ्यमवश्यं रोचतां प्रभो।।
।। ३९७।।
यद्वदस्मासु कच्छेन्द्रो निकारमकरोत्पुरा।
तद्वदयं यदा तत्र कुर्मस्तत्कीर्तये हि नः।।
।। ३९८।।
मन्त्रिणां मतमाकर्ण्य राणेन्द्रो निर्णयोन्मुखः।
प्रसूं पप्रच्छ कच्छेन्द्रे किं कुर्यामिति शाधि माम्।।
।। ३९९।।
जजल्प जननी वीरजननीतिविचक्षणा।
पुत्रं राणेन्द्रममरममरश्रियमादरात्।।
।। ४००।।
हित्वा कूटमतिं वत्स विनीतो मन्त्रिमण्डितः।
गृहमानय सत्कृत्य कच्छं राष्ट्रोढसङ्गतम्।।

।। ४०१ ।।
पुरोहितं पुरस्कृत्य प्रयतेन सता त्वया।
कच्छाय दीयतां पुत्री राष्ट्रोढाय पुनः स्वसा।।
।। ४०२ ।।
नायं युद्धस्य समयो रिपावापदि संस्थिते।
कुर्वाणोऽपरथा लोके लप्स्यसेऽपयशो महत्।।
।। ४०३ ।।
वीरोऽसि यदि ते चित्ते वैरनिर्यातनस्पृहा।
तदा सन्नाह्य सैन्यानि गन्तव्यं कच्छनीवृति।।
।। ४०४ ।।
गम्यो दुःस्थो रिपुरिति मतं वीरविगर्हितम्।
राहोर्ग्लौरिव वीरस्य सम्पूर्णः सम्मदाय सः।।
।। ४०५ ।।
स्थाने तद्भाति जन्यान्तर्विक्रान्तः खड्गमुष्टिना।
प्रसह्य कच्छराजस्य खण्डयेस्त्वं रदावलिम्।।
।। ४०६ ।।
इति प्रबोधितो मात्रा मेवाटपरमेश्वरः।
प्रत्युज्जगाम महताडम्बरेण जयाजितौ।।
।। ४०७ ।।
संभाव्य स यथायोग्यं कूर्मराष्ट्रोढपार्थिवौ।
प्रवेश्य पुरमुत्केतु परं पर्यचरत्स्वयम्।।
।। ४०८ ।।
कूर्मराष्ट्रोढसीसादाः परिस्फुरितहेतयः।
आस्थानवेदिकामध्ये जज्वलुर्ज्वलनोज्ज्वलाः।।
।। ४०९ ।।
ते त्रयस्तत्र संवेता वागगोचरवैभवाः।
राजानो रेजिरेऽजस्रं ब्रह्मविष्णुशिवा यथा।।

।। ४१० ।।
पुत्रीं दातुं जयेन्द्राय भगिनीमजिताय च।
प्रतिश्रुत्याऽमरः प्रीत्याऽऽवासयत्ताविमौ गृहे।।
।। ४११ ।।
अभीप्सतोः परिणयं कूर्मराष्ट्रोढराजयोः।
विरराम मनोराज्यराजिभिः क्षणवत्क्षपा।।
।। ४१२ ।।
प्रातरागत्य राणेन्द्रो व्याजहार जयं यथा।
ददे दुहितरं तत्रभवते भवते नृप।।
।। ४१३ ।।
परन्तु मे दुहितरि यदि स्याद्भवतः सुतः।
प्रतिज्ञा क्रियतां राजन्स भवेद्राज्यभागिति।।
।। ४१४ ।।
राजाऽप्युद्वाहलुब्धः सन् राणोक्तं सर्वमाददे।
विवाहलोलुपाः प्रायः श्वसुरं नातिशेरते।।
।। ४१५ ।।
भूयिष्ठं भृतसम्भारो मेवाटेन्द्रो महामनाः।
बन्धूनापृच्छ्य कच्छाय स्वच्छशीलां सुतां ददौ।।
।। ४१६ ।।
समनन्तरमेवारं राष्ट्रोढाजितवर्मणे।
प्रणीतप्रणयस्तद्वद् व्यतरद् भगिनीमसौ।।
।। ४१७ ।।
एवमुद्वाह्य सीसादस्तनुजामनुजामपि।
सत्कारमृद्धिसदृशं चक्रे जामातृभामयोः।।
।। ४१८ ।।
जयाजितावपि प्रीतौ भुक्त्वा पीत्वा यथायथम्।
मेवाटतः प्रतिष्ठाते सीसादेन विसर्जितौ।।

।। ४१९।।

जयसिंहः समाहूय रामचन्द्रं स्वमन्त्रिणम्।
अम्बावतीं समादातुं प्रेषयामास सेनया।।

।। ४२०।।

रामचन्द्रोऽपि सन्नाह्य सैन्यानि कमठाज्ञया।
ययावम्बावतीं वीरो निमित्तानि निदर्शयन्।।

।। ४२१।।

कच्छसन्नाहमाकर्ण्य म्लेच्छगुल्मः पलायत।
अम्बावतीपुरे प्राग् योभादरेण निवेशितः।।

।। ४२२।।

प्रविश्याम्बावतीं मन्त्री सैय्यदैरपवर्जिताम्।
जयाय लेखमलिखत्तूर्णमागम्यतामिति।।

।। ४२३।।

जयसिंहो महाबाहुरजितस्यानुरोधतः।
अनेन साकमापेदे योधयो योधपत्तनम्।।

।। ४२४।।

अजितोऽपि जयेन्द्राय महेन्द्रायततेजसे।
केवलं नैव सत्कारं सुतामपि गिरा ददौ।।

।। ४२५।।

तत्र दोषाकरमुखो देवो दोषा हताहितः।
विहृत्य कतिचिद्दोषाः प्रास्थाद्दोषापवर्जितः।।

।। ४२६।।

जुषमाणं दृशा जोषं जंगलानुष्ट्रसंकुलान्।
राजानमन्वगात्प्रीत्या राष्ट्रोढो राष्ट्रविश्रुतः।।

।। ४२७।।

मारवं मार्गमुल्लङ्घ्य कूर्मराडजितोर्जितः।
अजमेरुपुरप्रान्तं प्रापद् विक्रान्तवाहनः।।

।। ४२८।।
तत्र केनापि मीरेण तारादुर्गाधिकारिणा।
समैधत समिद् घोरा क्ष्मापतेरधिकाऽरिणा।।
।। ४२९।।
संजहार जयो मीरवीरानजितसङ्गवान्।
एक एव दहत्यग्निः किं पुनः पवनान्वितः।।
।। ४३०।।
मीरोऽप्यधीरधीरुच्चैरुपायनमुपानयन्।
ननाम नाम नृपतिं गृणन्स्वं नाम दूरतः।।
।। ४३१।।
देवो दासीकृताराति: प्रौढासिस्तत्र मीरतः।
वसुराशिं यशोराशिरासीद् गृहणन्ननुग्रही।।
।। ४३२।।
मन्त्रयित्वा नृपः श्रीमानजितेन जितद्विषा।
सामरं क्षेत्रमाक्रान्तुं प्रातिष्ठत शुभापतिः।।
।। ४३३।।
दूराद् ददर्श लवणसरः प्रवणमानसः।
दुर्वर्णकुट्टिमच्छायं संस्त्यानलवणोच्चयम्।।
।। ४३४।।
तत्रापि सैय्यदैर्जन्यमजायत जयेशितुः।
कबन्धोत्थानचकितवाहपर्यस्तसारथिः।।
।। ४३५।।
अजितेऽपि जितप्राये सैय्यदैः सन्नसैनिकः।
समालिलिङ्ग कूर्मेन्द्रः सोत्कम्पं सहसा भियम्।।
।। ४३६।।
तदा तत्र नरूकेन्द्रो विज्ञातजयसाध्वसः।
उन्नरायाराधिपो वल्गन्बली साहाय्यमातनोत्।।

।। ४३७।।

स सर्पन्सर्पवद्दर्पशालीसामन्तशेखरः।
अग्न्यस्त्रगुटिकोत्क्षेपात् सैय्यदेन्द्रं व्यपादयत्।।

।। ४३८।।

प्रसह्य सैय्यदाधीशे नरूकेण निपातिते।
यथायथं विभेजाते सामरं पार्थिवावुभौ।।

।। ४३९।।

कलय्य सामरं तत्र दृष्ट्वा शाकम्भरीं मुदा।
अम्बावतीं प्रतस्थाते राजानौ जितकाशिनौ।।

।। ४४०।।

अम्बावतीपुरी प्राप्ते मित्रेण सह भर्तरि।
बभौ वासकसज्जेव परिमण्डितमन्दिरा।।

।। ४४१।।

अजितं वासयित्वाऽजौ कियन्ति दिवसान्यपि।
स्नेही कथञ्चिददिशत् गन्तुं योधपुरं प्रति।।

।। ४४२।।

नैककुल्याकुलं कूजच्छकुन्तकुलकौतुकम्।
आश्यामद्रुमसङ्कीर्णमाश्यामं निर्ममे वनम्।।

।। ४४३।।

दिनेष्वथ व्यतीतेषु जयसिंहो महामनाः।
देवीमानेतुमुदगात्पुरीमुदयपूर्विकाम्।।

।। ४४४।।

कल्पितानेकनेपथ्यः पथ्यसौ निवसन्क्रमात्।
राजधानीं महाराजः प्राप सीसादभूभुजे।।

।। ४४५।।

जयेन्द्रमागतं श्रुत्वा सीसादपरमेश्वरः।
प्रत्युज्जगाम मुदितो जैवातृकमिवाम्बुधिः।।

।। ४४६ ।।
प्रवेश्य चैनमुदयपुरीमुदयशालिनीम्।
उपकार्युपकार्यान्तर्वासयामास स स्वयम्।।
।। ४४७ ।।
तत्र राणावतीसङ्गसमुत्सुकमना नृपः।
कथञ्चन निशां निन्ये तन्द्रया न तु निद्रया।।
।। ४४८ ।।
प्रातः प्रोत्थाय सपदि मङ्गलानि निरीक्ष्य सः।
कृतशौचविधिर्दध्यौ गोविन्दं यतमानसः।।
।। ४४९ ।।
चतुरानुचरामुक्तमुक्ताहारमनोहरः।
श्वशुरेण समाहूतः पुरुहूतः क्षितेर्ययौ।।
।। ४५० ।।
मध्येराजपथं राजा झषकेतनपेशलः।
समुच्छ्वसितनीवीभिर्नागरीभिः पपे दृशा।।
।। ४५१ ।।
राणेन्द्रदत्तहस्तोऽसौ समुत्तीर्य तुरङ्गमात्।
विवेशान्तःपुरं पश्चात्प्रागन्तः पद्मचक्षुषाम्।।
।। ४५२ ।।
तत्र नीराजितः श्वश्र्वा श्यालकस्त्रीभिरीक्षितः।
यथारीति रतीशश्रीः पूजां प्राप विशिष्य सः।।
।। ४५३ ।।
साकूतं श्यालकस्त्रीभी राजा राणावतीसखः।
सम्यगास्तीर्णपर्यङ्कं केलिसद्म प्रवेशितः।।
।। ४५४ ।।
दरमीलद्दृशा स्विन्नकम्पमानशरीरया।
राणावत्या समं रात्रौ रेमे राजा शनैः शनैः।।

।। ४५५।।
तयो रहस्यचरितं जालान्तर्दत्तदृष्टिभिः।
स्त्रीभिर्निभृतहासाभिर्जोषमाजुजुषे बहिः।।

।। ४५६।।
प्रातस्तदुत्सवोत्सिक्तः सीसादः स्निग्धमानसः।
शतशस्तोपनिनदान्वर्तयामास सर्वतः।।

।। ४५७।।
अनुभूय नृपोऽप्युच्चैस्तत्र श्वश्रूपलालनाम्।
विसर्जितः कथमपि प्रास्थाद्राणावतीसखः।।

।। ४५८।।
तदा तद्दर्शनोत्साहत्यक्तोदवसितक्रियाः।
उत्तुङ्गसौधशिखराण्यध्यासामासुरङ्गनाः।।

।। ४५९।।
सोत्कण्ठा नृपतौ कापि पाकमुत्सृज्य कामिनी।
करेण दधतीं दर्वीं धावति स्म दिदृक्षया।।

।। ४६०।।
स्नानं विदधती कापि विहाय तदरं ययौ।
परिधानदशोद्वान्तवार्बिन्दूक्षितपद्धतिः।।

।। ४६१।।
दीव्यन्ति पाशकैः पत्या जितकाशिन्यपि स्वयम्।
खेलं काऽप्यसमाप्यैव गवाक्षं प्रत्यपद्यत।।

।। ४६२।।
गतिक्षोभगलन्माल्यगुच्छविच्छुरितान्तराम्।
ससार सौधसरणिं कुर्वती कापि कामिनी।।

।। ४६३।।
अप्यहेयं विहायैव प्रियेणाचरितं प्रिया।
नीवीं प्रणीय हस्तेन विहस्ता सौधमासदत्।।

।। ४६४।।
इति ताभिर्गवाक्षौघो वनिताभिर्वृतान्तरः।
व्यद्योतिष्ट यथा तोयरूढस्वर्णलतं सरः।।
।। ४६५।।
यान्तं पथि पताकाभिर्निपीततपनातपे।
उदारश्रीः सदारौघः सदारं नृपमैक्षत।।
।। ४६६।।
साकूतं कामिनीकान्तकटाक्षोत्तरलान्तरः।
राणेन्द्रानुगतो राजा शनैरासीत्पुराद् बहिः।।
।। ४६७।।
निवर्त्य नर्तिताश्वोऽथ राणेन्द्रं रणितानकः।
कच्छशम्बायुधोऽगच्छद्वारैरम्बावतीं क्रमात्।।
।। ४६८।।
गवाक्षरूढवनितामनितामरिगोचरम्।
अम्बावतीं मुहूर्त्तज्ञैर्मुहुः पश्यन्समाविशत्।।
।। ४६९।।
लाजानां वृष्टिभी राजा मध्येवीथि विदिद्युते।
प्रसृताभिः स्मितश्रीभिश्छन्नाङ्ग इव सुभ्रुवाम्।।
।। ४७०।।
आस्थितः कुञ्जरं पुञ्जस्त्विषां स गुणमञ्जुलः।
चामरैः शिखिबर्हैश्च वीजितो गृहमाविशत्।।
।। ४७१।।
अधिगेहमिलाजानिरुपविष्टः स विष्टरे।
सदकारि महामात्यैर्नीराजनविधानतः।।
।। ४७२।।
राणावतीसखस्तत्र राजन्राजा समृद्धिभिः।
तृतीयमर्जयामास पुमर्थं मन्मथोपमः।।

।। ४७३ ।।
अस्मिन्नेवान्तरे सम्राट् भादरो दक्षिणान्तरात्।
कामवक्षं विजित्यागादजमेरुं यदृच्छया।।
।। ४७४ ।।
भादरप्राप्तिमुन्नीय सादरं मन्त्रिभिर्नृपः।
संमन्त्र्य पुनरेकत्र तन्त्रितात्मबलोऽभवत्।।
।। ४७५ ।।
भादरे बद्धवैरत्वात्सतर्कः सामरं प्रति।
चचाल निश्चलोत्साहः प्रतिकारचिकीर्षया।।
।। ४७६ ।।
गजवाजिरथप्रायमुद्भटास्त्रभटच्छटम्।
वहन्बलं बलद्व्यूहं कालेडेरं रयाद् गतः।।
।। ४७७ ।।
उषित्वा तत्र वसतीश्चतस्रश्चतुरस्रधीः।
डीडवाणपुरं प्राप चापचञ्चच्छयोच्छ्रयः।।
।। ४७८ ।।
तत्रागतेन नृपतिर्मित्रेणाजितवर्मणा।
संमिमेल यथारीति मघवेव प्रचेतसा।।
।। ४७९ ।।
ततः संयोज्य पृतनामजितेन सहायवान्।
सामरं प्राप समरी चामराञ्चलवीजितः।।
।। ४८० ।।
प्राङ् न योद्धव्यमस्माभिरिति सम्मन्त्र्य तेन सः।
बिखारीदाससचिवं प्रैषयद् भादरान्तिकम्।।
।। ४८१ ।।
बिखारीदासवर्माऽथ विसृष्टो जयभूभुजा।
प्राप दिल्लीधवं सत्यसन्धः सन्धिविधित्सया।।

।। ४८२।।
विधाय सामरे रक्षां नत्वा शाकम्भरीं जयः।
पुरं रामसरं नाम राष्ट्रोढानुगतो गतः।।
।। ४८३।।
ततः प्रोत्थाय बलवान्स श्रीढुण्ढारराष्ट्रराट्।
राष्ट्रोढं ग्राहयामास मारोठपुटभेदनम्।।
।। ४८४।।
बिखारीदासवर्माऽपि युक्त्या सम्भाव्य भादरम्।
साकं म्हावतखाँख्येन मारोठे प्राप पार्थिवम्।।
।। ४८५।।
नमस्कृत्य नृपं मन्त्री म्हावते शृण्वति स्वयम्।
यथावदित्थमाख्यातुं प्रस्तुतं स प्रचक्रमे।।
।। ४८६।।
श्रूयतां श्रीमहाराज विस्तरे किं प्रयोजनम्।
सकृदेतु मदभ्यर्णं जय इत्याह भादरः।।
।। ४८७।।
किं च म्हाँवतखाँख्योऽसौ नव्वावो नव्यवैभवः।
सादरं प्रेषितस्तेन भवदाह्वानहेतवे।।
।। ४८८।।
सहानेन त्वयि गते सम्राड्यावत् प्रसीदति।
अतः परं महाराजाः प्रमाणमिति मे मतिः।।
।। ४८९।।
इत्थमल्पपदां वाचमुपन्यस्य नताञ्जलिः।
तूष्णीं बभूव सचिवो बिखारीदाससंज्ञितः।।
।। ४९०।।
सत्कृत्य म्हाँवतं धीमानजितेन समन्वितः।
अजितः शत्रुभिः क्वापि जयो जिगमिषां दधौ।।

।। ४९१।।
अथ बेतण्डमारूढौ कूर्मराष्ट्रोढपार्थिवौ।
चालयेतामचलतामचलां साचलामपि।।
।। ४९२।।
फणिफेनमदावेशद्विगुणीकृतरंहसः।
अनुजग्मुर्महेष्वासाः शतशः क्षत्रचुञ्चुवः।।
।। ४९३।।
कर्णतालसमुड्डीनभ्रमद्भ्रमरविभ्रमाः।
चेलुः प्रचण्डवेतण्डा भूप्रकम्पिपदक्रमाः।।
।। ४९४।।
रत्नोतदन्तशिखरैर्यैः स्रवद्भिरनेकधा।
मेरोरप्यभवत् प्रीतिरजमेरोः कथैव का।।
।। ४९५।।
पल्याणप्रान्तसंसक्तचामरैश्चारुरोचिषः।
व्यालोलकनकोत्तंसास्तुरगास्तरलं ययुः।।
।। ४९६।।
इति सन्नह्य राजानावजमेरुं समेत्य च।
मध्येराजपथं वीक्षाञ्चक्राते भादराभिधम्।।
।। ४९७।।
भादरोऽपि पुरः प्रह्वौ समुद्वीक्ष्य जयाजितौ।
दिष्ट्या दृष्टौ स्थ इत्युक्त्वा समुपालभत क्षणम्।।
।। ४९८।।
अहो नु खलु भो कूर्मराष्ट्रौढौ ब्रूत मा चिरम्।
कथं नः सामरं क्षेत्रं युवाभ्यामात्मसात्कृतम्।।
।। ४९९।।
उपालम्भमिति श्रुत्वा दत्तं भादरसाहिना।
उवाच वचनं वाग्मी जयवर्मा कृताञ्जलिः।।

।। ५००।।
भृत्यां कुर्मस्तव पुनरद्यः कस्य पटुं प्रभो।
एवं निवेद्य विनयी प्रीणयामास भादरम्।।
।। ५०१।।
भादरोऽपि जयेन्द्रस्य प्रसन्नः प्रश्रयोक्तिभिः।
दत्वा विदायमामन्त्र्य गृहान् गन्तुं व्यसर्जयत्।।
।। ५०२।।
सन्धिं कृत्वा समिद्धार्था भादरेण विसर्जिता।
अजमेरोर्लघु प्राप पुष्करं सा नृपद्वयी।।
।। ५०३।।
समीरणसमुत्क्षिप्तकल्लोलोक्षितपुष्करम्।
समुपस्पृशतः प्रातर्यथावद् ब्रह्मपुष्करम्।।
।। ५०४।।
अनुयन्नजितं राजा गव्यूतिद्वयमात्रकम्।
व्यसर्जयत् समामन्त्र्य योधैर्योधपुरं प्रति।।
।। ५०५।।
परिवृत्याऽथ बलितो बलेन बलविक्रमः।
फागीं प्रफुल्लकमलैः पल्वलैः प्राप वेष्टिता।।
।। ५०६।।
फागीपुरादथोत्थाय समुत्थापितवाहनः।
निवायीपदमापेदे प्रान्तव्याकोशकेतकम्।।
।। ५०७।।
तत्र विश्रम्य चत्वारि दिनानि दिनकृन्मताः।
कटकेन कटुः प्राप जलायपुरभेदनम्।।
।। ५०८।।
उपायनं जलायेन्द्रः समर्प्य कुशलो नमन्।
भोजयामास कमठं हठात्सबलवाहनम्।।

।। ५०९।।
भुक्त्वा पीत्वा प्रसन्नः सन्कमठः स्वां पुरीं गतः।
कुशलेन नमस्कारकुशलेन विसर्जितः।।
।। ५१०।।
अब्दे वसु-रसाद्रीन्दावूर्जे मासि पुनर्जयः।
यात्रां व्यधत्त नैकत्र स्थितिरुद्यमिनां क्वचित्।।
।। ५११।।
ग्रामानावर्ज्य टेटेराप्रभृतीन्भृतसाधनः।
प्रयागं प्राप यागार्थी त्रिवेण्यामाप्लुतोऽभवत्।।
।। ५१२।।
यागं विधाय विधिवद्दानाध्यक्षानुमोदितः।
ददद्दानानि जग्राह शुभोदर्का द्विजाशिषः।।
।। ५१३।।
हन्ताऽथ दैवयोगेन तत्राऽस्य वसतस्तनौ।
विस्फोटान्व्यञ्जयामास शीतला शीतलप्रिया।।
।। ५१४।।
ॐ नमः शीतलादेव्यै जपन्नष्टार्णवं मनुम्।
मनुजेन्द्रो ननु स्फोटव्याधिना पर्यमुच्यत।।
।। ५१५।।
राज्ञः परन्तु तत्रैव दौर्बल्येन प्रयोजितः।
आसीत् षण्मासपर्यन्तमावासः पटसद्मनि।।
।। ५१६।।
अथ क्रमेण नैरुज्ये जाते भेषजयोगतः।
यावत्प्रचक्रमे गन्तुमजितस्तावदाययौ।।
।। ५१७।।
दृष्ट्वाऽन्योन्यं नतौ पश्चात्कुशलप्रश्नकारिणौ।
पुनर्गाढं कृताश्लेषौ मुमुदाते जयाऽजितौ।।

।। ५१८।।

सह प्रतिष्ठमानौ तौ ढुण्ढारमरुपार्थिवौ।
प्रेमसंवादलीलाभिर्बादलीमेत्य तस्थतुः।।

।। ५१९।।

स्थित्वा तत्र यथाकामं दिवसानि कियन्त्यपि।
अजितेन कुरुक्षेत्रं पुरुश्रीः प्राप पार्थिवः।।

।। ५२०।।

वर्षे नन्दरसाद्रीन्दावूर्जे कीर्तिभिरुज्ज्वलः।
सस्नावुपोषितः प्रातः कूर्मः संकल्पकोविदः।।

।। ५२१।।

निर्माय क्ष्मां सुवर्णस्य वर्णाश्रमनियामकः।
स नानानामगोत्रेभ्यो विप्रेभ्यः प्रददे तताम्।।

।। ५२२।।

सहैवाऽजितसिंहेन साठोरास्थानमेत्य सः।
तीर्थश्रद्धालुरवसद्दिवसानि बहून्यपि।।

।। ५२३।।

तीर्थे स्तः पूर्वतस्तस्मात्सरसीगहनस्थिती।
तत्र गत्वा नृपः स्नात्वा ददौ दानान्यनेकशः।।

।। ५२४।।

साठोरां पुनरासाद्य दलं भादरसाहिने।
किं कुर्मोऽद्येति कूर्मेन्द्रोऽलिखल्लाहोरवासिने।।

।। ५२५।।

विमृश्य भादरेन्द्रोऽपि देशोपप्लवमुच्चकैः।
जयायोज्जयिनीं प्रादादजिताय च गुर्जरम्।।

।। ५२६।।

एवं देशाधिकारं तौ भादरादभ्यसादरम्।
हरिद्वारमुपस्पृश्य सामलीग्राममापतुः।।

।। ५२७।।
सामलीतः समुत्थाय स्थित्वा वागपथे दिनम्।
विशिष्य लङ्घिताध्वानौ यमुनामेत्य सस्नतुः।।
।। ५२८।।
यमुनातरणे जाते तरणिं मरुनीवृतः।
प्रस्थाप्य योधनगरं जयस्तालवनीं ययौ।।
।। ५२९।।
पश्यंस्तालवनीं तुङ्गां स्तुवंस्तालाङ्कदोर्बलम्।
गच्छन्बलेन कच्छेन्द्रो नरूकनिमधूनयत्।।
।। ५३०।।
नरूकनिनृपेणासीद्दुर्गस्थेन जयेशितुः।
नासीरस्थनरूकस्य रणः परमदारुणः।।
।। ५३१।।
साटोपं तोपयन्त्राणां धमत्कारा द्विषां हृदि।
डाकिनीसंसदट्टाट्टहासा इव भयं व्यधुः।।
।। ५३२।।
समूलमुन्मुखैस्तोपैदुर्गं विधमति स्म सः।
ब्रह्माण्डमिव वात्यौघैः कल्पानल्पप्रभञ्जनः।।
।। ५३३।।
समूलखातमुत्खाय दुर्गं दण्डितदुर्गमः।
वसुवापुरमुल्लङ्घ्य पेदे स्वां नगरीं नृपः।।
।। ५३४।।
जये विशति बिभ्राजे पुरी नन्दितनागरा।
राजमार्गाट्टवेदीस्थवधूटीगीतिमङ्गला।।
।। ५३५।।
ततः परं परोन्मूली सन्तोषाय हविर्भुजाम्।
हवनं कारयामास ब्राह्मणैः कूर्मपार्थिवः।।

।। ५३६।।
उद्यानस्यापनीयाऽथ प्राचीनं नाम यत्स्थितम्।
जीर्णोद्धारी धराधारी चक्रे जयनिवासकम।।
।। ५३७।।
उडुपेनावतरितुं निवासे जयपूर्वके।
बन्धादानायि कूर्मेण कुल्या गम्भीरवाहिनी।।
।। ५३८।।
भादरे स्वर्गते दिल्लीं मोजदीराज्ञि शासति।
दिदृक्षुः सामरं भूपः प्रतस्थे कूर्मनायकः।।
।। ५३९।।
तद्वदेवाययौ योधपत्तनादजितः पुनः।
वरीवर्ति यदस्याऽपि स्वामित्वं सामि सामरे।।
।। ५४०।।
अन्योन्यनर्ममसृणः कूर्मराष्ट्रोढमेलकः।
तोपध्वनिप्रतिध्वानकुध्रकुक्षिम्भरिर्बभौ।।
।। ५४१।।
सम्भाव्य सामरं विष्वक्सज्जसामन्तयामिकम्।
नृपः सुश्राव हिण्डोने सुखासैय्यदजं दरम्।।
।। ५४२।।
सेनां सम्प्रेष्य सेनां स तया निर्जित्य सैय्यदम्।
कार्तिके पुष्करं स्पृष्ट्वा दत्तवानतुलां तुलाम्।।
।। ५४३।।
राष्ट्रोढे याति राष्ट्रं स्वं राजाऽप्याजावरिन्दमः।
हस्तेरापत्तने न्यस्य गुल्ममम्बावतीं ययौ।।
।। ५४४।।
निम्नोन्नततयाऽन्योन्यं खचितानि ग्रहाण्यलम्।
दाडिम्यामिव बीजानि पुरि पश्यन्ननन्द सः।।

।। ५४५।।
दिवसेषु व्यतीतेषु दुर्भिक्षार्त्तिरजायत।
तेन ढुण्ढारदेशस्थाः प्रजाः क्षुत्क्षामतां दधुः।।
।। ५४६।।
दृष्ट्वा बुभुक्षया दूनाः प्रजा व्रजदसुव्रजाः।
ववर्ष धान्यवर्षाणि मेदिनीमेघवाहनः।।
।। ५४७।।
प्रवाह्य धान्यधाराभिर्दुर्भिक्षदवमुद्धुरम्।
अगर्जन्नेव भूमीन्द्रः प्रजामस्थापयत्परम्।।
।। ५४८।।
दिल्ल्यामारोप्य फरकं मोजदीन्द्रादनन्तरम्।
समवाप नृपः पूजां यां प्राञ्चोऽपि न लेभिरे।।
।। ५४९।।
फरकप्राप्तसत्कारः कृत्वा मुत्सवमुत्सवम्।
विहारीप्रभृतीनां स कवीनामशृणोत्कृतिम्।।
।। ५५०।।
सरसां स कवीन्द्राणामभिनन्द्य कृतिं कृती।
स्वयं सम्भावयामास पारगः काव्यपद्धतेः।।
।। ५५१।।
कवीनामानने नूनं सुधा साक्षात्प्रतिष्ठिता।
यदमी वचसा दातर्ज्जीवयन्ति मृतानपि।।
।। ५५२।।
इत्याद्युत्प्रेक्ष्य बहुधा वदान्यो व्यतरद् वसु।
कवीन्द्रभरणं राज्ञां विदुराभरणं विदः।।
।। ५५३।।
पफाण फरकादेशादनाशास्य जयो जयः।
शिप्रानिलललद्वाह्योद्यानामुज्जयिनीं प्रति।।

।। ५५४।।

स मालपुरमुल्लङ्घ्य करवालकरः पथि।
दुग्धपत्तनफालेन बुधेनाऽन्वगगम्यत।।

।। ५५५।।

हड्डानां राजधानीं स बुन्दीमाक्रम्य विक्रमी।
कूर्मान्वयवनीसिंहो बुधसिंहं न्यवीविशत्।।

।। ५५६।।

कच्छोथागच्छदुदयपुरीमुदयदिन्दिरः ।
अपिच्छिलामपि पुनः सदा कुक्षिस्थपिच्छिलाम्।।

।। ५५७।।

संग्रामसिंहराणेन्द्रः श्रीमानमरसिंहजः।
गव्यूतिषट्कपर्यन्तं समभ्येति स्म कच्छपम्।।

।। ५५८।।

आसीदसीमसौहार्दपेशलः श्यालभामयोः।
मिथः स्वागतसंल्लापो मेलापः प्रीतिवर्द्धनः।।

।। ५५९।।

पुरं प्रविश्य संग्रामसिंहेन विहितादरः।
सभामास्थाय रीतिज्ञः शुशोच श्वशुरं मितम्।।

।। ५६०।।

श्रामं विश्रम्य पादोनं तत्र श्यालानुरोधतः।
यशस्वी याचकौघेभ्यो वितितारतरां वसु।।

।। ५६१।।

सम्बन्धिना कथमपि स निमन्त्र्य विसर्जितः।
गच्छन्नुज्जयिनीं प्राप्तश्चित्तौढविपिनाऽध्वना।।

।। ५६२।।

पुरीमुज्जयिनीमेत्य प्रौढमुज्जयनीरदः।
शिप्रापयांस्युपस्पृश्य वसुवर्षं ववर्ष ह।।

।। ५६३।।
दोषानिव रुहेलांस्तानुमदिन्यां तनाविव।
भूयो भिषगिवावेत्य सञ्चितान्निरकासयत्।।
।। ५६४।।
कन्यां ददति तत्रत्यै गिरा खीचीन्द्रधीरजे।
प्रपद्य कोटरं कूर्मः परिणिन्येऽस्य कन्यकाम्।।
।। ५६५।।
धनानि धनदौदार्यः सूतादिभ्यो वितीर्य सः।
ऊनरीणं गतः पर्यणैषीत्तद्राजकन्यकाम्।।
।। ५६६।।
उद्दामयौवनः कृत्वा दारद्वयपरिग्रहम्।
जवादुज्जयिनीमेव जयवर्मा पुनर्ययौ।।
।। ५६७।।
दारैर्द्वाभ्यां धरादारः स शिप्रातटिनीतटे।
सन्निकृष्टासु वर्षासु विजहार यथारुचि।।
।। ५६८।।
अथ संववृतेऽनेहा नीरमेदुरनीरदः।
पारावारकलत्राणां युवभावविभावनः।।
।। ५६९।।
चमत्कृततडित्पुष्पमेघद्रुपिहितातपम्।
स्रवद्घनरसश्यामं वियद्विपिनमाबभौ।।
।। ५७०।।
उच्चैराध्मापयामासुर्वर्षामेघान्न केवलम्।
पवमानप्रकोपेण जनता जठराण्यपि।।
।। ५७१।।
दूर्वाजिरे विरेजुस्ताः सहस्राक्ष्यवधूटिकाः।
नीलाश्मकुट्टिमे कीर्णा माणिक्यगुटिका इव।।

।। ५७२।।

धारासम्पातविक्लिन्नकृष्णमृल्लिप्तनेमयः ।
कथञ्चिदूहिरेऽर्वद्भिः स्यन्दनाः पिच्छिले पथि।।

।। ५७३।।

सौदामिनीवलयितप्रान्ता कादम्बिनी बभौ।
पीताम्बरं वसानस्य गोविन्दस्य तनुर्यथा।।

।। ५७४।।

हस्तेनोदस्य संव्यानं सूर्यस्थगितमस्तकाः।
पङ्किलासु प्रतोलीषु बभ्रमुः पौरसुभ्रुवः।।

।। ५७५।।

तमिस्रामनुकुर्वत्सु दुर्दिनेषु निरन्तरम्।
उपवासा ववृधिरे भास्करं वीक्ष्य भोजिनाम्।।

।। ५७६।।

तडिज्ज्याबन्धरुचिरं नैकवर्णचमत्कृति।
जजृम्भे व्योम्नि जम्भारेः कार्मुकं तोरणाकृति।।

।। ५७७।।

नक्षत्रमब्दपिहिते व्योम्नि यद्वन्न दिद्युते।
न क्षत्रं दिद्युते तद्वद् भूतले पङ्कदुर्गमे।।

।। ५७८।।

क्षेत्राङ्गणेष्वधिग्रामं मञ्जर्यो या वनालजाः।
विष्वक्खचितमुक्तानां शेखराणां श्रियं दधुः।।

।। ५७९।।

अलसं कर्दमक्लिन्नपादाङ्गुलिसमुद्भवम्।
विलिखन्ती नखैः कापि कामिनी सीत्कृतं दधौ।।

।। ५८०।।

वहदुत्तुङ्गसौधाग्रप्रणालीव्यूहमेदुरम् ।
झिल्लीमण्डूकमुखरं धाराद्वैतमवर्तत।।

॥ ५८१॥
स्तनितैः स्तनयित्नूनामुपर्युपरि धावताम्।
अदभ्रं व्यञ्जयामास खं शब्दगुणमात्मनि॥
॥ ५८२॥
रेजिरे पवनस्फालनृत्यन्नीरजकुड्मलाः।
दीर्घिका नवपानीयमग्नसोपानपङ्क्तयः॥
॥ ५८३॥
सरांसि सिन्धुविच्छित्तिं दधुरुल्लोललीलया।
स्पर्द्धन्ते प्राप्य सम्पत्तिं महद्भिः सह पामराः॥
॥ ५८४॥
विनैव गुणमर्णांसि कूपाः समधिकं भृताः।
श्रीमदान्धजडाभूपा द्रविणानीव सन्ददुः॥
॥ ५८५॥
प्रफुल्लनीपकुटजा स्निग्धश्यामलशाद्वला।
शैलसानुशयानाब्दा भूरभूद्बर्हिरङ्गभूः॥
॥ ५८६॥
लीलालोलालका बाला वर्षे विरमति क्षणम्।
निर्ममुर्गोपुरादीनि मृत्स्नया पुरवीथिषु॥
॥ ५८७॥
वर्षासु विहरन्दारैः सौधाग्रे धूयिताम्बरः।
स शिप्रालहरीरङ्गान्दर्शं दर्शममोदत॥
॥ ५८८॥
एतस्मिन्नन्तरे भानोर्ग्रहणं समजायत।
तदानीं तत्र सस्नातः शिप्रायां दानमस्पृशत्॥
॥ ५८९॥
सौवर्णानर्णवान्सप्त निर्माय परमायतान्।
क्षिप्रं सात्कारयामास दानवीराग्रणीर्नृपः॥

।। ५९०।।
चक्रे शिप्रातटे सौधं सर्वत्रामन्दरञ्जितम्।
परं प्रचक्ष्महे येन प्रांशुत्वान्मन्दरं जितम्।।
।। ५९१।।
सम्राट्कुलमणिः कोऽपि जगन्नाथ इति द्विजः।
ज्योतिषां गणिते दक्षो दाक्षिणात्योऽथ तं ययौ।।
।। ५९२।।
शिष्यवर्गेण गर्गश्रीर्निसर्गसुभगस्मितम्।
वासुदेवं सुदामेव सम्राट् सम्राजमासदत्।।
।। ५९३।।
सम्राट्सिद्धान्तनामानं सन्दर्भं गणितान्यपि।
निर्माय भूभुजे सम्राडुपढौकयति स्म सः।।
।। ५९४।।
उवाच च वचो राजन्भवदीययशःपटैः।
दिशः स्वमङ्गमावृत्य सकलाः सुखमासते।।
।। ५९५।।
मदाशा त्वद्यशोवासो वसानेयं सितायतम्।
त्वां प्राप्ता प्राप्य मत्सार्थमस्याः साधय कामनाम्।।
।। ५९६।।
कामान्साधयितुं नर्णांमवतारस्तव प्रभो।
नातो वक्तव्यमित्येनां पूरयाशां त्वमद्य मे।।
।। ५९७।।
प्रावृषेण्यः किमब्दोद्भिर्नोदन्यां द्यति चातकीम्।
अनेहसं विना त्वं तु हरसे तृषमर्थिनाम्।।
।। ५९८।।
कल्पद्रुलब्धजन्मा यः प्रवादः कीर्त्तिलक्षणः।
प्रवाहितस्त्वया सोऽपि दानपानीयनिर्झरैः।।

।। ५९९।।
इत्युक्त्वा विररामाऽसौ सम्राट् सम्राजमग्रतः।
महात्मानः प्रकृत्यैव भवन्ति मितभाषिणः।।
।। ६००।।
अथोच्चैर्भक्तिसद्भावसमावर्जितमस्तकः।
जजल्प जयसिंहस्तं ज्योतिर्वित्सिंहमादरात्।।
।। ६०१।।
मन्त्रं मन्त्रज्ञ सावित्रं त्वत्तः शिक्षितुमुत्सहे।
यदीयजपमात्रेण ब्राह्मं स्फुरति तन्महः।।
।। ६०२।।
इत्यर्थितोऽर्थपतिना गुणैरस्य वशीकृतः।
अङ्गीचकार वाग्भङ्गीतिरस्कृतगुरुर्गुरुः।।
।। ६०३।।
ततः सम्भृतसम्भारः सह सद्गुरुणाऽमुना।
राजा शिप्रानदीस्नातः सावित्रीमन्त्रमग्रहीत्।।
।। ६०४।।
विनिःसृतं गुरोर्वक्त्रात् सावित्रीमन्त्रजं महः।
तेने तेजोऽधिकं राज्ञि प्रविश्य श्रवणाध्वना।।
।। ६०५।।
स्वर्णलक्षं तथा भूमिं पञ्चवासांस्यलङ्कृतीः।
निवेद्य गुरवे राजा मेने कार्पण्यमात्मनः।।
।। ६०६।।
द्विपेन्द्रे गुरुमारोह्य स्वयं पादचरः पुरः।
निकेतनं नृपो निन्ये केतनोन्नतिनूतनम्।।
।। ६०७।।
मन्त्रदीक्षामिति प्राप्य गुरुतो गुरुसंविदः।
कृतकृत्यं जनुर्मेने तेने च सकलाः क्रियाः।।

।। ६०८।।

नन्वथो भेलसादुर्गे रुहेलकुलसम्भवः।
बली दलेलखाँसंज्ञः समुद्धतमचेष्टत।।

।। ६०९।।

दलेलचापलं श्रुत्वा चापलम्बिगुणो नृपः।
प्रतस्थे पृतनापृक्तस्तदीयदमनेच्छया।।

।। ६१०।।

सरणौ सागरवधूधौतप्राकारमण्डलम्।
सागरं पुरमापेदे धैर्याधरितसागरः।।

।। ६११।।

सागरावसथाद्गच्छन् कच्छेन्द्रो भेलसा पथि।
दलेलपीडितेनासीच्छत्रशल्येन सङ्गतः।।

।। ६१२।।

अभ्युद्यते जयरवौ रुहेलेन्द्रस्य तेजसा।
त्यक्ताऽपि पुनरग्राहि मनसा रविकान्तता।।

।। ६१३।।

प्रपूर्य सागरं यान्तीं मान्तीं सागरकुक्षिषु।
लघु सा लङ्घयामास वाहिनीं कूर्मवाहिनी।।

।। ६१४।।

अध्यध्वमुच्चकैर्दुर्गं पहरावं विजित्य सः।
प्रायच्छच्छत्रशल्याय परार्थं महतां श्रमः।।

।। ६१५।।

ततो गत्वा रुहेलेन्द्रं निहत्य रणमूर्द्धनि।
समृद्धं भेलसास्थानमात्मसात्कुरुते स्म सः।।

।। ६१६।।

वसतस्तत्र तस्यासीद्वृत्तान्तः कर्णगोचरः।
एति रेवां समुत्तीर्य दाक्षिणात्या चमूरिति।।

।। ६१७।।
साकं स छत्रशल्येन समसज्जत तत्क्षणम्।
श्रुत्वा सपत्नसन्नाहं स्थिरता क्व मनस्विनाम्।।
।। ६१८।।
सृजन्ती दिक्षु कुन्तौघैर्नीलोत्पलवनीमिव।
कौर्मी चण्डा चमूः प्राप चोथिजोनिपुरान्तिकम्।।
।। ६१९।।
तत्र युद्धमभूद्घोरं दाक्षिणात्यैर्जयेशितुः।
क्षताश्वद्विपवीरास्रपानलोलुपभैरवम्।।
।। ६२०।।
कमठैर्हन्यमानास्ते दाक्षिणात्या महाभटा।
जिजीषवो रणं हित्वा कान्दिशीकाः प्रदुद्रुवुः।।
।। ६२१।।
द्रुतेषु दाक्षिणात्येषु विजयी जयसिंहराट्।
सम्भाव्य सङ्गरक्षेत्रं मानघातीमहिण्डत।।
।। ६२२।।
तत्र रेवामुपस्पृश्य द्रविणप्रीणितद्विजः।
न्यवर्तत निवृत्तारिर्वृत्रारिसमवैभवः।।
।। ६२३।।
गच्छन्नुज्जयिनीं कच्छः कच्छरूढपटेरकाम्।
दशां शैवलिनीमेत्य निवासमकरोच्चिरम्।।
।। ६२४।।
अथ सादरमाहूतो राजा फरकसाहिना।
उज्जयिन्यां निजं गुल्मं धृत्वा प्रातिष्ठत द्रुतम्।।
।। ६२५।।
एत्य भीमपुरं राजा बद्धकौतुककङ्कणः।
तत्रत्य राजतनुजां परिणिन्ये यथाविधि।।

।। ६२६।।
वितीर्य वसु तत्राऽपि याचकेभ्यो यथायथम्।
सावरोधः शनैर्गच्छन्नाऽऽप कच्छोऽम्बिकावतीम्।।
।। ६२७।।
वामाङ्गे धूर्जटेर्वामां श्रियं वक्षसि शार्ङ्गिणः।
दर्शयन् सौधचित्रेषु रेमे रम्यश्रिया नृपः।।
।। ६२८।।
द्विमासमेष विश्रम्य श्रीमानम्बावतीपुरि।
प्रतस्थे वासवप्रस्थं विन्ध्यप्रस्थनिभैरिभैः।।
।। ६२९।।
नीराणपत्तने कृत्वा विवाहं पुनरात्मनः।
इन्द्ररोलीमतिक्रम्य दिल्लीमेवाऽभ्यपद्यत।।
।। ६३०।।
राजानमागतं श्रुत्वा मन्त्रिणश्चक्रवर्तिनः।
अस्य सम्मुखमाजग्मुः समानयनहेतवे।।
।। ६३१।।
सर्वे सर्वंसहा शक्रं प्रणेमुः प्रणयस्पृशः।
सोऽपि तैः सह साहीन्द्रं नन्तुमुत्कण्ठितोभ्ययात्।।
।। ६३२।।
ववन्दे मञ्चमारूढं फरकं कूर्मनायकः।
वितीर्णं तेन जग्राह महार्हं पारितोषकम्।।
।। ६३३।।
एकदा मेदिनीजानेरनीकानि निरीक्षितुम्।
ययावमुष्य शिविरं फरको मन्त्रिभिर्वृतः।।
।। ६३४।।
अथ मत्तकरीन्द्रौघकरशीकरदुर्दिनम्।
वाजीन्द्रव्याजपवनक्रियमाणगतागतम्।।

।। ६३५।।
कुथावृत्तबलीवर्दस्कन्धासक्तमहारथम्।
रक्तपीतशिरस्त्राणकञ्चुकोद्भासिसैनिकम्।।

।। ६३६।।
भैरीमृदङ्गपटहशङ्खदुन्दुभिनादितम्।
उड्डीयमानसिन्दूररागोत्साहितयूथपम्।।

।। ६३७।।
सिंहनादैर्भटेन्द्राणां मुखरीकृतदिङ्मुखम्।
उद्दामद्विरदस्थेन सीतारामेण रक्षितम्।।

।। ६३८।।
उत्तुङ्गतोपयन्त्राग्रकम्पमानपताकिकम्।
प्रतिव्यूहप्रतिव्यूढपञ्चरङ्गध्वजोच्छ्रयम्।।

।। ६३९।।
पत्तिपङ्क्तिपदाघातधीरध्वनितभूतलम्।
करालकरवालालीविडम्बिततडिद्गतिः।।

।। ६४०।।
पृष्ठस्थनालनादार्त्तक्रमेलधुतमस्तकम्।
नासीरवीरमिथुनप्रदर्शितमृषामृधम्।।

।। ६४१।।
लिखता व्योम्नि चित्राणि सरत्नकवचांशुभिः।
चण्डसामन्तचक्रेण मध्ये मध्ये चमत्कृतम्।।

।। ६४२।।
क्वचित्सुरां क्वचिद्भङ्गां फणिफेनरसं क्वचित्।
पिबद्भिः पाययद्भिश्च योधैरारब्धकौतुकम्।।

।। ६४३।।
निपीय धूम्रयन्त्राणि वमद्भिर्धूममास्यतः।
क्वापि क्वापि मिथो योधैः सोत्कासं कृत।।

।। ६४४।।
परिहासोक्तिमात्रेऽपि कुप्यद्भिरितरेतरम्।
कुत्राऽप्यारब्धसमरं शूरैः साहसशालिभिः।।
।। ६४५।।
सैन्याध्यक्षसमुत्क्षिप्तपञ्चशाखाग्रसंज्ञया।
अवरुद्धं कथमपि समुद्रमिव वेलया।।
।। ६४६।।
परमाहवहेवाकि प्रायः क्रूरविचेष्टितम्।
समन्तात् सज्जशस्त्रास्त्रं भीतीनामपि भीतिदम्।।
।। ६४७।।
अहङ्कारसमाध्मातमप्रधृष्यं विरोधिभिः।
निधानं शौर्यराशीनां प्रधानं दण्डसाधनम्।।
।। ६४८।।
पादः पत्तिमिवाक्षोभ्यं किन्तु भङ्गविवर्जितम्।
महारण्यमिवागम्यं किन्तु नो विजनान्तरम्।।
।। ६४९।।
नैकक्रोशसमावेशं व्याजृम्भितजयं जयः।
स्वसैन्यं दर्शयामास फरकाय प्रसेदुषे।।
।। ६५०।।
तव सहैव शिविरमागत्य प्रांशुकेतनम्।
सम्राजे सम्यगुपदामुपढौकयति स्म सः।।
।। ६५१।।
जट्टोत्थानमथ श्रुत्वा फरकेन्द्रो विविग्रधीः।
जयसाध्यमिदं कर्म विमृश्येति जगाद तम्।।
।। ६५२।।
जहि जट्टान् महाराज हन्त स्निह्यसि चेन्मयि।
पुरापि भवतः पित्रा जिता जट्टा इति श्रुतम्।।

।। ६५३।।

तदद्य गच्छ कच्छेन्द्र जयस्ते जय सेत्स्यति।
दिल्लीसाम्राज्यमधुना त्वदेकायत्तमेधते।।

।। ६५४।।

इति सन्नाह्य नृपतिं फरको जट्टपीडितः।
जयाज्ञामनुवर्त्तध्वं स्वबलान्यप्ययोजयत्।।

।। ६५५।।

प्रतस्थे स हरिप्रस्थाज्जेतुं जट्टन्धनञ्जयः।
सम्राड्गिरा यथौदीच्यं धनं जेतुं धनञ्जयः।।

।। ६५६।।

चमूधूतरजोभारैः खकुक्षिम्भरिभिर्भृशम्।
अक्षीण्यनिमिषाक्षाणां पूरयन्प्रययौ रयात्।।

।। ६५७।।

दंष्ट्रा दुर्दर्शनो हैमश्चारुचामरचन्दिरः।
मत्स्याकृतिर्बभौ नेतुः केतुर्हेतुर्द्विषद्धियाम्।।

।। ६५८।।

राधाकुण्डं क्रमादेत्य सर्वबाधापहोदकम्।
कार्तिकेयसमः सस्नौ कार्तिके मासि पार्थिवः।।

।। ६५९।।

विप्रान् सन्तर्प्य वसुभिर्भुक्त्वा पीत्वा वसूपमः।
चमूमायोज्य चटुलां जट्टानेवाभ्यपद्यत।।

।। ६६०।।

मुण्डहेलापरिसरे जट्टैराजिरजम्भृत।
जयोऽजनि जयेन्द्रस्य जट्टानां च पराजयः।।

।। ६६१।।

सामन्तं दन्तलोष्ट्रीस्थाञ्जट्टान् जेतुं न्ययुङ्क्त सः।
जगुर्जोरावरं नाम्ना यं शिवब्रह्मपोतकम्।।

॥ ६६२॥

जोरावरोऽपि घोराभैर्जट्टान्निर्जित्य पट्टिशैः।
दन्तलोष्ट्रीं विलुण्ठ्य द्राग्जयं पेदे जयोज्ज्वलः॥

॥ ६६३॥

व्यूहाहे तत्र राज्ञा द्वे राजकन्ये समागते।
एका हड्डेन्द्रयोधोत्था द्वितीया रावरामजा॥

॥ ६६४॥

विलासव्यसनी कृत्वा दारद्वयपरिग्रहम्।
प्रपेदे फरकप्रोक्तः स्थूलं जट्टजिघांसया॥

॥ ६६५॥

तोपध्वनिध्वनद्दुर्गमयोगोलकदुर्दिनम्।
युद्धं बभूव कठिनं कमठाभीरसैन्ययोः॥

॥ ६६६॥

तदा तत्र महाजन्यव्याजाद् व्याजम्भृत ध्रुवम्।
महीयान् वीरसंवर्तो योगिनीचक्रचङ्क्रमः॥

॥ ६६७॥

राजावतो महाबाहुर्नाम्ना भादरसिंहकः।
जर्जरीकृत्य जट्टौघान् निर्जरीधवतां दधौ॥

॥ ६६८॥

तथैव दीपसिंहोऽपि शेखावतकुलोद्भवः।
व्यापारयन्नसिं श्रान्तो जट्टैः सम्भूय हा हतः॥

॥ ६६९॥

सामन्तौ पतितौ दृष्ट्वा जयवर्मा प्रचण्डरुट्।
सञ्जहार रणे जट्टान् रुद्रो जन्तूनिव क्षये॥

॥ ६७०॥

जयेन निहिताः पेतुर्द्विपा अश्वा रथा भटाः।
येषां मेदोभिरन्वर्था मेदिनी परमैधत॥

।। ६७१ ।।
शरणं प्राप तं भीतश्चूडामल्लोऽथ जट्टप:।
सापराधोऽपि हि नतो महद्भिरनुगृह्यते।।
।। ६७२ ।।
अनुवर्तस्व फरकं करक्लृप्तकर: स्वयम्।
इत्थमादिश्य जट्टेन्द्रं जगाम मथुरां जय:।।
।। ६७३ ।।
मथुरामथ स प्राप्य मखं कृत्वा यथासुखम्।
सन्तर्प्य माथुरान्वित्तैर्यमुनाम्भसि सम्प्लुत:।।
।। ६७४ ।।
उषित्वा यमुनाकच्छे कच्छ: स कियतीर्निशा:।
तत: प्रोत्थाय निस्तीर्णमार्गो दिल्लीमपद्यत।।
।। ६७५ ।।
परितुष्टेन फरकसाहिना जयभूभुजे।
दत्ता राजेन्द्रपदवी पदविच्यावितद्विषे।।
।। ६७६ ।।
दिल्ल्यां तिष्ठति राजेन्द्रे फरकेन्द्रजिघांसया।
हुसेनअलिखाँ कश्चिद्दक्षिणादाययौ बली।।
।। ६७७ ।।
तत्र राजेन्द्रमाकर्ण्य राजराजेन्द्रपक्षगम्।
दिल्लीं परिहरन्दूरादुवास यवनाधम:।।
।। ६७८ ।।
आगतोऽस्मि प्रभुं नन्तुं किन्तु द्रुह्यति मे जय:।
विसर्जय तदेनं द्राक् साहिमित्यलिखद्दलम्।।
।। ६७९ ।।
अहो रह: समाहूय राजेन्द्रं फरकाधिप:।
राजन्नितो निषीदेति निवेश्य पुनरब्रवीत्।।

।। ६८०।।

हुसेनअलिखाँऽमात्यस्त्वत्तो बिभ्यति भूपते।
अतोऽद्य त्वमितो गेहाग्च्छ चेदसि मे प्रियः।।

।। ६८१।।

गिरं निगीर्य सम्राजः कच्छवाहो विचक्षणः।
प्राह प्रागेव विज्ञातहुसेनअलिखाँशयः।।

।। ६८२।।

हुसेनअलीखाँ पापी पापं त्वयि विधास्यति।
तन्न प्रेषय मामायुस्तव मन्निर्गमावधि।।

।। ६८३।।

प्रत्युतैष निहन्तव्यः सपत्नो भृत्यसंज्ञितः।
त्वां हित्वा नोत्सहे गन्तुं विज्ञः सन्किं प्रमाद्यसि।।

।। ६८४।।

इति साग्रहमुर्वीन्द्रः कटु प्राह हितं यतः।
तथापि न स जग्राह तद्विधेरीहितं यतः।।

।। ६८५।।

जयं गन्तुमनिच्छन्तं विससर्ज प्रसह्य सः।
विपर्ययेण गृह्णाति गतायुर्हि हिताहितौ।।

।। ६८६।।

राजेन्द्रे दूनमनसि स्वां पुरीं समुपेयुषि।
हुसेनअलीखाँ पेदे मरहट्टबलैर्वलन्।।

।। ६८७।।

विलयन्तं जयः क्वेति फरकं स हुसेनकः।
निहत्य कलयामास साम्राज्यपदमुच्चकैः।।

।। ६८८।।

हुसेनः फरकं हत्वा पुरमार्कवरं गतः।
सुश्रुवानिति राजेन्द्रः शुशोच च चुकोप च।।

।। ६८९।।
कोपेन तस्य नेत्रान्तर्लालिमा तादृगैह्यत।
येन तद्राजभवनमस्रोक्षितमिवाबभौ।।
।। ६९०।।
हुसेनअलिमुद्दिश्य कच्छलेखर्षभः क्रुधा।
लिखति स्म स्वयं लेखं तस्य तात्पर्यमुच्यते।।
।। ६९१।।
त्वया हुसेन सम्राजि यत्कृतं क्षान्तमेव तत्।
इदानीं तत्पदे धेहि तद्वंश्यं चेच्छमिच्छसि।।
।। ६९२।।
अन्यथा वर्तसे चेत्त्वं चेत चेतसि मा चिरम्।
हुसेन सज्जसेनं मां मन्यस्व क्षिप्रमागतम्।।
।। ६९३।।
इति पत्रं हुसेनाय प्रापय्य समनन्तरम्।
तावत्सज्जचमूजातो विप्रानाहूय सोऽब्रवीत्।।
।। ६९४।।
गच्छामोऽद्य वयं विप्रा युद्धाय स्थिरनिश्चयाः।
अम्बावती समृद्धा वः प्रणिपत्य समर्पिता।।
।। ६९५।।
सिद्धकामाः समेष्यामो जातु चेद्भवदाशिषा।
तदा पुनर्गृहीष्यामो दत्वा मूल्यक्षमं वसु।।
।। ६९६।।
राज्यं वितीर्य विप्रेभ्यो विप्रेक्षितशुभो मुदा।
जेतुं हुसेनअलिखाँ सेनया प्रचचाल सः।।
।। ६९७।।
सन्नाहसिंहनादेन कच्छानामच्छकर्मणाम्।
निपेतुराऽऽमगर्भाणि शत्रुस्त्रीणां समन्ततः।।

।। ७९८।।

शेखमथनरूगोगमुख्यैः सामन्तशेखरैः।
नक्षत्रेशो न नक्षत्रैर्न क्षत्रेश इवैक्षि सः।।

।। ६९९।।

दर्पकण्डूसमुद्दण्डचण्डदोर्दण्डमण्डलः।
कमठाखण्डलः काण्डखण्डितद्विडहिण्डत।।

।। ७००।।

क्षुणा प्रतिष्ठमानेन क्ष्मा बलेन रजोमिषात्।
निवेदितुमिव स्वार्तिं देवेभ्यः स्वरपद्यत।।

।। ७०१।।

अभिक्रामति विक्रान्ते सामि मार्गं महीपतौ।
हुसेनअलिखाँ भीतः साम्राज्ये मम्मदं न्यधात्।।

।। ७०२।।

प्रतिज्ञातमभिप्रायं सिद्धमाकर्ण्यकच्छपः।
अम्बावतीं निववृते वृत्तार्थः को हि युध्यति।।

।। ७०३।।

हुसेनदर्पपवनसर्पः सर्पद्यशा नृपः।
पुरीं जग्राह विप्रेभ्यो दत्वा मूल्यक्षमं वसु।।

।। ७०४।।

अथ राष्ट्रोढराजेन व्यसर्जि जयभूभुजे।
आगम्यतां विवाहार्थमित्यालिख्य दलं शुभम्।।

।। ७०५।।

विवाहार्हमलङ्कारं धृत्वाऽङ्गेषु यथायथम्।
इयाय योधनगरं महताऽडम्बरेण सः।।

।। ७०६।।

परिणीय नृपस्तत्र श्रीमानजितनन्दिनीम्।
उवास मारवीबद्धहृदयो मारमञ्जुलः।।

।। ७०७।।

हुसेनो याति ढुण्ढारमिति दूतैर्निवेदितः।
मरोररं पुरं प्राप स परम्परितैर्हयैः।।

।। ७०८।।

पुरीमागत्य तरसा कच्छान् सन्नाह्य कृत्स्नशः।
जजागार हुसेनेन युयुत्सुः स जयी जयः।।

।। ७०९।।

मध्येमार्गं चलंश्चण्डो हुसेनअलिखाँ खलः।
हतो भटेन केनापि दैवात्तत्सैन्यवर्तिना।।

।। ७१०।।

श्रुत्वा तन्निधनं राजा निःशल्यः सुखमैधत।
शत्रुस्तत्राप्यनार्यश्चेद्बलिनोऽपि कुतः सुखम्।।

।। ७११।।

चूडामल्लेऽथ जट्टेन्द्रे कालधर्ममुपेयुषि।
दायादस्तस्य राजासीन्निगृह्य वदनं बली।।

।। ७१२।।

तत्पक्षाः कच्छपं प्राप्य प्रणम्य प्रोचुरग्रतः।
स्वामी शृणोतु वदनविज्ञप्तिं वदनेन नः।।

।। ७१३।।

चूडामल्लमनुस्थूणे स्वत्वमस्त्येव मे ध्रुवम्।
तन्निराकृत्य कोऽप्येष श्वभ्रे मामक्षिपत्खलः।।

।। ७१४।।

बत विज्ञाप्यमेतावद्देव मे तावदेव हि।
शीघ्रमुद्धरमामस्माद्विष्णुर्ग्राहादिव द्विपम्।।

।। ७१५।।

इति विज्ञप्तिमाकर्ण्य शरणागतवत्सलः।
तानाश्वाश्य ततोऽवोचत् सम्राजे जट्टदुर्नयम्।।

।। ७१६।।
रन्ध्रान्वेषी मिषं प्राप्य सम्राण् मम्मदशब्दितः।
उच्चैराज्ञापयामास तांस्तान् सामन्तपुङ्गवान्।।
।। ७१७।।
अहो नु खलु सामन्ता जट्टाधमजिघांसया।
राजेन्द्रमनुकात्स्न्येन सज्जा निर्यात माचिरम्।।
।। ७१८।।
इत्युक्ता तेन सामन्तद्वाविंशति धित्वरा।
स्वं स्वं सैन्यमुपादाय जवाद्राजेन्द्रमन्वगात्।।
।। ७१९।।
प्रातिष्ठत प्रथमतस्तेजस्वी कच्छभास्करः।
द्विषद्धैर्यसरांस्युच्चैः प्रतापेन विशोषयन्।।
।। ७२०।।
अखर्वगर्वगरिमोद्दण्डदोर्दण्डमण्डितः।
अहिण्डत स हड्डेन्द्रो बुद्धो युद्धविबुद्धधीः।।
।। ७२१।।
छत्रसिंहो नरवरपुरीनरवरो महान्।
प्रतस्थे कम्पयन् मत्तकुञ्जरैः कुञ्जवोर्जितैः।।
।। ७२२।।
जैतसिंहो महारंहाः कामापुरपुरन्दरः।
निश्चक्राम युतो योधैर्यो धैर्योद्धर्षिताम्बुधिः।।
।। ७२३।।
लवोनपत्तनपतिः शक्तिसिंह इति श्रुतः।
ययौ शक्तिधरप्रख्यः शक्तिं हस्तेन मार्जयन्।।
।। ७२४।।
रामचन्द्रो महाबाहू रामचन्द्रपराक्रमः।
ससार साङ्गदभटोऽलङ्कापुरुषमर्दनः।।

।। ७२५।।
पौत्रोऽप्याजिमसाहेर्नो नव्वावो नव्ययौवनः।
प्रातिष्ठत भटव्यूहैस्त्विङ्गत्तुङ्गतुरङ्गमैः।।

।। ७२६।।
आध्मातबाहुयुगलो मुगलो मुन्द्रफाभिधः।
पुरः प्रचक्रमे गन्तुं मूर्तो गर्व इवापरः।।

।। ७२७।।
सर्पन्साटोपमीरादः पुष्पापीडेन दिद्युते।
यथा प्रस्थोत्थपुष्पद्रुर्जङ्गमोऽञ्जनपर्वतः।।

।। ७२८।।
कालाय स महाजालविकरालकलेवरः।
महाम्मदबली प्रास्थात्सङ्ख्य सङ्ख्यमहामदः।।

।। ७२९।।
श्यावश्मश्रुसटाकीर्णवक्षावङ्गसखाँह्वयः।
जगाम जितसङ्ग्रामग्रामो जङ्घालवाहनैः।।

।। ७३०।।
परं परेतराडुग्रो महाघाटालविग्रहः।
कटुना कटकेनोत्को ययौ साबिल्लखाँ खलु।।

।। ७३१।।
मीरो मुस्तफखाँवीरो नासीरोत्कर्षदुर्ग्रहः।
ज्वालाजटालनिस्त्रिंशो व्रजति स्म भटव्रजैः।।

।। ७३२।।
इत्याद्यनेकसामन्तैर्द्वाविंशतिरलं भृता।
प्रतस्थे वासवप्रस्थात्कुर्वती द्विषतां भयम्।।

।। ७३३।।
तुरष्कस्तोमशबलावीरबाहुजवाहिनी ।
कालिन्दीपूरसंपृक्ता गङ्गेव समलक्ष्यत।।

।। ७३४।।
सा धाराघूर्णिताश्वौघा पूर्णा समिदुपस्करैः।
तूर्णमुद्गूर्णशस्त्रास्त्रा स्थूणं चूर्णयितुं ययौ।।
।। ७३५।।
विदधाना रजोवृद्धिमपापा भङ्गवर्जिता।
व्यत्यगादुच्चकैर्यान्ती वाहिनी मार्गवाहिनीः।।
।। ७३६।।
तस्यां तथा विरेजे स कच्छवाहो महामहाः।
यथाऽन्ये हन्त राजानोऽप्यज्ञापिषत किङ्कराः।।
।। ७३७।।
अनीकपतिनाऽऽज्ञप्ता राजानो जयवर्मणा।
अहं पूर्वमहम्पूर्वमितीयुर्योद्धुमिच्छया।।
।। ७३८।।
जैत्रप्रयाणमाकर्ण्य जट्टपाशो जयेशितुः।
मुमोच वहनं सोऽथ शरणं तमुपासदत्।।
।। ७३९।।
ददौ स्थूणं गिरा तस्मै राजा शरणमीयुषे।
विभीषणाय सहसा लङ्कामिव रघूद्वहः।।
।। ७४०।।
वदनावेदितपथः कदनाय स तद्विषाम्।
स्थूणदुर्गं रुरोध स्नुवप्रक्रीडानतद्विपम्।।
।। ७४१।।
परितो दुर्गमुत्तुङ्गतोपयन्त्राणि यत्नतः।
संयोज्य योद्धुमारेभे युद्धव्यापारपारगः।।
।। ७४२।।
तोपेषु निपतन्तीभिर्युगपद्दीप्रवर्तिभिः।
जिगाय जनितोद्योतस्तडिज्जालचमत्कृतिम्।।

।। ७४३ ।।

कल्पकादम्बिनीक्रूरनादन्यक्कारकारिणः ।
आसंस्तोपधमत्कारा ब्रह्माण्डपुटपाटिनः ।।

।। ७४४ ।।

गोलकैर्ज्वलनज्वालालेपिभिः पविसोदरैः ।
बभूव प्रस्खलद्भित्तेः स्थूलदुर्गस्य दुर्गतिः ।।

।। ७४५ ।।

अशक्ता योद्धुमाभीरा दुर्गमुत्कीर्य सर्वतः ।
आग्नेयक्षोदमास्तीर्य वह्निमावाप्य दुद्रुवुः ।।

।। ७४६ ।।

वह्निना स्पृष्टमात्रं तदाग्नेयं सहसा रजः ।
उच्चैरुड्डापयामास दुर्गं संस्थानदुर्गमम् ।।

।। ७४७ ।।

मूलादुत्पततोस्तस्योत्तस्थौ कोलाहलः कटुः ।
तत्तादृक् तोपरसितं जितमेकपदे यतः ।।

।। ७४८ ।।

डिड्ये पार्श्ववलद्वह्निवर्चिरुच्चैः स दुर्गराट् ।
यथा दिव्यौषधीयोगात्पुनरुद्यद्गरुद्गिरिः ।।

।। ७४९ ।।

साटोपं डयमानस्य दुर्गस्य विपुलाः शिलाः ।
उत्पत्य निपतन्ति स्म शतधा च सहस्रधा ।।

।। ७५० ।।

दुर्गं निःशेषमुन्मूल्य जट्टदर्पनिवर्हणः ।
वदनाय ददौ स्थूणमुपदाश्च ततोऽग्रहीत् ।।

।। ७५१ ।।

विसर्ज्य साहिसामन्तद्वाविंशतिररिन्दमः ।
हतशेषान् समन्विष्यन्नाभीरानभ्यपद्यत ।।

।। ७५२।।
खोहरीदुर्गपर्यन्तमन्विष्य स समन्ततः।
वयानमेत्य तत्सीम्नि चकमे मृगयारतिम्।।
।। ७५३।।
अनुद्रुतो मृगयुभिरुदग्रदुरितर्द्धिभिः।
नृसिंहः सिंहमन्विष्यन्नटवीष्वटति स्म सः।।
।। ७५४।।
उत्पुच्छमन्वयुः श्वासविलोलरसनाञ्चलाः।
वेगे नु मातरिश्वानः श्वानः कच्छविडौजसम्।।
।। ७५५।।
विचित्रकुसुमोत्तंसोद्गुच्छदाभतनुच्छदः।
वनवीथीषु ववृते वसन्त इव पार्थिवः।।
।। ७५६।।
पुष्पपुञ्जेषु कुञ्जेषु मञ्जुगुञ्जत्षडङ्घ्रिषु।
निलीय कच्छवाहं तं ददृशुर्वनदेवताः।।
।। ७५७।।
उपस्थितानपि मृगान्दयालुर्न जघान सः।
मनस्विनो न मुञ्चन्ति शस्त्रं तृणमुखेषु हि।।
।। ७५८।।
जयसिंहो महाबाहुर्बाहुजैरनुमोदितः।
सिंहनादेन सिंहेन्द्रं कुञ्जेशयमबोधयत्।।
।। ७५९।।
बुबुधे सिंहनादेन जयसिंहस्य सिंहराट्।
जृम्भाविदीर्णविक्रान्तदृश्यदंष्ट्राभयङ्करः।।
।। ७६०।।
उत्पुच्छगुच्छमुत्थाय विधूय विकटाः सटाः।
जगर्ज गर्जयन्क्कुध्रं जीवजातानि तर्जयन्।।

।। ७६१ ।।

उत्पपातोच्छलत्पुच्छस्फालदुर्दर्शदर्शनः ।
गजमौक्तिकसम्बन्धचमत्कृतनखो हरिः ।।

।। ७६२ ।।

ऊर्ध्वमापततस्तस्य भूपतिर्मृगभूपतेः ।
शिरो विद्युत्प्रकाशेन खड्गेन निरकृन्तत ।।

।। ७६३ ।।

शार्दूलशोणविनुद्भिरङ्गवस्त्रं विशांपतेः ।
रक्तराजिस्फुरद्भूर्जपर्णप्रायमिवैक्ष्यत ।।

।। ७६४ ।।

साधु साध्विति सामन्तैः स्तूयमानपराक्रमः ।
विततार कुबेरर्द्धिः पारितोषं महामनाः ।।

।। ७६५ ।।

श्रामं विश्रम्य तत्रैव संयोज्य कटकं पुनः ।
असह्य विक्रमो राजा मोरामाप जिहीर्षया ।।

।। ७६६ ।।

सम्पराये पराजित्य चाहमानान् कथञ्चन ।
मोरां कुम्भावतेभ्योऽदात्ताम्बूलीतुङ्गमण्डपाम् ।।

।। ७६७ ।।

जग्राह ग्राहकेतुश्रीरुग्राहङ्कारकर्कशः ।
बटबाटेन्द्रराष्ट्रोढाद्राष्ट्रभूतिक्षमं करम् ।।

।। ७६८ ।।

अस्मिन्नवसरे सम्राट् मम्मदोऽहम्मदोद्धतः ।
अजितेन पराभाविभुजाक्रान्ताजमेरुणा ।।

।। ७६९ ।।

कोपाटोपपरीवाहप्रवाहितधृतिद्रुमः ।
माम्मदो जेतुमजितं द्वाविंशतिमचूचुदत् ।।

।। ७७० ।।
राज्ञेऽलिखद्दलमिदमजितेन विजृम्भितम्।
तदर्थं गच्छ कच्छेन्द्र द्वाविंशतिपुरःसरः।।
।। ७७१ ।।
दलं वगत्य सम्राजः प्रस्थितो बटवाटतः।
मिमेल पथि वल्गन्त्या द्वाविंशत्या विशांपतिः।।
।। ७७२ ।।
समवेतं जयं श्रुत्वा द्वाविंशत्यामथाऽजितः।
अजमेरो मरूनारदुर्गे संस्थाप्य सैनिकान्।।
।। ७७३ ।।
द्वाविंशतिररं यान्ती जयेन सह योगतः।
हंहो उभयथाऽप्यासीदुच्चैर्जयवतां तदा।।
।। ७७४ ।।
चण्डातपेन ताम्यन्ती द्वाविंशतिरुदायुधा।
अजमेरुं पुरं प्राप न मेरुच्छायशीतलम्।।
।। ७७५ ।।
दुर्गमादातुमुद्युक्ता युयुधे तत्र सा चिरम्।
विजयं किन्तु नापेदे प्रत्युत्तापि पराजयम्।।
।। ७७६ ।।
एवं सति निरुत्साहा प्रपेदे शरणं जयम्।
पीडिता पूर्वदेवेन्द्रैः स्कन्दं देवचमूरिव।।
।। ७७७ ।।
राजेन्द्रस्तां तथा दृष्ट्वा स्मितपूर्वमभाषत।
रिक्तं ह्यः कारयिष्यामि दुर्गं वो व्येतुभीरिति।।
।। ७७८ ।।
द्वाविंशतिं समाश्वास्य कच्छवाहः प्रतापवान्।
दुर्गान्निःसरताऽद्येति राष्ट्रोढान्गूढमन्वशात्।।

।। ७७९ ।।
दुर्गान्निष्क्रम्य ते जग्मुर्मरूनस्य निदेशतः।
तत्र हेतुः पराभीतिः किं वा प्रीतिरसंशयम्।।

।। ७८० ।।
अजितेन्द्रसुतं दूतैस्तत्राहूयाऽभयाह्वयम्।
अमुष्मै स्वां दुहितरं राजेन्द्रः प्रददौ गिरा।।

।। ७८१ ।।
इति सत्कृत्य कृत्यज्ञः कथमप्यभयं पुनः।
प्रैषयद् सार्द्धमनया द्वाविंशत्योपमम्मदम्।।

।। ७८२ ।।
राष्ट्रोढमम्मदावित्थं तस्मौ प्राङ् मत्सराग्निना।।
मिथः संयोजयामास लोहकारोऽयसीव सः।।

।। ७८३ ।।
सुहृदामनुकूलोऽपि प्रतिकूलो विरोधिनाम्।
कच्छवाहः परिक्रामन्बुधवारपुरं गतः।।

।। ७८४ ।।
तत्रापतन्तमुन्मत्तं स हद्दरकलेर्द्विपम्।
स्वयं निहत्य विहितप्रस्थानः स्वां पुरीं ययौ।।

।। ७८५ ।।
मासमावासमावासे श्रियां कृत्वा स्वपत्तने।
प्रपेदेऽर्कबराबादं स मम्मदनियोगतः।।

।। ७८६ ।।
कार्यानुरोधतस्तत्र स्थित्वाऽहानि कियन्त्यपि।
स्रवति श्रावणे शत्रुप्रमाथी मथुरां गतः।।

।। ७८७ ।।
भूभुजाऽभयसिंहाय भाद्रकृष्णाष्टमीतिथौ।
हिता सौन्दर्यमहिता दुहिताऽदायि सादरम्।।

।। ७८८।।
धरिणीचक्ररोचिष्णुप्रतापतरणिस्तदा।
वराय नैककरिणीराहरणीकुरुते स्म सः।।
।। ७८९।।
अभयाय वितीर्येति तनयामभयप्रदः।
विलसत्कृतसूतोऽथ वनयात्रां चकार सः।।
।। ७९०।।
श्रीमद्भागवतं शृण्वन्परीतो व्रजवासिभिः।
तानि तालवनादीनि स्थलानि पुरु पर्यटत्।।
।। ७९१।।
न तत्स्थलं न तत्तीर्थं न तद्वनमपि व्रजे।
यस्मिन्नाप्लुत्य न ददौ द्विजातिभ्यः स दक्षिणाम्।।
।। ७९२।।
क्रमादिति परिक्रम्य राजेन्द्रो व्रजमण्डलम्।
गङ्गायां विधिवत्स्नात्वा मथुरां पुनरागतः।।
।। ७९३।।
मथुरायाः परिसरे स्वनाम्ना निर्ममे पुरम्।
वृन्दावने पुनः कुञ्जं पुष्पपुञ्जललल्लतम्।।
।। ७९४।।
पैष्टातकरजःक्षेपैः फाल्गुने फाल्गुनेन्दिरः।
चिक्रीड वृन्दावनगस्तुङ्गं वेतण्डमास्थितः।।
।। ७९५।।
पैष्टातकरजो राजद्राजिभी रञ्जितान्तरा।
रजस्वलेव रुरुचे तदा वृन्दावनस्थली।।
।। ७९६।।
पिष्टातक्षोदरागेण कच्छा विच्छुरिताननाः।
अनुरागं वपुष्मन्तं वमन्त इव रेजिरे।।

।। ७९७।।
बलेन वल्गता खेलन् गोपीभिः शश्वदीक्षितः।
उवाह कच्छवाहेन्द्रः सकलां श्रीपतेः श्रियम्।।
।। ७९८।।
उत्क्षेपैः स मृदुत्क्षेपैः काश्मीररसवर्षिभिः।
संविहृत्य यथाकामं दिल्लीं गन्तुं प्रचक्रमे।।
।। ७९९।।
पुरं परवरं प्राप्य प्रवरो मृगयाविदाम्।
शबरैर्वेदितान् सिंहाञ्जघान घनगर्जनः।।
।। ८००।।
मार्गे मृगेन्द्रगामी स मार्गे मार्गेऽन्ववर्तत।
दिल्लीनाकाधिपेनाकारितो राकाप्रियाननः।।
।। ८०१।।
अश्वोरसमधिष्ठाय क्षत्रियैः परिवारितः।
लङ्घिताध्वा हरिप्रस्थं वेगादापदवारितः।।
।। ८०२।।
डुण्ढारवासवः खानदोरादर्शितपद्धतिः।
मन्दिरं मम्मदेन्द्रस्य सम्मदी प्रविवेश सः।।
।। ८०३।।
यथारीति नमस्कृत्य रीतिज्ञो मम्मदाधिपम्।
उपढौकयति स्मोच्चैरिभवाह्यं महारथम्।।
।। ८०४।।
अदृष्टचरविच्छित्ति दृष्ट्वा साहिरथो रथम्।
तुतोष कूर्म याचस्व किं ददानीत्यवोचत।।
।। ८०५।।
कूर्मोऽप्यवसरं वीक्ष्य प्रीतोऽसि मयि चेत् प्रभो।
करं कदापि हिन्दुभ्यो मा गृहाणेत्ययाचत।।

।। ८०६।।

नव्वावेषु निषेधत्सु सत्यसन्धः स मम्मदः।
हिन्दुषु प्रतिशुश्राव कूर्मकामं तथास्त्विति।।

।। ८०७।।

नृपः प्रसेदुषस्तस्माद्धिन्दुषु म्लेच्छकल्पितम्।
करं क्षमापयामास तेनास्य ववृधे यशः।।

।। ८०८।।

अथो अम्बावतीं गन्तुं मम्मदेनाऽनुमोदितः।
प्रतस्थे विश्वतः शृण्वन् हिन्दूद्धारकथा निजाः।।

।। ८०९।।

वल्गावल्गुवलद्वाहव्यूहैः सम्बाधपद्धतिः।
सत्वरोऽपि पुरीशोभादत्तदृष्टिः शनैर्ययौ।।

।। ८१०।।

दिल्ल्या रुद्धोऽपि विततविशिखाभुजया तदा।
मानीव निर्ययौ हित्वा पुरुषाः परुषाः खलु।।

।। ८११।।

गङ्गां भङ्गाभिकलितपापभङ्गां भुवः पतिः।
म्लेच्छसंसर्गजं दोषं जिहासुः प्रागगाहत।।

।। ८१२।।

अधित्रिस्रोतसि स्नातस्तिस्रः सन्ध्याः समाचरन्।
शृण्वंस्तिस्रः श्रुतीर्विद्भ्यस्तिस्रः स वसतीः स्थितः।।

।। ८१३।।

वित्तैः सन्तर्प्य तत्रत्यान् वर्णाश्रमगुरुर्गुरून्।
ययौ बालापुरं सौधजालान्तःस्थितयौवतम्।।

।। ८१४।।

कारयित्वा कृती शान्तिं गजसम्बन्धिनीं द्विजैः।
फरीदाबादमहितदावाग्निः समपद्यत।।

।। ८१५।।
तत्र पाराशरं नाम तीर्थकुण्डं समेत्य सः।
स्नात्वा दत्वा क्रमक्रान्तपथो वृन्दावनं गतः।।
।। ८१६।।
वृन्दावनं परिक्रम्य मथुरां पुनराप सः।
कालिन्दीघाटवाटीषु व्यायामव्यग्रमाथुराम्।।
।। ८१७।।
स्नात्वा स यमुनाकूले कर्कमर्के समीयुषि।
गुर्वीं स्वर्णतुलामुर्वीं देवेभ्योऽदत्त सादरम्।।
।। ८१८।।
ततः संप्रस्थितोऽध्यध्वं गृहीतवदनोपदः।
मनोहरपुरं प्राप रणी रावजिघांसया।।
।। ८१९।।
पुनः पुनर्विराध्यन्तं निगृह्य युधि दुर्ग्रहम्।
रावं स लकुटाघातमुण्डस्फोटमघातयत्।।
।। ८२०।।
तदारभ्य जगत्यस्मिन्नजनिष्ट जनश्रुतिः।
मुण्डं मनोहरपुरं भविष्यत्यचिरादिति।।
।। ८२१।।
इत्यावर्ज्य दिशो जिष्णुर्हर्षादम्बावतीं ययौ।
पतिं चिरागतं द्रष्टुं सौधैः सोद्ग्रीविकामिव।।
।। ८२२।।
इत्ययं दिग्जयोऽजल्पि जयेन्द्रस्य यथामति।
वक्तुं न चतुरः सोऽपि वस्तुतश्चतुराननः।।
।। ८२३।।
अथ जातु सुधी राजा यशोविख्यातिहेतवे।
स्वनाम्ना नगरं नव्यं निर्मातुं विदधे धियम्।।

।। ८२४।।

तदर्हापूर्वममुना निरधारि सुलक्षणा।
क्षितिरम्बावतीसाँगानेरसम्पुटमध्यगा।।

।। ८२५।।

लोहोरिकोपलास्तत्र भ्राष्ट्रेष्विन्धनकुक्षिषु।
सुधाभित्तिविनिष्पत्यै शिल्पविद्भिर्विपेचिरे।।

।। ८२६।।

उद्यताप: फणै: पीनदोर्दण्डै: कर्मकारिभि:।
समस्थिरा प्रविदधे परं निम्नोन्नता स्थली।।

।। ८२७।।

श्रावणे सागरवसुशैलचन्द्राब्दवर्तिनि।
आसीत् स्वस्त्ययनोदग्रं पुरपीठप्रकल्पनम्।।

।। ८२८।।

कारुभि: कल्पिता: पश्यन्पुरां प्रतिकृती: कृती।
तारातम्बोलविच्छित्त्या पुरबन्धमवीवृतत्।।

।। ८२९।।

चतुष्पटिरुच: स्फारा: कुण्डमण्डितचत्वरा:।
कल्पयाञ्चक्रिरे मार्गा: सूत्रपातपुरस्सरम्।।

।। ८३०।।

प्राकारगोपुरादीनि सामग्रीसमवायत:।
आसन् पुरस्य युगपदङ्गानीव शरीरिण:।।

।। ८३१।।

मन्त्रिभी राजमल्लाद्यैर्विशेषादनुमोदित:।
समुद्घाटितकोशोऽसौ कलयामास पत्तनम्।।

।। ८३२।।

गण्डशैला न्यवेश्यन्त मध्येप्राकारमुच्चकै:।
परिश्रमक्षमै: सेतौ वानरैरिव वानरै:।।

।। ८३३।।
सप्तैव गोपुराण्युच्चैरकारिषत कारुभिः।
अन्तिकस्थहनूमन्ति पताकाभिर्लिहन्ति खम्।।

।। ८३४।।
सन्न्यबध्यन्त पद्धत्यामट्टाः श्रेणीप्रबन्धतः।
वेदिकाः पुरतो येषां राजहस्तप्रमाणतः।।

।। ८३५।।
सुवर्णचारुचित्राणि कषन्त्युच्चतया वियत्।
ग्रहाणि ग्रहिणां मेरोः शिखराणि व्यडम्बयत्।।

।। ८३६।।
यदोकलोकलोकाय चित्रगूढीकृतात्मना।
लोकानां त्रितयेनापि समधिष्ठितभित्तिकम्।।

।। ८३७।।
हट्टव्याकीर्णमाणिक्यनीलहीरकमौक्तिकैः।
सद्रत्नाकरतां स्वस्मिन् विदधानमिव स्फुटाम्।।

।। ८३८।।
प्रांशुप्राकारधवलकेतुः चीनांशुकाञ्चलैः।
कुर्वाणमिव मेघेषु बलाकावलिवल्गनम्।।

।। ८३९।।
सदोपकण्ठवलितवनमालामनोरमम्।
गोविन्दमिन्दिरोद्योतं विडम्बयदिव स्फुरत्।।

।। ८४०।।
श्रुत्वा मृदङ्गमुद्ग्रीवैर्धूपधोरणिदर्शिभिः।
केकिभिर्निष्कुटगतैः समनुष्ठितताण्डवम्।।

।। ८४१।।
मरन्दलुब्धमधुपश्यामीकृततरूत्तराः।
दधत्प्राकारमभितः पुष्पवाटीपरम्पराः।।

।। ८४२।।

व्याकोशशाखिशालित्वात् तेजयद्भिरनन्यजम्।
सनाथं पान्थहृदयशल्यकैरुपशल्यकैः।।

।। ८४३।।

लक्षसंख्योदवसितैर्नृभृतैर्निभृतोदरम्।
नातिसंक्षेपविस्तारं द्विगव्यूतिपरिक्रमम्।।

।। ८४४।।

जज्ञे चतुष्पथचणं यादृशं जयपत्तनम्।
तादृशं भूमिवलये न जातं न जनिष्यति।।

।। ८४५।।

यत्रोज्ज्वलानि हर्म्याणि समुत्तंसितभान्यमुः।
सारनूनामुस्तरत्नानां रत्नसानोश्चमत्कृतिम्।।

।। ८४६।।

त्रैलोक्यं प्रतिसद्मासीदधो भोगिविभूति यत्।
मध्यप्रमोदिमनुजमूर्ध्वं विबुधवैभवम्।।

।। ८४७।।

अभ्राभासेषु सौधेषु भ्रमन्त्यो यत्र सुभ्रुवः।
अलङ्कारचमत्कारैश्चापलं चापलं दधुः।।

।। ८४८।।

रामाधरामृतास्वादा नागरा यत्र निर्वृताः।
साकं स्वबन्धुभिः प्रीताः नाकं न बहु मेनिरे।।

।। ८४९।।

पुरः समुच्छलद्वत्सा घटोघ्न्यो यत्र धेनवः।
गृहे गृहे स्म भासन्ते प्रातर्भद्रविलोकनाः।।

।। ८५०।।

यस्मिन्नालेख्यरूपापि रूपाजीवा विदेशिभिः।
सकटाक्षं ददृशिरे तथ्यरूपा विटैः क्षणम्।।

।। ८५१।।

विशेषवस्तु गेहेषु श्रीः पतित्वधिया ध्रुवम्।
विभज्य बहुधात्मानं यत्रोवास निरन्तरम्।।

।। ८५२।।

वलक्षच्छवयो यत्र गवाक्षाश्चन्द्रमरः स्पृशः।
गौरीप्रसङ्गिनो भेजुः शिवसम्पत्तिरुच्चकैः।।

।। ८५३।।

शुका यत्र प्रतिग्रहं पञ्जरस्थाश्चकाशिरे।
शिक्षावशाद्यशांस्युच्चैः पठन्तोऽमुष्य भूपतेः।।

।। ८५४।।

राजा राजसु सारोपमिति गानं व्यधुर्हि याः।
नामरूढमपि स्वं ता यौगिकं सारिका दधुः।।

।। ८५५।।

प्रतिस्थानं समध्यूषुर्यत्त तास्ताः समृद्धयः।
सौराज्ये सुखमन्विच्छन् वस्तुमुत्सहते न कः।।

।। ८५६।।

गोपीनाथः सहचरीसनाथो मुरलीधरः।
इन्दामास वसन् यत्र राजभक्तिवशीकृतः।।

।। ८५७।।

यत्र विश्वेश्वरो विश्वप्रकाशी पार्वतीसखः।
व्यासाद्यैर्व्यासविधिना चर्चितोऽचन्ददुच्चकैः।।

।। ८५८।।

अन्येऽपि बहवो देवा मन्दिरेषु दिदीपिरे।
प्रत्येकं वर्णने तेषां सामर्थ्यं कस्य विद्यते।।

।। ८५९।।

आगतवद्भिः पूरितमागच्छद्भिः प्रपूर्यमाणमभितः।
नगरं महाजनौघैरेष्यद्भिः पूरयिष्यमाणमजनि।।

।। ८६०।।

तोपौघघोरसालं कमठेन महोरसालमाकलितम्।
परिसरसरसरसालं जयनगरमहो रसालयैर्ललितम्।।

।। ८६१।।

कल्की कलिं निराकुर्वन् म्लेच्छसंवर्तदीक्षितः।
प्रजाकल्कापहो राजद्वारसम्मुखमन्दिरः।।

।। ८६२।।

सीतारामो गुणारामो रणेषु विजयावहः।
उवास राजवसतिद्वारवर्तिनि मन्दिरे।।

।। ८६३।।

अथोपचन्द्रभवनमुच्चकै राजमन्दिरम्।
अचिराच्चययाञ्चक्रे चतुरैश्चन्दिरेन्दिरम्।।

।। ८६४।।

रेजे राजगृहव्यूहो भित्ति न्युप्तमणिः क्वचित्।
क्वचिन्मुद्रितसौवर्णपर्णचित्रविचित्रतः।।

।। ८६५।।

अन्तरीक्षकषोच्छ्रायं राज्ञो मुकुटमन्दिरम्।
धयति स्म सुधामिन्दोः पताकारसानाञ्चलैः।।

।। ८६६।।

वाता वातायनान्युच्चैः प्रविश्य शनकैः पुनः।
ततो हृत्वेव सौगन्ध्यं जज्ञिरे गन्धवाहिनः।।

।। ८६७।।

वध्वः सौधाग्रगा यत्र मुदा मुदिरपोतकान्।
सम्भूय जग्रहुर्गाढं विद्युद्दूनाः पुनर्जहुः।।

।। ८६८।।

वर्षासु यत्र मुदिरा राजसौधाग्रलम्बितः।
शम्बाकोणयुजो मञ्जुगर्जादुन्दुभितां ययुः।।

।। ८६९ ।।

गोविन्दो भगवानिन्दुभवनाभिमुखो बभौ।
स्वभक्तमृत्युजनुषां कुण्डले कुण्डले दधत्।।

।। ८७० ।।

लतामतल्लिकाव्यूहविहारिविहगध्वनि।
वनं जयनिवासाख्यं घनच्छायमजृम्भत।।

।। ८७१ ।।

रसालाली रसैर्यत्र सृजन्ती सरसां रसाम्।
ससर्ज स स्मररसां रसिकानां मनोरसाम्।।

।। ८७२ ।।

वकुलाः सुमसौरभ्यप्रीणितालिकुला बभुः।
अभ्यर्चि कुसुमैर्येषां विष्णुर्विष्णुतनूभुवा।।

।। ८७३ ।।

अशोकं कलयामासुरशोकाः स्त्रीमदोकसाम्।
भवन्ति सत्सहायानामनुकूलाः खला अपि।।

।। ८७४ ।।

पर्णपूर्णतरच्छाया यत्र लोहितपुष्पकाः।
फलोदयाशया कीरैः श्रितलोहितपुष्पकाः।।

।। ८७५ ।।

निदाघशान्तितन्त्राणि तोपयन्त्राणि पङ्क्तिशः।
धाराः समुज्जहुर्वारामुदारा यत्र सर्वतः।।

।। ८७६ ।।

बुभुजै मधुपैर्यत्र जातीकुसुमवत्यपि।
अगम्यास्वपि गच्छन्ति मदमुद्रितबुद्धयः।।

।। ८७७ ।।

जनतालोचनैः पेयाश्चाम्पेया वारितालयः।
क्ष्माचक्रं चक्रुरामोदि सूनैरुच्छूनपिञ्जरैः।।

॥ ८७८॥
क्रमाद्यत्रोषुः ऋतवः समृद्धाः स्वस्वलक्ष्मभिः।
नृपं निषेवितुमिव क्लृप्तपुष्पफलर्द्धिभिः॥

॥ ८७९॥
मध्ये पालिस्फुटद्वृक्षप्रच्छायशिशिरोदकः।
तटाकस्त्विङ्गदुत्तुङ्गभङ्गधौताब्दमन्दिरः॥

॥ ८८०॥
टङ्कशाला विशालाट्टा प्रांशुप्राकारगोपुरा।
सुवर्णं यत्र मूषासु मुद्रणाय विशोध्यते॥

॥ ८८१॥
उदम्बरचतुःषष्ट्यां प्रस्थं हेमाष्टकेन च।
प्रकल्प्य मानकल्पज्ञो वर्तयामास सर्वतः॥

॥ ८८२॥
दीनारं दशभिः सार्द्धैर्द्रम्भं रुद्रैर्द्रुमाङ्कितम्।
माषैर्व्यधत्त ढल्लूकं सोऽष्टादशभिरुन्मितम्॥

॥ ८८३॥
द्विजातिभिः समाकीर्णदेवमण्डपमण्डिता।
प्रथमा वसतिः साऽद्य पुराणवसतिः स्थिता॥

॥ ८८४॥
यत्रालिन्देषु सम्भूय कलक्वणितकङ्कणः।
पाषाणशकलोत्क्षेपं चिक्रीडुः पौरकन्यकाः॥

॥ ८८५॥
पुरी ब्रह्मपुरी नाम बभौ यत्पार्श्ववर्तिनी।
भर्तारमनु भार्येव भूरिविभ्रमशालिनी॥

॥ ८८६॥
संहितापाठमुखरा धूम्रला यागधूमतः।
रेजुरध्युषिता यस्यां पर्णशाला द्विजातिभिः॥

॥ ८८७॥
अर्चार्थं यत्र देवानां रोपिताः पुष्पवाटिकाः।
बभुर्मरन्दकपिशाः कपिशातितपल्लवाः॥
॥ ८८८॥
देवो देवगुणैः कृष्टः कल्मषापहदर्शनः।
अध्यास्त गोकुलेशो यां गोकुलक्लेशघस्मरः॥
॥ ८८९॥
दध्वान गोकुलेशस्य दर्शनं परिसूचयन्।
कर्णाध्वना प्रविश्यान्तर्मुष्णन् कम्बुर्नृणामघम्॥
॥ ८९०॥
गवाक्षा यत्र जालान्तर्न्युप्तकाचविलोचनाः।
चित्रलेखरुचो रेजुः सहस्राक्षसमृद्धयः॥
॥ ८९१॥
अकल्पि मध्यगः पन्था शिलाभिः खचिताकृतिः।
यत्र हट्टालयो रेजुः श्रेष्ठाः श्रेष्ठिभिराश्रिताः॥
॥ ८९२॥
रत्नराशिः क्वचिद्घट्टे मुक्तराशिः पुनः क्वचित्।
स्वर्णराशिः क्वचिदपि रौप्यराशिः क्वचिद् बभौ॥
॥ ८९३॥
यत्र हट्टेष्वधिस्थालि पयोविकृतयो बभुः।
सस्पृहं ग्राहकैर्दृष्टास्त्यानीभूतसुधोपमाः॥
॥ ८९४॥
ध्वजचैलाञ्चलव्याजगरुतो व्योमचुम्बिनः।
यत्र द्रविणिनां सौधा डयमाना इवाबभुः॥
॥ ८९५॥
सभां सभां दधच्चक्रे विप्राणां वेदतत्पराम्।
किं च सद्यः सपत्नानां विप्राणां क्ष्वेडतत्पराम्॥

।। ८९६।।
सुरङ्गया बलयितो नैकवारीप्रकल्पनः।
बभौ मत्तेभखेलार्हो महाचत्वरमण्डलः।।
।। ८९७।।
कर्णयोर्दस्युता तस्थौ भवेषु व्यभिचारिता।
मन्दता स्त्रीगतावेव यत्र पौरेषु न क्वचित्।।
।। ८९८।।
बद्धास्तेन मदोद्गारा रेजिरे यत्र कुञ्जराः।
वैरिवासप्रदानोत्थादागसो भूधरा इव।।
।। ८९९।।
आसन् मुक्तकपाटानि यत्र सद्मानि निश्यपि।
केवलं चोरयामासुर्यूनां युवतयो मनः।।
।। ९००।।
कलिप्रचारमुद्वीक्ष्य पृथिवीपाकशासनः।
कृती कृतयुगं यत्र वासयामास कल्किना।।
।। ९०१।।
हन्त चारुचमत्कारं सदने सदने दधुः।
यत्र हीरमणीनां च रमणीनां च सञ्चयाः।।
।। ९०२।।
श्रुत्वा यत्र त्रियामान्ते शिशूनां मुखतः श्रुतीः।
प्रबुद्धाः पञ्जरगताः प्रपेठुः शुकसारिकाः।।
।। ९०३।।
घृष्टसोपानपङ्क्तीनि प्रणामैर्देवदर्शिनाम्।
उच्चैः शिखरबन्धीनि मन्दिराणि चकासिरे।।
।। ९०४।।
कज्जलक्ष्वेडदुर्दिग्धैर्नागरीणां कटाक्षितैः।
स्मरस्येव शरैर्विद्धा युवानो यत्र बभ्रमुः।।

।। ९०५।।
वितत्य वृत्तये यत्र पङ्क्तिशः परमण्डलान्।
निषेदुः परितः कुण्डौ रूप्यकाणां परीक्षकाः।।
।। ९०६।।
भङ्गामरिचबादामत्रुटिप्रभृतिभेषजम्।
उपहट्टं वणिग्वर्यैर्विक्रयार्थं न्यधीयत।।
।। ९०७।।
व्यापारिभिर्विकीर्णानि यत्र प्रति चतुष्पथम्।
गिलद्भिर्यावनालानि कपोतै रुद्धपद्धति।।
।। ९०८।।
सुगन्धिपुष्पतैलानि विरेजुः क्वचिदापणे।
सौगन्ध्येन यदुत्थेन राजमार्गः सुवासितः।।
।। ९०९।।
चकाशे कीर्णकिञ्जल्ककणपिञ्जरितापणः।
रञ्जकैरसकृत्पात्रे घृसृणं मसृणीकृतम्।।
।। ९१०।।
क्वापि कस्तूरिकाराशिरासीत् कादम्बिनीद्युतिः।
राज्ञो मुखेन्दुना बद्ध्वा ध्वान्तव्यूह इवाहितः।।
।। ९११।।
मञ्जुसिञ्जत्तुलाकोटि कटाक्षाहतनागरम्।
विचित्रगीति गच्छन्त्यो रेजुर्यत्र स्त्रियः पथि।।
।। ९१२।।
धर्मार्थाः किं च भोगार्था यत्र यूनां द्विधा स्त्रियः।
प्रकामं कामशक्तिश्चेत् बह्वयः पत्न्य इति स्थितिः।।
।। ९१३।।
द्वारवक्त्राणि चत्वारि दधत् सृष्टनवप्रजम्।
बभौ हिरण्यगर्भं यत् सत्यलोककृतस्थिति।।

।। ९१४।।

जालनेत्राग्रसम्बद्धकाचव्याजोपदृष्टयः।
गवाक्षा वीक्षितुं विश्वं बभुः सोद्ग्रीविका इव।।

।। ९१५।।

कुसुमानि करण्डेषु प्रकल्प्य वनपालिकाः।
सायं कुण्डोपकण्ठस्था जुगुम्फुः पुष्पमालिकाः।।

।। ९१६।।

प्रैषि स्वपौरवत्पौरतारतम्यबुभुत्सुना।
मेरुर्जम्भजिता सोऽयं वप्रव्याजेन संस्थितः।।

।। ९१७।।

सुदर्शननृसिंहाम्बहथरोहिकमौक्तिकैः।
यदधृष्यं द्विषामासीद्दुर्गैरुत्सेधदुर्गमैः।।

।। ९१८।।

प्रजाचक्रप्रमोदार्थं गजाश्वरथचङ्क्रमाः।
प्रतिमासं नृपतिना नियम्यन्ते स्म मेलकाः।।

।। ९१९।।

चैत्रशुक्लतृतीयायां समलङ्कृतनागरः।
वणिग्भिरापणन्यस्तधृतपूरकरण्डकः।।

।। ९२०।।

क्रीतक्रीडनकप्रीतबालकोत्तालतालकः।
अट्टसङ्घट्टवनितादर्शनोन्मुखकामुकः।।

।। ९२१।।

रङ्गपत्रीद्रवारक्तपाणिपादसमृद्धिभिः।
स्त्रीभिरारब्धविविधगीतिभिर्मुखरीकृतः।।

।। ९२२।।

स्वर्णसूत्रमयैर्यूनां शिरस्त्रचटुलाञ्चलैः।
विद्युद्दामवदुद्योतैः क्वापि क्वापि कृतच्छविः।।

।। १२३।।
गजाश्वरथसम्बाधतत्तादृग्राजपद्धतिः।
त्रिपोलिमौक्तिकच्छत्र्योरन्तरे पथि सम्भृतः।।
।। १२४।।
गणगौरीमहामञ्चनिर्गमावधिकल्पनः।
अमूल्यो मेलको नाम गणगौरीमहोत्सवः।।
।। १२५।।
रराज पत्तनात् प्राच्यामरण्यानी विषङ्कटाः।
शैलशृङ्गोपरि श्रीमान् गालवस्य महाश्रमः।।
।। १२६।।
यत्रोपलनखो योगी स्थापिताग्निः पयोऽशनः।
दमयामास चतुरनाथं पाखण्डिनं पुरा।।
।। १२७।।
रघुनाथस्त्रिभिर्यस्मिन्ननुजैः सीतयाऽपि च।
कुर्वन्कूर्मेन्द्रकल्याणं मन्दिरान्तप्रतिष्ठितः।।
।। १२८।।
यत्र गोमुखतः कुण्डाद्गाढबद्धाधराम्बराः।
चुकूर्दुश्चाधिकमलकुण्डमास्फालितो रवः।।
।। १२९।।
तस्माद्दक्षिणतः कश्चिदुद्देशो घाटशब्दितः।
हनूमान्यत्र रक्षायै नृपस्य वसति स्वयम्।।
।। १३०।।
यं मनोरथमुद्दिश्य यात्रां यत्र करोति यः।
हनूमतः प्रसादेन तस्य कामः स सिध्यति।।
।। १३१।।
निगूहिततमिस्राणि रुद्धार्कैः शाखितल्लजैः।
यस्मिन् युवभिरुद्यानैरुद्यानानि शिषेविरे।।

।। १३२।।
व्याकोशकेतकोद्धूतधूलीधवलितस्थलम्।
रराज निर्झरोद्गारि जलायननिकेतनम्।।

।। १३३।।
नैकवापीसमावायं कुण्डान्तस्तरदर्भकम्।
प्रसवप्लाविताभोगो घाटो घाटालपद्धतिः।।

।। १३४।।
भूमिमुद्भिद्य पयसामुत्थया यत्र धारया।
जाताभिषेकमनिशं को न चण्डीशमञ्चति।।

।। १३५।।
यत्र प्रान्तेषु वेदोक्तमहाव्रतफलाप्तये।
अट्टाः प्रत्यग्रसम्भाराः कल्पयांचक्रिरे ध्रुवम्।।

।। १३६।।
अधिराजपथं यत्र वृक्षलम्बिशरावगम्।
विभिः कीरप्रभृतिभिर्विश्रब्धं पीयते पयः।।

।। १३७।।
यस्मिन्नाबालमन्नानि भूयते भुञ्जते द्विजाः।
तथाऽऽबालभृतं पाथः पिबन्ति सुखमास्थिताः।।

।। १३८।।
यस्मिन् भान्ति भटाः केऽपि भीमाः केऽपि युधिष्ठिराः।
यशोभिरर्जुनाः केचिदुच्चकैरश्विनः परे।।

।। १३९।।
घाटोपकाननमुपेत्य मुदा वयस्यै-
भर्ङ्गाविबुद्धमदकोकनदायिताक्षाः।
ये जातु नैव परिपुप्लुविरेऽधिकुण्डं,
जातं वृथा जगिति तैर्झषमारणाय।।

।। १४० ।।
सायमध्यद्धमास्तीर्णास्तरणा वणिजः पुरः।
प्रसार्य वस्तुजातानि तस्थुर्विक्रयहेतवे।।
।। १४१ ।।
चतुर्भिः सम्प्रदायैर्यद्व्याप्तं रामानुजादिभिः।
येषां शाखाप्रशाखाभिरिदमापावितं जगत्।।
।। १४२ ।।
प्रत्यारामं बुभुजिरे रम्भापत्रेषु नागरैः।
मोदका विजयावेशशोणसंक्षिप्तलोचनैः।।
।। १४३ ।।
गोधूमचूर्णविहितमोदकानां विलासिनाम्।
यत्राधुनापि भवति प्रतिभौमं भुजिक्रिया।।
।। १४४ ।।
उपलास्फालवाचालभरपूरप्रवाहिना।
कुल्याकुलेन युयुषे यस्मिन्नुपवनावली।।
।। १४५ ।।
यत्र प्रतिपथं कूपाः प्रतिकूपं शिवालयाः।
पूजाभिषेकसम्भारा बभुः प्रतिशिवालयम्।।
।। १४६ ।।
छत्रमाराममालाभि घटिमास्थाय नागराः।
आतपं भीष्ममार्तण्डे ग्रीष्मेऽपि न तथा विदुः।।
।। १४७ ।।
राजानं राजमल्लोऽपि सन्तोष्य वरिवस्यया।
स्वनाम्नाऽखानि ताटाकस्तटव्याकोषवाटिकः।।
।। १४८ ।।
आक्रीडे नैकनीडैधितवयसि सुमश्रीसमारब्धशक्रा-
क्रीडव्रीडे प्रकुर्वन्नहह रतिसखः क्रीडितानीडितार्द्धिः।

पुष्पापीडं दधानो भुवनजयसमुद्दण्डकोदण्डकाण्डो
राजाऽजस्रं विरेजे मधुमुदितमना विष्णुजो मत्स्यलक्ष्मा।।

।। ९४९।।

एतस्मिन्नन्तरेऽगान्मनुमहितमहादेवभट्टस्य पुत्रः
श्रीमान् रत्नाकरार्यो वितरितुमवनीजानये सिद्धमन्त्रम्।
देवोऽप्यस्माद्गृहीत्वा विधिवदथ मनुं राशिरासीन्महिम्नां
दुःसाध्यं विद्यते किं त्रिभुवनविषये सिद्धमन्त्रप्रभावात्।।

।। ९५०।।

तदा तस्मै श्रीमान् कमठमघवा मन्त्रगुरवे
शतं सद्ग्रामाणां कनकमयमुद्रा अयुतशः।
बरूथभ्राजिष्णुं रथमथ सुवर्णाम्बरततं
नृयानं सन्मानप्रमदमनसेऽदात् सविनयम्।।

।। ९५१।।

मन्त्रप्राप्त्या प्रवृद्धैः प्रलयतपनतोऽप्युग्रतापैः प्रतापै-
र्हन्त ब्रह्माण्डभाण्डे परितपतिभृशतमां काश्यपी कामुकस्य।
अप्युच्चैर्वीर्यगुर्वी दवथुपरिचयाद् दीर्यमाणाशया द्राग्
भ्राष्ट्रे भृष्ट्रेव धाना प्रतिभटपरिषल्लाघवं संबभार।।

।। ९५२।।

दिक्षु प्रौढप्रतापे प्रसरति परितः किं च राजन्यलोके
प्रत्यग्रोपायनानि प्रचुरमुपनयत्यन्वहं वर्द्धितर्द्धिः।
राजाऽप्याजानुबाहुर्मनुनिगमविदा पौण्डरीकोपनाम्ना
प्रोक्तो रत्नाकरेण व्यधित सुकृतवानश्वमेधाय बुद्धिम्।।

।। ९५३।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्रकच्छवंशे दशमः सर्गः समाप्तिमापेदे।।**

***

## एकादशः सर्गः

।। १।।

अथाजग्मुर्जयेन्द्रेण वाजिपेयं चिकीर्षता।
समाहूता दिगन्तेभ्यो ब्राह्मणा वेदपारगाः।।

।। २।।

ब्राह्मणेषु समेतेषु समे तेषु शुचौ स्थले।
यज्ञोपयोगिसम्भाराः कल्पयाञ्चक्रिरे भृशम्।।

।। ३।।

विष्णोर्वरदराजस्य करदीकृतपार्थिवः।
मूर्तिमानाययामास मीणकैर्दक्षिणापथात्।।

।। ४।।

द्विजेषु दाक्षिणात्यानामासीद्यज्ञे प्रधानता।
रत्नाकरस्य तत्रापि पौण्डरीकावटङ्किनः।।

।। ५।।

प्रापुः शेषोपनामानो व्रज्रटङ्कादयो द्विजाः।।
केचिद्भीमपुरोपाख्याःकेचिद् द्रोणोपनामकाः।

।। ६।।

चयनीत्युपनामाऽपि श्रोत्रियः कमलाकरः।
दूरादभ्याययौ साक्षाद्वेदो विग्रहवानिव।।

।। ७।।

श्रीमान्गोकुलनाथार्यो गोस्वामी वल्लभानुगः।
आययौ गोकुलग्रामाद्गोकुलेशपदाश्रयः।।

।। ८।।

एवमन्येऽपि विद्वांसः पञ्चद्रविडचुञ्चवः।
समन्ततः समागत्य सपर्यां लेभिरे नृपात्।।

।। ९।।

ददद्दीनारजातानि दीनेभ्यः स दिने दिने।
प्रतिष्ठां परमामाप देवो दीनदयालुषु।

।। १०।।

अथोऽपि यक्षमाणेन राज्ञा कूर्ममरुत्वता।
वेष्टितः श्रेष्ठधानुष्कैः श्रीमानुत्ससृजे ययुः।

।। ११।।

वर्षे चन्द्राङ्कशैलेन्द्रो श्रावणे धवले दले।
बभूव हयमेधस्य प्रारम्भो नवमीतिथौ।।

।। १२।।

अध्वर्युमोडजातीयो यज्ञे यज्ञकरोऽभवत्।
ब्रह्मा तु तत्र चयनी हरिकृष्ण इति श्रुतः।।

।। १३।।

होताहोतारविस्फूर्त्तिदीक्षितो रामचन्द्रजित्।
उद्गाता गीतगीः सम्राड् जगन्नाथो जगन्नुतः।।

।। १४।।

प्रस्तोता व्रजनाथार्यो दीक्षितः शिक्षितः श्रुतौ।
मैत्रावरुण इत्यासीत्काले केशवदीक्षितः।।

।। १५।।

वाजपेयीति विख्यातो यारोपन्तोद्विजोत्तमः।
बभूव ब्राह्मणाच्छंसी ब्राह्मणावधिवेदवित्।।

।। १६।।

पोता पवित्रचरितः पौण्डरीकः सुधाकरः।
नेष्टा पुनरभूत्तत्र मार्कण्डेयो द्विजाग्रणीः।।

।। १७।।

अच्छावाकोऽच्छधिषणः श्रीकण्ठः कानडाह्वयः।
प्रतिप्रस्थात्त्रिपदभाग्द्रविडो रामचन्द्रकः।।

।। १८।।
त्रिवाडी प्रतिहर्त्ताभून्नाम्ना योऽनन्तदेवकः।
मार्कण्डेयसुतः कोऽपिसुब्रह्मण्यपदे स्थितः।।
।। १९।।
आग्नीध्रः किञ्च सप्तर्षिहरिदत्ताभिधो द्विजः।
प्रह्लादोऽभवदुन्नेता पुरोहितकुलोद्भवः।।
।। २०।।
जामाता पौण्डरीकस्य पुण्डरीकाक्षभावनः।
ग्रावस्तोता द्विजश्रेष्ठो नीलकण्ठो व्यवस्थितः।।
।। २१।।
प्रांशूदवसिता जालनिर्यद्धूमौघधोरणिः।
यज्ञशाला विशालासीत्कारुकल्पितवेदिका।।
।। २२।।
कलावपि बलादेव देवेन सुकृते कृते।
मखः सुखेन ववृते राजा बीजमनेहसः।।
।। २३।।
स यज्वा हयमेधेन मेधावी शास्त्ररीतितः।
यजते स्म यजुर्वेदी सुखेन मखपूरुषम्।।
।। २४।।
वेदविद्भिर्वलयितः स दीक्षाप्रयतः प्रभुः।
आसीद्दुरासदस्तत्र त्र्यक्षैकांशप्रवेशतः।।
।। २५।।
मखोत्थधूमशबलं सुशुभे गगनाङ्गणम्।
अनेहसं विनाऽप्यब्दघटाच्छन्नमिवोच्चकैः।।
।। २६।।
व्यालोलहेतिरसनो द्विजपाणिहुतं हविः।
चिराय क्षुधितो वेगात् गृह्णातिस्म हुताशनः।।

।। २७।।

गीयमानमनुप्रीतद्विजं मोदकदुर्दिनम्।
दीयमानधनं राज्ञो यज्ञवाटस्थलं बभौ।।

।। २८।।

यदध्वरे हवींष्यत्तुं क्ष्मां सर्पत्सु सुपर्वसु।
आसीत्स्व: पाकशालाऽलं लूताली तन्तुदन्तुला।।

।। २९।।

जयेन्द्रेऽजस्रसत्रान्तर्हुताज्यावर्जिताजिरे।
तल्पानि नाकनारीणामभजन्नर्द्धशून्यताम्।।

।। ३०।।

अथो पशुं समिद्धाग्नौ चिक्षिपु: क्षिप्रमृत्विज:।
तेनैष सहसा वृद्धोऽलिक्षत्खं हेतिजिह्वया।।

।। ३१।।

त्रीणि लक्षाणि गृष्टीनामिष्ट्यन्तरयुतानि षट्।
कनकाङ्कितशृङ्गीणां पस्पर्श प्रयतो नृप:।।

।। ३२।।

भाद्रे भद्रयशा: शुक्लद्वादश्यां द्वादशात्मभू:।
सस्नौ तीर्थाम्बुसंपृक्तैर्मानसागरसंवरै:।।

।। ३३।।

विहितावभृथ: श्रीमान्विश्वकल्याणवर्द्धन:।
ग्रामन्पारे सहस्रं स द्विजातिभ्यो मुदा ददौ।।

।। ३४।।

चतु:शतानि दासीनां राशीनां रूपसम्पदाम्।
स विष्टरसमासीनो द्विजेभ्यो व्यतरत्तराम्।।

।। ३५।।

सत्तायुतोत्तरं लक्षत्रयं रूप्यमयं वसु।
ऋत्विग्भ्यो जयसिंहेन दक्षिणाऽदायि कृत्स्नश:।।

।। ३६।।
आरम्भादन्तपर्यन्तं हयमेधीयकर्मणः।
प्रायः समग्रसामग्रीलक्षरूप्योन्मिता मता।।
।। ३७।।
ऋत्विजो दक्षिणाराशीन्निधाय शकटेष्वलम्।
प्रशंसन्तो महाराजं निकायानयुरुत्सुकाः।।
।। ३८।।
बभूव जयसिंहस्य यादृग्यज्ञमहोद्भवः।
पुरा युधिष्ठिरादीनामपि तादृङ् न स श्रुतः।।
।। ३९।।
इत्थं तुरङ्गमेधेन राजा कूर्मकुलेश्वरः।
विष्वग्विख्यातिमापेदे दिक्षु भिक्षुगणैः स्तुतः।।
।। ४०।।
गुणौघराजितो राजा संस्कारेण समुज्ज्वलः।
विकृतिं शमयामास प्रकृतेरिव पारदः।।
।। ४१।।
अथो मयस्मयहरशिल्पचित्रे पुरे वसन्।
प्रशशास प्रजा यद्वदिन्द्रप्रस्थे युधिष्ठिरः।।
।। ४२।।
नदीषु सिन्धुषु नृषु गहनेषु गुहास्वपि।
प्रतापो यस्य सततं तपति स्म यथा रविः।।
।। ४३।।
अनुरक्तीकृताः सन्तो द्विषां श्यामीकृतास्त्विषः।
सितीकृता हरिद्भागा यदीययशसां गणैः।।
।। ४४।।
एकत्रिंशद्बभुर्भार्या भूपतेः शीलशीतलाः।
तासां या चावड़ी कापि त्रीण्यपत्यान्यसूत सा।।

।। ४५।।

अभूतां कृष्णकवरविचित्रकवरे सुते।
हड्डाय प्रथमाऽदायि राष्ट्रोढाय द्वितीयका।

।। ४६।।

सुतस्तु शिवसिंहोऽभून्महाबलपराक्रम:।
दापयित्वा विषं हन्त पित्रा जयपुरे हत:।।

।। ४७।।

सुखादिकंवरा सेयं राज्ञी खीचीन्द्रधीरजा।
कुमारमीश्वरीसिंहं सुषुवे श्रीरिव स्मरम्।।

।। ४८।।

वत्सरे वसुशैलाद्रिचन्द्रे चन्द्राननश्रिय:।
जनी राजकुमारस्य कुमारोपमसम्पद:।।

।। ४९।।

भू: सस्यसम्पदमपद्यत काञ्चनाङ्गे
जाते नृपस्य तनये ननु काञ्चनाङ्गे।
आबालवृद्धमजनि प्रमद: प्रजाना-
माबालवृद्धमलमम्बु पपुर्विहङ्गा:।।

।। ५०।।

तत्तच्चतु:षष्टिकलाकलापवित्
तथा समुच्छृङ्खलभूमिभृत्पवि:।
सौधे चतुष्के करिणां महारय-
श्च्छत्रच्छविं चीनिकया चकार य:।।

।। ५१।।

जजाप मन्त्रान्निगमान्पपाठ
तास्ता: कला य: सकलाश्विकाय।
दधार शस्त्राणि विवेद नीती
र्जिगाय षड्वर्गमपि प्रसह्य।।

।। ५२।।

राणावती सूनुमसूत नाम
श्रीमाधवं क्ष्माधववंशभूत्यै।
यमीश्वरीसिंहभिया कथञ्चि-
न्निनाय मातामहसद्म माता।।

।। ५३।।

अगाधबोधो घनमुग्धमञ्जिमा
करस्फुरच्चक्रगदाब्जपेशलः।
यो वै नतेऽयं परिपोषयंश्चिरा-
दुवास मातामहसद्मनि स्वयम्।।

।। ५४।।

ददौ विवेकी पदमृद्धमीश्वरी-
सिंहाय हंहो युवराजशब्दितम्।
क्ष्माधवो माधवसिंहवर्मणे
स्वशर्मणे रामपुराभिधं पुरम्।।

।। ५५।।

अथेश्वरीसिंहमुदञ्चदोजसं
सहायमासाद्य जयेन्द्रभूमिपः।
प्रतापमाविष्कुरुते स्म दुःसहं
घनव्यपायो महसामिवेश्वरम्।।

।। ५६।।

गयां यियासुर्निजसार्थगुप्तये
स पौण्डरीकः क्षितिपं व्यजिज्ञपत्।
न्ययुङ्क्त कञ्चित् क्षितिपोऽपि ठाकुरं
कियद्भिरर्वद्भिरनुद्रुतं द्रुतम्।।

।। ५७।।

सार्थः स रत्नाकरशर्मणोऽध्वसु
विश्रम्य विश्रम्य गयां रयादयात्।

यो यात्रिणां रत्नविभूषणैस्तदा
दधार रत्नाकरतां पदे पदे।।
।। ५८।।

सार्थेन गच्छन्पथि पौण्डरीक:
समाशदद् द्वादशदुर्गसीमाम्।
तत्रत्यपाटच्चरराडुपेत्य
प्रसह्य सार्थं सहसा रुरोध।।
।। ५९।।

सन्धाय चापेऽथ शरं स ठाकुर-
स्तं तस्करेन्द्रं विदधे शरव्यम्।
शरप्रहारव्यथितस्तुरङ्गमात्
पपात पापी विलुठन्ममार।।
।। ६०।।

शेषा विशेषाद्भयशुष्यदानना:
सार्थेन यष्ट्यादिभिरीषदर्दिता:।
निलिल्यिरे दुर्गतटीषु सत्वरम्
तिष्ठन्ति सार्थेऽवहिते न दस्यव:।।
।। ६१।।

तृणेऽपि धूते स्मृतचोरचङ्क्रम:
प्रतिक्षणं ठाकुरदत्तसान्त्वन:।
सार्थ: ससार्थश्लथनीविनिष्पतद्-
रम्यग्रहव्यग्रमुपासदद्गयाम्।।
।। ६२।।

हते प्रधानेऽथ विमृश्य दस्यवो
विलुण्ठितुं सार्थमनु प्रतस्थिरे।
तथा तदुत्थानमवेत्य ठाकुरो
लेखं लिखित्वा विससर्ज भूभुजे।।

।। ६३।।

स्वस्तिश्रीकमठबिडौजसि प्रणामा
मार्तण्डत्विषि विलसन्तु ठाकुरस्य।
आस्ते शं समधिकमत्र, तत्र चास्ताम्
तिष्ठामः सुखमधुना वयं गयायाम्।।

।। ६४।।

यस्याहो पथि पथिकौघलुण्ठनाय
धावन्ति क्षितिवलये सहस्रशोऽश्वाः।
साहाय्यं वितर न चेत्स दस्युवर्गो
गर्वोग्रो द्रुतमिव नः पुरा निहन्ति।।

।। ६५।।

श्रुत्वा श्रीकमठसमाजचक्रवर्ती
वृत्तान्तं दलगतमित्थमिद्धकोपः।
सामन्तैरुपलकलास्त्रबन्धुरांसै-
रन्वीतः क्षपयितुमुच्चचाल चौरान्।।

।। ६६।।

पन्थानं तरलतुरङ्गमैर्निकृन्तन्
लुण्टाकान् प्रतिभटकीर्तिलुण्ठकोऽलम्।
संपेदे सपदि गृहीतसार्थमार्गान्
मार्गान्तर्मृगपतिविक्रमः क्रमेण।।

।। ६७।।

संवृत्तः क्षतगलितासृगुक्षिताध्वा
संग्रामः कमठपतेः पटच्चरौघैः।
यत्राऽसिप्रहृतिनिकृत्तवीरमुण्डै-
र्योगिन्यस्त्रिपुरजिते स्रजो जुगुम्फुः।।

।। ६८।।

सोत्साहं वलितबलोऽवलम्बितासि-
स्तान् हत्वाऽऽहवभुवि षट्सहस्रसंख्यान्।

कृत्वा द्रागवनिसमांस्तदीयदुर्गान्
सीदन्तं सपदि स सार्थमुद्दधार।।
।। ६९।।

कृत्वैवं सरणिमतस्करां गयाया:
सार्थेनाकलितनति: सठाकुरेण।
संश्रृण्वन् पथि चरितानि तस्कराणा-
मापेदे जयनगरं जयी जयेन्द्र:।।
।। ७०।।

बीकानेरं जेतुमभीयुष्यभयेन्द्रे
पत्रं राज्ञे तत्पतिना प्रैषि विलिख्य।
ग्राहाद् विष्णुर्यद्वदिभं विष्णुजवीर!
मां द्रागस्मान्मोचय भक्तोऽस्मि तवेति।।
।। ७१।।

मन्त्रिभ्यस्तत्पत्रमुपाकर्ण्य शरण्यो
जामात्राऽद्धा योद्धुमभीप्सन्नभयेन।
लक्षोन्मानां कूर्मचमूमध्वनि कर्षन्
दुर्गोदग्रं योधपुरं प्राप जयेन्द्र:।।
।। ७२।।

शुण्डादण्डस्फारविस्तारवन्तो
दन्तद्वन्द्वोत्खातविद्वेषिदुर्गा:।
दानासारैर्मारवाटं सृजन्त:
कच्छप्रायं कच्छनागा जगर्जु:।।
।। ७३।।

अश्वक्षुण्णक्षोणिधूलीपिनद्धे
दूरोदरता व्योम्नि भल्ला भटेन्द्रै:।
मार्गे मार्गे मारवीदृक्षु दत्त-
शम्पाडम्पातङ्कमन्वङ् निपेतु:।।

।। ७४।।

विप्रोषितप्रभु स योधपुरं प्रपद्य
श्रीमाननेकविधयुद्धविधाविदग्धः।
आवेष्टयत्परिसरोपवनीघनद्रु-
भङ्गोद्यतद्विपघटाभिरनीकिनीभिः।।

।। ७५।।

संयोज्य तोपनिवहानधिदुर्गमुच्चैः
प्रक्रान्तसाहसमरं समरं दधाना।
राष्ट्रोढराजमहिषी ननु सा तदानीम्
साक्षादमुष्य दुहिताऽप्यहितायते स्म।।

।। ७६।।

एवं सति द्रुतबलः स परीक्षिताऽसि
सत्यं ममासि तनुजेति सुतां प्रशस्य।
गव्यूतिमात्रमपसृत्य कृतावतारो
हन्त! श्लथोद्यममयुद्ध्यत शुद्धभावः।।

।। ७७।।

जयचरितमशेषं चारतः प्राप्य योध-
पुरविघटनशङ्कालुप्तसङ्कल्पजातः।
मरुवलयधरित्रीवासवो हन्त होलाऽ-
हनि जितमपि बीकानेरमुज्झाञ्चकार।।

।। ७८।।

विपुलगतिभिरुष्ट्रैः सैनिकाकृष्टनासा-
गुणविवलितवक्त्रप्रस्खलत्फेनपुञ्जैः।
कथमपि पथि तांस्ताञ्जङ्गलान् गाहमानो
दृढपिहितकपाटामासदद्राजधानीम्।।

।। ७९।।

स योधपुरगोपुरं क्रमविमुक्तगाढार्गलम्
प्रविश्य मरुभूधवो ध्वनिततोपयन्त्रोत्करम्।

न्ययुंक्त युधि सप्तभिर्बखतसिंहमुद्रंहसा-
मभिश्वशुरमर्वतामनुगतं सहस्रैस्तदा।।
।। ८०।।

सपदि बखतसिंहोऽप्युच्चकैः सज्जसेना-
मुखगतगिरिधारिप्रौढवेतण्डचण्डम्।
दृढतरपदघातोत्कूर्ददश्वेन्द्रपृष्ठो-
त्पतनजनितरागप्रोथबिम्बं प्रतस्थे।।
।। ८१।।

गङ्गवाणपुरमेत्य स स्मयी
क्वाऽस्ति भोः कमठराडिति ब्रुवन्।
अध्यनीकमसिभिस्तुदन् भटान्
सप्तवारमतनोद्गतागतम्।।
।। ८२।।

बखतमिह निहन्तुं कोशतः कर्षितासी-
नहह समवलोक्य स्वीयसामन्तवीरान्।
अपि विरुजति वीरा मा प्रहर्त्तव्यमस्मि-
न्नसकृदिति जयेन्द्रो बन्धुभावान्न्यषेधीत्।।
।। ८३।।

अथ कमठनिषिद्धास्तं मृषा योधयित्वा
तुरगकटकमुच्चैरस्य दूरात्ततक्षुः।
क्षतशिथिलशरीरो नूनमुन्नुन्नपक्षो
रणभुवमपहाय प्राद्रवत्सोऽपि भीतः।।
।। ८४।।

रणाद्द्राग्विद्राणे सति वखतसिंहे सरभसम्
प्रसह्य स्वायत्तं व्यधित गिरिधारिद्विपमहो।
दिनेषु क्रामत्सु त्रिषु स गिरिधारिप्रभुमृते
प्रताम्यन्तं बुद्ध्वा व्यतरदमुमस्मै स्मयहरः।।

।। ८५।।

रणव्याजादित्थं भयमभयसिंहेऽपि विदधद्
व्यधाद्बीकानेरं नरपतिरलीकायितभयम्।
अनुक्रामन्नश्वैर्मरुमयतरुच्छायसरणिम्
शरण्यः स्वःस्वच्छच्छवि जयपुरं प्राप विजयी।।

।। ८६।।

अथ श्रीमद्दिल्लीपरिवृढदृढादेशवशतः
पराजेतुं मैत्रावरुणिदिशमुच्छृङ्खलनृपाम्।
अमात्यैः सम्मन्त्र्य प्रधनविधिहेवाकिनमसौ
न्ययुङ्क्त प्रेक्षावाञ्झटिति युवराजं जयनृपः।।

।। ८७।।

ततोऽसौ कुमारः कुमारप्रभावः
समादाय सेनामनेनाविशेषात्।
निदेशाद् गुरोर्दाक्षिणात्यान् विनेतुम्
ध्वनद्दुन्दुभि क्षिप्रमेव प्रतस्थे।।

।। ८८।।

खमर्वद्भिरापूरि टापक्षतक्ष्मा-
समुड्डीनधूलीघटाभिर्हठेन।
पुनः कुञ्जरैरुच्चकैस्तद्व्यशोधि
समुत्क्षिप्तशुण्डोच्छलच्छीकरौघैः।।

।। ८९।।

अकारि द्विपेन्द्रैरनन्तातलं यन्-
मदप्रस्रवैः सान्द्रजम्बालजालम्।
तुरङ्गैः कुरङ्गैरिव प्रोच्छलद्भिः
खुरैस्तन्मुहुः क्षोदितं शोषितं च।।

।। ९०।।

समन्तात्ततं वप्रमाग्नेययन्त्रैः
समातन्वता तेन मार्गेषु नित्यम्।

चमूसन्निवेशः शात्रवैर्दुष्प्रवेशः
समानीयत प्रोच्चकैर्दुर्गभावम्।।
।। ९१।।

प्रयाणोद्भटानां भटानां निनादै-
र्वियच्चत्वरं सत्वरं संस्पृशद्भिः।
ललत्पुष्पपुञ्जेषु कुञ्जेषु सुप्ता
व्यबुद्ध्यन्त हंहो महाकेशरीन्द्राः।।
।। ९२।।

बलैरीश्वरीसिंहवर्मा सुवर्मा
दिशं दक्षिणां हन्त सद्यःप्रपद्य।
विधातुं पुरो युद्धरूपां मृगव्या-
मवर्तिष्ट तत्राभितो दाक्षिणात्यान्।।
।। ९३।।

समित्सीम्नि तूर्येषु तारं नदत्सु
विमुक्ताश्ववल्गेषु वीरव्रजेषु।
गजेन्द्रेषु गर्जत्सु कच्छेन्द्रसूनू
रणोत्साहमुत्तालमालम्बताऽलम्।।
।। ९४।।

तदग्रेसराग्नेययन्त्रास्यनिर्य-
दयोगोलदम्भोलिघातैः पुरस्तात्।
मदोत्तुङ्गनासीरनागा नगाभाः
प्रसह्य द्विषां पातयाञ्चक्रिरे द्राक्।।
।। ९५।।

बृहद्भानुरंहश्चलच्चण्डबाणा-
वलीविक्षताः शोणशोणायिताङ्गाः।
परं रेजिरे सम्परायाजिरे द्विण्-
महाकुञ्जरा व्योम्नि सान्ध्या इवाब्दाः।।

।। ९६।।

तदानीमहो घोटकोद्धूतधूली-

तमोधोरणीदु:प्रवेशे प्रदेशे।

समुत्तम्भिता बाहुजेन्द्रैः कृपाणी-

तडित्सन्ततिः सन्ततं नृत्यति स्म।।

।। ९७।।

कमठपतिपदातिभिः प्रसर्प्य

विशकलिताः परपत्तयः कृपाणैः।

क्षतगलदसृगुक्षितप्रदेशा

युधि रदननिपीडिताधरं निपेतुः।।

।। ९८।।

समरपरिसरे परस्परासि-

व्यतिकरकृत्तपरस्परोत्तमाङ्गाः।

त्रिदिवगतिमनुत्तमां प्रपद्य

सपदि भटा ययुरप्सरोऽतिथित्वम्।।

।। ९९।।

इति समजनि सङ्गरो गरीयान्

रुधिरधुनीतटबद्धपंक्तिगृध्रः।

कलयितुमिव कौतुकं भटानां

रविरपि वासरमध्यमेत्य तस्थौ।।

।। १००।।

अथ खलु युवराजः एष वीरः

करटिनमुन्नतमास्थितः पुरस्तात्।

स्वकटककदनं निरीक्ष्य रोषा-

रुणनयनो ज्वलदग्निदुर्निरीक्षः।।

।। १०१।।

स्वयमहह रदक्षताधरोष्ठो

रिपुसुदृशामधरं क्षताद्रिरिक्षुः।

अधिसमरमिभं कुरुष्व मेऽद्य
द्रुतमिति हस्तिपकं मुहुर्ब्रुवाणः।।
।। १०२।।
हृदि रुधिरझरान्द्विषां वितन्वं-
स्ततरवचापघनाशुगोऽग्रवर्षैः।
सरभसरणितानको रणान्त-
र्झटिति विवेश पराक्रमं चिकीर्षुः।।
।। १०३।।
अथ वीक्ष्य विशन्तमाहवे
युवराजं सचिवोत्तमः पितुः।
इति हन्त स राजमल्लको
हितगर्भां गिरमभ्यभाषत।।
।। १०४।।
ननु भो नृपनन्दन क्रुधा
कुरुषे किं सहसाऽद्य साहसम्।
मयि जीवति वैरिघस्मरे
तव योग्यो न भृशं परिश्रमः।।
।। १०५।।
निपतन्ति पुनः पुनः पुरो
ज्वलिताः सम्प्रति लोहगोलकाः।
अधिपावकवर्षमाग्रहाद्
विशतस्ते किमिव प्रयोजनम्।।
।। १०६।।
निभृतं क्वचिदत्र विश्रम
क्षणमस्मद्भुजवैभवमिष।
भवदीयभटैर्द्विषद्बलं
विजितप्रायमवेहि सम्प्रति।।

।। १०७।।

इति वादिनि राजमल्लके
युवराजः समुपात्तकार्मुकः।
रणमुग्रकबन्धताण्डवं
प्रविवेशैव विशिष्य साहसी।।

।। १०८।।

अनुवलति बलेऽपि कोदण्डमेकं सहायं वहन्
सुहृदमिव महागुणं पञ्चशाखे विशाखोपमः।
द्विपपतिगतिरीश्वरीसिंहवर्मा स वर्मावृतः
समिदुदरमबीभरन्मुण्डखण्डैः प्रचण्डैर्द्विषाम्।।

।। १०९।।

समधिकतरमुच्चकैरुच्छलत्केतुपुच्छच्छटो
विकटनिनदनादिताशेषदिक्चक्रवालान्तरः।
असिनिशितनखो महानीश्वरीसिंह एष स्यन्दना-
दरिकरटिघटासु हंहो जिघांसुर्न्यपतत्तदा।।

।। ११०।।

तोपस्तोमस्तिमितवरणं वारितारिप्रहारे
भित्त्वा व्यूहं प्रविशतितमामीश्वरीसिंहवीरे।
निस्त्रिंशाग्रप्रहृतिनिपतद्विद्विषन्मुण्डमुच्चै-
रन्वाकूर्दन्समिति सचिवा राजमल्लादयोऽपि।।

।। १११।।

व्यापन्नद्विपकूटनिर्गलदसृक्स्रोतःशतैरुक्षिते
भूतप्रेतपिशाचराक्षसघटाप्रोत्तालकोलाहले।
चक्रे शत्रुचमूचमूरुकदनव्यापारवानीश्वरी-
सिंहो हन्त रणाटवीपरिसरे शार्दूलविक्रीडितम्।।

।। ११२।।

इत्येवं क्रूरकोलाहलमुखरितदिक्कूलमाजानुबाहुः
सोत्साहं निर्ममन्थ प्रधनजलनिधिं खड्गमन्थेन वीरः।

शत्रुस्त्रीदृक्षु दिक्षु प्रसृमरकिरणः सिन्धुमुद्वेलखेलं
तन्वानोऽमुष्य तस्मात्पुनरजनि यशश्चन्द्रमा निष्कलङ्कः।।
।। ११३।।

सुनिबिडतया व्यातन्वन्ति प्रसह्य दरं दृशो-
ररिबलतमांस्यावृण्वन्ति क्रमात्समराङ्गणम्।
स्फुरदसिकरैः संहृत्य द्रागमुष्य भुजोदय-
क्षितिधरशिरस्युच्चैस्तस्थौ प्रतापदिवाकरः।।
।। ११४।।

यवनसमादेशाद्देशान्तरे द्विषतां बलं
प्रबलमलमप्याजौ जित्वा धनञ्जयविक्रमः।
रणभुवमलङ्काराकीर्णां वगाह्य वहन्धनं
जयपुरगतः पादद्वन्द्वं जयस्य ददर्श सः।।
।। ११५।।

विजयिनमुपप्रह्वं पवित्रनयो जयः
सदसि खलु भो योग्योऽसीति प्रशस्य पुनः पुनः।
जयपुरपदे धृत्वा तस्थौ वतारितधूःसुखं
स्थितवति सुते यूनि ह्येषा प्रथा गृहमेधिनाम्।।
।। ११६।।

विषयविमुखः श्रावं श्रावं पुराणकथास्तथा
सुकृतमनिशं कारं कारं फलाननुरोधतः।
स्मरगुरुपदं स्मारं स्मारं विशिष्य विशुद्धधी-
र्द्विजकुलमसौ नामं नामं निनाय दिनान्यसौ।।
।। ११७।।

गोविन्दस्य मुखारविन्दमनिशं पश्यंस्तदाख्या गृणं-
श्छृण्वंस्तस्य गुणांस्तदङ्घ्रितुलसीं जिघ्रंस्तदग्रे लुठन्।
प्रातस्तच्चरणामृतं परिपिबन्भक्तांस्तदीयान्स्पृश-
न्नित्येवं स तदेकतानहृदयो जीवन्विमुक्तोऽजनि।।

।। ११८।।

राज्यं वर्धितमाहवेषु विजितं स्वच्छं यशोऽप्यर्जितं
शिल्पक्षुष्यमयस्मयं जयपुरं निर्माय विख्यापितम्।
येनाऽयाजि तुरङ्गमेधविधिना द्रव्यं द्विजेभ्योऽर्पितम्
सोऽयं श्रीजयसिंहवीरनृपतिः स्यात् कस्य वाग्गोचरः।।

।। ११९।।

ऋग्वेदप्रवणः प्रभाकरभवः शांतस्वभावो महा-
राष्ट्रः श्रीव्रजनाथ इत्यभिधया यः कश्चिदासीद्द्विजः।
गीतं तेन वृषीगतेन भगवन्नाम्नां सहस्रं नृपः
श्रृण्वन्विष्णुपदीपयःप्लुतवपुर्लिल्ये परब्रह्मणि।।

।। १२०।।

इह खलु चतुश्चत्वारिंशत्समाः कुसुमायुध-
प्रतिममहिमा राज्यं प्राज्यं प्रशास्य यथाविधि।
खखवसुविधावब्दे पक्षे तथाश्वयुजोऽर्जुने
स्वरुषसि चतुर्दश्यां पुण्यैरपद्यत विष्णुजः।।

।। १२१।।

अथ बत तदा देव्यस्तिस्रः सतीत्वचमत्कृताः
प्रणतजनतामाशीर्वादैः प्रतर्प्य यथायथम्।
द्रुतमधिचितं स्वाङ्के राज्ञो निधाय तनूमहो
तदनुगमनोद्युक्ता दध्युः पदं परमेष्ठिनः।।

।। १२२।।

सत्स्वप्युत्तमवाहनेषु बहुशः पद्भ्यां प्रपद्येश्वरी-
सिंहो हन्त तथा निरीक्ष्य पितरं हाहेति चुक्रोश हा।
निर्मथ्याऽरणिमाशुशुक्षणिमरं सम्पादयद्भिर्द्विजै-
रस्य क्षिप्रमकारयच्च महितामन्त्यक्रियां यज्वनः।।

।। १२३।।

राजेन्द्रस्य निमीलनाज्जयपुरं जातं तदानीं महा-
शोकोद्रेकविविग्नया जनतया प्रक्रान्तहाहारवम्।

ब्रूमो हन्त पुनस्त्रिविष्टपपदं मुद्धेतुकेतुस्फुर-
त्सौधश्रेणि तदागमोत्सुकसुरप्रक्रान्तहाहारवम्।।
।। १२४।।

सश्रद्धं समनुष्ठितासु नृपतेः श्राद्धक्रियासु क्रमा-
दुत्क्रान्तेषु कतिष्वहः सुशनकैः शोके बहिर्नश्यति।
विज्ञप्तः सचिवोत्तमैः कथमपि श्रीमानसावीश्वरी-
सिंहेन्द्रो द्रुतमन्वभूज्जयपुरे पट्टाभिषेकोत्सवम्।।
।। १२५।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे समाप्तिमेकादशो ययौ सर्गः।।**

***

## द्वादश-त्रयोदशसर्गौ

।। १।।

अथाऽयमीश्वरीसिंहो राजा सञ्जाय दिद्युते।
मुक्ताक्षताक्तघुसृणतिलकालंकृतालिकः।।

।। २।।

रत्नसिंहासनगतश्चामरद्वयवीजितः ।
राज्यलक्ष्मीस्मितच्छत्रस्वच्छच्छायप्रतिष्ठितः।।

।। ३।।

अमुष्य राजतिलके विरेजुः पुरगोपुराः।
अशोकपल्लवस्त्रग्भिर्दूर्वाङ्काभिरलङ्कृताः।।

।। ४।।

परिमृष्टचतुष्कानि लिप्तालिन्दानि गोमयैः।
उत्पताकगवाक्षाणि गृहाणि गृहिणां बभुः।।

।। ५।।

शर्कराबुद्बुदानुच्चैरन्तःपुरपुरन्ध्रयः।
परस्परं तदा प्रीताः सादरं ददुराददुः।।

।। ६।।

द्विपैरश्वै रथैर्लोकैर्गतागतविधायिभिः।
व्यधत्त राजतिलकोद्भवः पन्थानमाकुलम्।।

।। ७।।

उपायनार्थमाजग्मुर्भूरिशो भूभुजां जनाः।
विस्तीर्णमपि सङ्कीर्णं यैर्जज्ञे राजमन्दिरम्।।

।। ८।।

मेवाडमघवामुष्मै प्रजिघाय द्विपादिकम्।
तेनासावतलस्पर्शं हर्षसिन्धुमगाहत।।

॥ ९॥
दत्तराज्यो जयेन्द्रेण दलेलो व्रजपार्थिवः।
एष वः किंकरोऽस्मीति ब्रुवन् प्रादादुपायनम्॥
॥ १०॥
बदनो नाम जट्टेन्द्रो वीरसंघट्टवन्दितः।
प्रेषयामास मातङ्गमुपदाभिः सह स्वयम्॥
॥ ११॥
कोटेन्द्रस्तत्प्रभावज्ञः प्रत्यर्प्य विविधोपदाः।
चकांक्ष तस्य करुणाकटाक्षक्षेपमात्मनि॥
॥ १२॥
गोपाल इत्यभिधया भूपतिर्यदुवंशजः।
नैकरत्नद्विपप्रायामुपदां समढौकयत्॥
॥ १३॥
प्रेष्य कामवनीभूपो जैत्रसिंहोऽप्युपायनम्।
राजेन्द्र इव नः पाहि राजन्नित्यलिखद्दलम्॥
॥ १४॥
दिल्लीदुश्च्यवनः श्रीमान् मुहम्मद इति श्रुतः।
तुरङ्गपंचकोपेतं कुञ्जरेन्द्रं ददौ मुदा॥
॥ १५॥
कच्छवाहाः ससन्नाहाः कच्छवाहबिडौजसम्।
नेमुर्ननु नमन्मौलिस्रग्गुलच्छं सहस्रशः॥
॥ १६॥
श्रुत्वेश्वरविलासं स काव्यं काव्यविचक्षणः।
श्रीकृष्णभट्टकवये ग्राममेकं ददौ तदा॥
॥ १७॥
न केवलमनेनाऽऽशाः सुराणां यशसा भृताः।
भूसुराणामपि पुनः संभृता द्रविणेन ताः॥

॥ १८॥

चतसृभ्यः स आशाभ्यो धनान्याहृत्य भूरिशः।
अतिथीनामसंख्येयास्तैराशाः समपूरयत्॥

॥ १९॥

राज्यार्द्धमीप्सता भ्रात्रा माधवेन कनीयसा।
आसीद्विद्वेष एवाऽस्य मातृपक्षसहायिना॥

॥ २०॥

कश्चिद् विद्याधरो नाम बंगो गौडद्विजाग्रणीः।
आसीदमुष्य सचिवश्चाणक्य इव चारुधीः॥

॥ २१॥

यद्बुद्धिवैभवेनैव सवाई जयराडपि।
चक्रे पुरं जयपुरं कमनीयविकल्पनम्॥

॥ २२॥

सन्त्वेकतो बुधाः सर्वे सर्वाः सन्त्वेकतः श्रियः।
एकतोऽसौ महाबुद्धिर्मन्त्री विद्याधरः स्थितः॥

॥ २३॥

विद्यानां पारदृश्वानमीश्वरीसिंहवर्मणे।
राजेन्द्रो मन्त्रिणममुमर्पयामास शर्मणे॥

॥ २४॥

राजेन्द्रः स्वान्तसमयं निकषा निकषो धियाम्।
कुमारमीश्वरीसिंहं व्यधाद्विद्याधराङ्कगम्॥

॥ २५॥

स मन्त्री स्वीयधिषणापरास्तधिषणस्तदा।
राजेन्द्रवाक्यवशगः श्रीश्वरीसिंहमाश्रयत्॥

॥ २६॥

अन्येऽपि हरगोविन्दराजमल्लादिमन्त्रिणः।
भेजुस्तमीश्वरीसिंहमीश्वरीसिंहविक्रमम्॥

।। २७।।

प्रोत्साहितः स तै राजा सैन्यं संग्राह्य षड्विधम्।
कल्पान्तमिव कुर्वाणः प्रतस्थे दिग्जिगीषया।।

।। २८।।

गण्डोद्गिरन्मदासारैः सम्प्रवर्तितनिम्नगाः।
द्विपा बिडम्बयामासुरुच्चैः कादम्बिनीं तदा।।

।। २९।।

उद्धूतपांशुभिः पादघातैरायासिता हयैः।
मेदिनी कार्श्यमापेदे श्रमः स्थौल्यं व्यपोहति।।

।। ३०।।

अश्वटापक्षतक्षोणीतलात्स्यां प्रकटोऽधुना।
इत्याकुलो भिया शेषः शङ्के पातालमावसत्।।

।। ३१।।

साग्नेयचूर्णपेटीनि पताकाभिर्लिखन्ति खम्।
तुरगैस्तोपयन्त्राणि यत्नाच्चकृषिरेतराम्।।

।। ३२।।

पत्तयः प्रौढचर्मासिचापतूणीरकङ्कटाः।
पीत्वा पादार्कवं फेनं धावन्ति स्म रणेच्छया।।

।। ३३।।

यथा यथा पताकिन्याः पताकाभिः प्रकम्पितम्।
तथा तथा सपत्नानां पंक्तिभिश्च प्रकम्पितम्।।

।। ३४।।

विष्वग्बलेषु वल्गत्सु नागिन्यः प्राहुरित्यहिम्।
याति कार्याय कच्छेन्द्रो धार्या भूरद्य यत्नतः।।

।। ३५।।

इमे दन्ताः पंक्तिर्न बकमिथुनानां पुनरियम्
मदानामश्रान्तं परिपतति धारा न पयसाम्।

इयं भूषा गोधेः स्फुरति न हि शम्पा, विरहिण!
द्विपानेतान्नाब्दान्कलय सुतरामीश्वरपतेः।।

।। ३६।।

वेगात्प्रतिष्ठमानानां कच्छानामच्छतेजसाम्।
सिंहनादेन महता सिंहनादोऽधरीकृतः।।

।। ३७।।

विक्षुण्णायां क्षितावश्वैः खमावृण्वत्सु केतुषु।
शेषश्च त्रिदशेशश्च बिभ्यतुर्वलतीश्वरे।।

।। ३८।।

द्विषत्पुरसमुद्वासी दिग्दन्तिमदमर्दनः।
महादुन्दुभिधूङ्कारधारध्वनिरभूत्पुरः।।

।। ३९।।

विद्विषस्तर्जयदिव मरुदेजद् ध्वजाञ्चलैः।
कोणघातध्वनन्नैकानकैर्नादितदिङ्मुखम्।।

।। ४०।।

अश्वोद्धूतरजःपुञ्जैरारब्धमुदिरच्छटम्।
तरवारचमत्कारैरुल्लासिततडिल्लतम्।।

।। ४१।।

निश्च्योतद्भिर्मदं मत्तमातङ्गैर्मन्दगर्जिभिः।
नयदावारिधितटं महीं जम्बालजालताम्।।

।। ४२।।

दानवर्षैरिभैर्मार्गं नयज्जम्बालजालताम्।
तमेव पुनरश्वौघैः क्षुण्णमाश्यानपङ्कताम्।।

।। ४३।।

वल्गत्पदातिमालाभिः समाकुलमितस्ततः।
उच्चकैर्लोलदुल्लोलमनुकुर्वाणमम्बुधिम्।।

।। ४४।।
प्रौढोष्ट्रव्यूहसम्भारं सामन्तैः परिरक्षितम्।
वल्गति स्म बलं राज्ञश्चतुरङ्गं समं चितम्।।
।। ४५।।
बहुयोजनविस्तारनिवेशा वेगवाहिनी।
वाहिनी बाहुजग्राहा द्विषामजनि दुस्तरा।।
।। ४६।।
सुवर्णरत्नशृङ्गाराः सुवर्णकुथसंवृताः।
रेजुः सुवर्णचित्राङ्गाः सत्सुवर्णस्रजो गजाः।।
।। ४७।।
प्रचण्डोद्दण्डशुण्डाग्रगण्डच्योतन्मदापगाः।
दन्तभग्नद्विषद्दन्तावलदन्ता द्विपा बभुः।।
।। ४८।।
उद्यच्छुण्डाविधुतिभिः स्वर्नदीकञ्जकर्षिणः।
उच्चैर्गण्डस्थलीश्लिष्टताराजग्मुर्मतङ्गजाः।।
।। ४९।।
अधो निह्नुत्य पातीयं द्विजिह्वेन्द्रानिति क्रुधा।
चख्नुः खुरैः किमु क्षोणीं क्षोणीन्द्रस्य तुरङ्गमाः।।
।। ५०।।
इति सज्जबलव्यूहे कच्छपे राज्ञि गच्छति।
नृणां निरुद्यमानामप्यासीदुद्यम उच्चकैः।।
।। ५१।।
एक एव गुणग्राही ननन्द स तदा नृपः।
प्राप्तानपि श्रिया श्रीमान्गुणिनोऽत्र पुपोष यत्।।
।। ५२।।
अन्वग्रहीत्स काव्यज्ञांस्तांस्ताञ्ज्योतिर्विदोऽपि च।
वैद्यानश्वादिशास्त्रज्ञान् रत्नराजपरीक्षकान्।।

।। ५३।।
अपि प्रवीणान्वीणासु गानदक्षान्महानटान्।
बलोद्भटान्भटांश्चापि समृद्धिभिरभीभरत्।।
।। ५४।।
कांश्चिद्दृष्ट्या शिशिरया कांश्चित्स्मितरुचा नृपः।
कांश्चिद् गिरा पुनः कांश्चित्करेण समभावयत्।।
।। ५५।।
भ्रूसंज्ञयाऽपरानन्यान्मस्तकान्दोलनेन च।
प्रीणयामास नीतिज्ञो परान्सन्निधिदानतः।।
।। ५६।।
समृद्धं राजसैन्यं तद् यत्र यत्रोषितं पथि।
तत्र तत्रैव सामन्ता विसस्मरुरलङ्कृतीः।।
।। ५७।।
तास्ता नद्यो नगास्तेने तानि तानि वनान्यपि।
गच्छता कच्छसैन्येन विष्वग् व्यानशिरे तरी।।
।। ५८।।
दुर्गमं मानवव्यूहैर्वनं श्वापदगर्जनम्।
ईश्वरेणैव विदधे ध्वनद्दुन्दुभिमङ्गलम्।।
।। ५९।।
खड्गोद्भटभटप्रौढसिंहनादैः प्रबोधिताः।
सिंहाश्चक्षुभुरुत्फालप्रोच्छलत्पुच्छगुच्छकाः।।
।। ६०।।
दुर्जीवं वासदानेन सापराधा व्यभेद्यत।
कुठारिभिररण्यानी श्रीश्वरस्य निदेशतः।।
।। ६१।।
समन्तात्पटपस्त्यानां विरेजुः सितभित्तयः।
परितः सान्ध्यमेघानां सिताभ्रततयो यथा।।

।। ६२।।

उच्चैर्हस्तिनमारूढः श्रीमानीश्वरपार्थिवः।
वृद्धश्रवा इव बभावास्थितोऽभ्रमुवल्लभम्।।

।। ६३।।

उद्यद्धूलीतमस्तोमस्तिमितासु दिशास्वभुः।
शक्तयो वीरदोर्दण्डप्रचण्डा दीपिका इव।।

।। ६४।।

उच्चैरालोकशब्देन दिशोऽष्टौ पार्श्ववर्तिनाम्।
समपूर्यन्त शिविराद् गच्छतीश्वरपार्थिवे।।

।। ६५।।

माद्यन्मतंगजघटा प्रास्थादर्वद्घटोत्कटा।
दत्तद्विट्संकटाच्छन्नदिक्तटा सुभटा चमूः।।

।। ६६।।

ईश्वरीसिंहसौभाग्यं सम्भाव्य महदद्भुतम्।
स एकलिङ्गविषयक्षोणीन्द्रो बिभ्यदभ्ययात्।।

।। ६७।।

स कालोचितमालोच्य भूपालः कच्छभूपतेः।
चक्रे महान्तमातिथ्यं वक्त्रेणाऽपि हृदा स्वयम्।।

।। ६८।।

प्रविश्य मेदपाटेन्द्रो पटमन्दिरमैश्वरम्।
संव्यधत्त व्यवहृतिं जयस्वर्गतिहेतुकाम्।।

।। ६९।।

शोचन् साश्रुक्षणं स्थित्वा व्यवहारविदां वरः।
जगाम हर्म्यमात्मीयमीश्वरेण विसर्जितः।।

।। ७०।।

स निशायां निशान्तस्थस्तादृगीश्वरवैभवम्।
स्मारं स्मारं जजागार निद्रा मत्सरिणा कुतः।।

।। ७१ ।।
दधदुत्यब्धिगाम्भीर्यमेष गाम्भीर्यतोऽवति।
धीरताऽस्य पुनः कापि कलाशास्त्रेषु धीरता।।

।। ७२ ।।
मन्येऽमुष्य यशो जन्ये जयत्यर्जुनमर्जुनम्।
विभा विभासतेऽतीत्य विभाकरविभामपि।।

।। ७३ ।।
योजनव्यापिपृतनं साहसैकप्रयोजनम्।
कः स यो जन एनं हि धर्षयेद्धीरयोजनम्।।

।। ७४ ।।
तप्तं किमप्यनेनोच्चैस्तपः परमदुष्करम्।
जयपत्तनसाम्राज्यश्रियं साधु भुनक्ति यत्।।

।। ७५ ।।
एनां तनूमनूनां स्वां कीर्तिनाम्नीमिहापराम्।
धृत्वा राजाधिराजः स्वः प्रास्थात्तन्वा तृतीयया।।

।। ७६ ।।
कश्चिदस्य कुलस्याहो विशेषो दुर्लभः परैः।
यः पुरो जायते प्राचां यशोभावुक एव सः।।

।। ७७ ।।
श्रीमानेष गुरौ नम्रो हरौ भक्तिपरः परम्।
बलवानचिरादेव दिशां जेता भविष्यति।।

।। ७८ ।।
इत्थं विमृश्य राणेन्द्रो राजेन्द्रतनयेन सः।
मैत्रीं कर्त्तुं नयेनैच्छीन्न येन सदृशोऽपरः।।

।। ७९ ।।
धन्येऽहनि ततोऽन्यस्मिन्सैन्येन महता वृतः।
धृत्त्वा पाणावसिं सज्जो राणाकस्य गृहान्ययौ।।

।। ८० ।।
गजाः सिन्दूरशृङ्गारा वर्षन्तो मदविप्रुषः।
सन्ध्यांशुच्छुरितोच्छन्ना जीमूता इव रेजिरे।।
।। ८१ ।।
धातुरागैर्विचित्राङ्गाः कम्पमानकुथाञ्चलाः।
नवोन्मिषितपक्षाग्राः शैला इव गजा बभुः।।
।। ८२ ।।
घटाटंकारिणो ध्वान्तसतीर्थ्याः पिप्पलाशनाः।
चातकैरीडिता मेघाः प्रावृषेण्या इवास्फुरन्।।
।। ८३ ।।
सकुथाः शृङ्खलैर्बद्धा भूशक्रेण मतङ्गजाः।
अकृत्तलक्षगरुतो विचेलुर्गिरयो यथा।।
।। ८४ ।।
आजानुवाटसंव्यानाः समुन्मिषितशेखराः।
चेतयन्तो द्विपाञ्जग्मुर्मदान्धान्पथि भल्लिनः।।
।। ८५ ।।
भूसुनासीरनासीरे पञ्चरङ्गध्वजा गजाः।
ततेन्द्रचापतडितो मेघा एव बभासिरे।।
।। ८६ ।।
वर्मजालोज्ज्वला नागाः सेनाऽऽननमभूषयन्।
छन्नाभोगास्तडित्वद्भिर्जङ्गमा इव पर्वताः।।
।। ८७ ।।
सुवर्णमणिमुक्ताभिः प्रोतपल्याणपेशलाः।
ननृतुरुच्चकैरश्वा मूर्तिमन्त इवानिलाः।।
।। ८८ ।।
गरुत्मन्तो गरुड्डीनाः पवमानाः शरीरिणः।
विवर्त्ता मनसां स्थूलास्तदातर्क्यन्त सप्तयः।।

।। ८९।।

जग्मुराजानदेशोत्था: पारसीका वनायुजा:।
सप्तसप्तेर्यतो ह्रीणा: सप्तयस्तेऽस्य सप्तय:।।

।। ९०।।

तेज: प्रचण्डवर्ष्माणो वल्गाचर्वणतत्परा:।
अर्वन्तश्चर्वयन्तोऽहीन् गरुडा इव लक्षिता:।।

।। ९१।।

उच्चर्मकच्छविस्फूर्त्तौ तरलोत्तुङ्गपंक्तय:।
तुरङ्गा: सैन्यपाथोधौ तरङ्गा इव रेजिरे।।

।। ९२।।

मुक्तागुच्छोज्ज्वला: स्वच्छरत्नजालचमत्कृता:।
रथा रेजु: सुमनसां विमाना इव पंक्तिश:।।

।। ९३।।

मारवैर्गौर्जरै: स्वर्णमालिभिर्दर्पशालिभि:।
अनुद्घातं चकृषिरे बलीवर्दवरै रथा:।।

।। ९४।।

युद्धोपयोगिन: केचित् स्यन्दना: सज्जहेतय:।
पलाशवस्त्रसंवीता मृगयार्हा बभु: परे।।

।। ९५।।

उष्ट्रैरश्वैर्गजैर्वाह्या: कषत्काञ्चनशेखरा:।
वरूथिनो रथा: सैन्यं भूषयन्ति स्म नैकश:।।

।। ९६।।

कलक्वणितसौवर्णकिङ्किणीका महारथा:।
उत्कन्धरं मयूरीभिरुत्सुकत्वाद्विलोकिता:।।

।। ९७।।

बाणौघपूर्णतूणीरा: स्कन्धासक्तशरासना:।
कक्षालम्बीन्यभेद्यानि चर्माणि दधतोऽधिकम्।।

।। ९८।।
शक्तिमन्तः परिकरप्रत्युप्तस्फीतशक्तयः।
स्वर्णसूत्राञ्चलश्मश्रुवेष्टनाः क्रूरचेष्टनाः।।
।। ९९।।
शूलिनोऽपि निरुद्वेगाः सगदा अपि नीरुजः।
अतिसाराः पुनरहो शतशोऽथ सहस्रशः।।
।। १००।।
हन्त निमंक्षुमगच्छं सखीसमक्षं न्यमांक्षमपि सहसा।
न हि जातु चेन्न्यमंक्ष्यं तदा न्यमंक्ष्यं न किं मंक्षुं।।
।। १०१।।
ज्वलत्कालानलज्वालाक्रूरप्रकृतयः परम्।
बाहुकोशशयान्खड्गान् बिभ्रतश्चित्रमुष्टिकान्।।
।। १०२।।
सैन्यसिन्धुमहापूरनृत्यत्कल्लोलविभ्रमाः।
मूर्तिमन्तो यथा गर्वा रणकण्डूलबाहवः।।
।। १०३।।
वेगोद्रेकेण धावन्तः प्रौढा झञ्झानिला इव।
पदातयः प्रभोरग्रे प्लवन्ते स्म मुहुर्मुहुः।।

।। १०४।।
सैन्यसन्नाहमालोक्य सीदन्सीसादपार्थिवः।
व्यवस्यति किमद्यैष ढुण्ढारोऽपृच्छदित्यहो।।
।। १०५।।
तं भीतं मन्त्रिणः प्राहुरस्थाने नाथ भीर्वृथा।
अयं स्वाभाविकोऽमुष्य सन्नाहो विकृतिर्न हि।।
।। १०६।।
इत्याश्वस्तमनास्तत्र राणाको रणितानकः।
सभामास्थाय सामन्तैः प्रत्यैक्षिष्ट तदागमम्।।

।। १०७।।
राजेन्द्रपरलोकाप्तिप्रहृष्टः कुटिलाशयः।
तदानीं प्राह तत्रैत्य कोटेन्द्रो मेदपाटपम्।।
।। १०८।।
राजेन्द्रेण दलेलाय दत्तं बुन्दावतीपदम्।
तद्दापय प्रभो तस्मै यः पुरा तत्र भूपतिः।।
।। १०९।।
मतिमानीश्वरीन्द्रोऽद्य समभ्येति गृहांस्तव।
तदेनं हिन्दुसुत्रामं शनकैरिति शिक्षय।।
।। ११०।।
प्रगासीद्यस्य वा बुन्दी स एवास्तु तदीशिता।
दलेलः पुनरुद्दण्डः स्थानान्तरमुपेतु सः।।
।। १११।।
एवमद्धा त्वदुक्तं स स्वीकुर्यादपि जातुचित्।
श्रेयस्कामो न कुर्वीत को नाम महतां वचः।।
।। ११२।।
एवं सिद्ध्येदभिप्रायः प्रायः कल्याणमप्यलम्।
न किञ्चिद् दुर्घटं राजन्ननुकूले सतीश्वरे।।
।। ११३।।
अस्मिन्नेवान्तरेऽकस्मादुदस्थात्तोपनिस्वनः।
कच्छेन्द्रनिर्गमाशंसी रोदसीभेदभीषणः।।
।। ११४।।
यावद्राणाभिधो राजा दध्याविति किमेतदाः।
तावदेव रयादागाद्बलैर्वल्गद्भिरीश्वरः।।
।। ११५।।
मत्तेभदानधाराभिः क्लिन्नं राजसभाङ्गणम्।
तदेव घोटकव्यूहैः क्षुण्णत्वात्प्रकृतिं दधौ।।

।। ११६।।
रेजे राणेन्द्रशिविरं सध्वजैरीश्वरद्विपैः।
उद्भिन्नेन्द्रायुधैरब्दैर्व्योमेव निभृतान्तरम्।।
।। ११७।।
मुक्तागुलच्छच्छविभिः स्वर्णलेपचमत्कृतैः।
राणेन्द्रशिविरद्वारं राज्ञो गजरथैर्बभौ।।
।। ११८।।
खड्गचर्मोद्धुरैरंसव्यतिषक्तशरासनैः।
उद्भटैरीश्वरभटैः पुपूरे तच्चतुष्ककम्।।
।। ११९।।
बभौ भृत्यकरामृष्टपुच्छैस्तुच्छेतरक्रमैः।
कच्छवाहेन्द्रवाहौघै राणेन्द्रशिविराजिरम्।।
।। १२०।।
वेत्रबाहुभिरुद्घुष्टजयशब्दैः समन्ततः।
स्तूयमानावदानादिः श्रीमानागच्छदीश्वरः।।
।। १२१।।
मत्तं गजं समारूढो महान्तं स्वर्णमालिनम्।
पश्चादारूढसचिवसमुच्छालितचामरः।।
।। १२२।।
स्वच्छरत्नच्छटोच्छूनच्छत्रविच्छित्तिविच्छुरः।
पार्श्ववर्तिद्विपासीनैर्धूतपिच्छो मुहुर्नृपैः।।
।। १२३।।
प्रौढवेषमनोहारी मुक्ताहारैरलङ्कृतः।
चर्ममण्डलविन्यस्तबाहुर्बाहुजवन्दितः।।
।। १२४।।
समुल्लासितनिस्त्रिंशैरुल्लसद्बर्हशेखरैः।
वीरसाधुभिराबद्धं प्रेक्षमाणो मृषा मृधम्।।

।। १२५।।
एकलिङ्गक्षितीन्द्रोऽपि समुत्थाय निजासनात्।
अनुद्रुतः स्वसामन्तैर्ययावीश्वरसम्मुखम्।।
।। १२६।।
आस्थानमण्डपद्वारमुपेत्य विनयान्वितः।
मिमेल कच्छवाहेन प्रचेता इव वज्रिणा।।
।। १२७।।
ज्वलिताग्नेयचूर्णानि दीप्तवर्त्तिनिपाततः।
तत्क्षणं दध्वनुर्धीरं तोपयन्त्राणि नैकशः।।
।। १२८।।
उपगम्य मिथः प्रह्वौ दृग्भ्यां संयोज्य तौ दृशौ।
उपनीय करौ प्रेम्णा सस्वजाते मुहुर्मुहुः।।
।। १२९।।
राणेन्द्रः स्वाग्रतः कृत्वा कच्छवाहबिडौजसम्।
प्रवेशयामास सदः स्नेहनिर्भरमानसः।।
।। १३०।।
उच्चैस्तस्य सदःसौधं सदुपस्करसज्जितम्।
विशति स्म प्रतापः प्राक्समनन्तरमीश्वरः।।
।। १३१।।
शनैः शनैः सह प्राप्य तुङ्गमास्थानमण्डपम्।
सिंहासनं समध्यासामासतुस्तौ नृपावुभौ।।
।। १३२।।
शुभालापेऽथ विरते मेवाटपरमेश्वरः।
कोटेन्द्रप्रेरितः प्राह ढुण्ढारपरमेश्वरम्।।
।। १३३।।
विज्ञाप्यमद्य रहसि किमप्यस्ति भवत्सु मे।
तेनान्तश्चलतु भवान्मन्त्रः स्याद्यत्र नौ सुखम्।।

।। १३४।।
इत्युक्त्वा स समुत्थातुं यावदिच्छति संसदि।
तावद्विज्ञातहार्देन प्रत्यूचे श्रीश्वरेण सः।।
।। १३५।।
उक्तं वा श्रीमता नोक्तं सर्वं तत्स्वीकृतं मया।
मत्पित्रा दत्तमेकस्य बुन्दीराज्यं विना प्रभो।।
।। १३६।।
अस्माभी राज्यमन्यस्य प्रसह्य जगृहे यथा।
तदीयोऽपि तथाऽस्माकं गृह्णातु बलवान्यदि।।
।। १३७।।
न कस्यापि पितुः पृथ्वी पृथिवीशक्र! दृश्यते।
समामनन्ति वीरस्य केवलं वशवर्तिनीम्।।
।। १३८।।
शक्तोऽद्य यदि कोटेन्द्रो बुन्दीं गृह्णातु युद्ध्यतः।
कोऽर्थः प्रश्ने समर्थस्य न तावदिति विद्महे।।
।। १३९।।
तदानीं स गतः क्वाभूद्यदा बुन्दी जिता बलात्।
कच्छैस्तदर्थमुप्तं स्वं शिरो बीजमिव क्षितौ।।
।। १४०।।
प्रगल्भमैश्वरं वाक्यं श्रुत्वा राणाह्वयो नृपः।
पश्यन् कोटेन्द्रवदनं ह्रिया मौनमपद्यत।।
।। १४१।।
ततो वार्त्तान्तरव्याजात्तत्सर्वं निह्नुते स्म सः।
मानहानिं तु निह्नोतुं नाशकन्म्लायदाकृतिः।।
।। १४२।।
नाज्ञापयत्स सीसादो वैमनस्यं समुत्थितम्।
अवहित्थं दधौ किन्तु व्याहरन् कृत्रिमस्मितम्।।

।। १४३।।
इत्यन्योन्यमुभौ तत्र दर्शयन्तौ बहिर्मुदम्।
विप्रतिपत्तिमात्मीयां व्यंजयामासतुर्न हि ।।

।। १४४।।
एकलिङ्गक्षितिपतिर्भव्यं ताम्बूलभाजनम्।
ईश्वरस्य पुरो न्यस्य गृह्यतामित्यवोचत।।
।। १४५।।
अथेश्वरोऽपि ताम्बूलमुपादाय शुचिस्मितः।
राणेन्द्रं सम्यगामन्त्र्य गतः सद्म यथागतम्।।
।। १४६।।
इति सङ्गम्य राणेन्द्रः श्रीश्वरेण गतस्मयः।
दधावमर्षविक्षोभभयाश्चर्यपरम्पराम्।।
।। १४७।।
दर्शयन्बहिरामोदं द्वेषमन्तर्विवर्द्धयन्।
विचित्रभावसंकीर्णस्वान्तो राणाजिदाबभौ।।
।। १४८।।
हन्त कोटेन्द्रकौटिल्यं वितर्क्य कमठाधिपः।
चिरं विचिन्तयामास स्वयमित्थमनेकशः।।
।। १४।।
अहो असौ स्वयं लावः स्पर्द्धते किं गरुत्मता।
जम्बुकः सिंहमुज्जृम्भं किमाक्रमितुमिच्छति।।
।। १५०।।
शशः स्पृशन्पदा गण्डं वेतण्डस्य बिभेति नो।
इत्येवं बहुधामृश्य चुकोप भृशमीश्वरः।।
।। १५१।।
गच्छन् विवृत्य कच्छेन्द्रः षष्टिसाहस्रसप्तिभिः।
सत्वरं लुण्ठनोत्कण्ठी कोटाख्यं पुटभेदनम्।।

।। १५२।।

त्वरितं त्वरितन्त्रज्ञश्छन्नमन्त्रः स कच्छपः।
प्रापत्कोटापुरं रुष्टो विप्रकृष्टः किमश्विनाम्।।

।। १५३।।

उष्ट्रपृष्ठोढचण्डास्त्रस्तुष्टपुष्टभटोद्भटः।
कुण्ठितारिर्लुलुण्ठ द्राक्कमठो हठनिष्ठुरः।।

।। १५४।।

कोटेन्द्रं दुर्जनं नाम स्वभावादपि दुर्जनम्।
निहन्तुं चकमे राजा महानासीत्तदा रणः।।

।। १५५।।

निशम्य युद्धवृत्तान्तं राणाकः सन्नसंमदः।
आजगाम स्वयं कच्छहड्डयोः सन्धिकाम्यया।।

।। १५६।।

सहसैव तयोर्भूत्वा सेनयोरन्तरे द्वयोः।
क्षम्यतां नैष हन्तव्यो न्यषेधीदित्थमीश्वरम्।।

।। १५७।।

अरे इतः पलायस्व प्राणितुं यदि ते स्पृहा।
भर्त्सयन्निति राणाको दुर्जनं तमनीनमत्।।

।। १५८।।

इत्येवमीश्वरीसिंहग्रस्तं निःसार्य दुर्जनम्।
ययौ पुनस्तमापृच्छ्य राणाकोऽपि स्वपत्तनम्।।

।। १५९।।

ततः करमुपादाय कोटापत्तनतः प्रभुः।
राणेन्द्रस्यानुरोधेन दुर्जनं न जघान तम्।।

।। १६०।।

अभयोऽपि भयस्पर्शी श्रीश्वरस्य सखाऽजनि।
के पुनर्नाऽत्र मित्राणि बुभूषन्ति बलीयसः।।

।। १६१।।

अनुरागान्मरोरागादभयेन्द्रः क्रमेलकैः।
मेलनादनयोश्चित्तं प्रीतिवित्तं मिथोऽभवत्।।

।। १६२।।

तावुभौ हन्त राजानौ लोकस्थितिनिबन्धनौ।
पुष्पवन्ताविव परं दिदीपाते परस्परम्।।

।। १६३।।

सङ्गतौ कच्छराष्ट्रोढौ श्रुत्वा दिल्लीपतेरपि।
आतङ्कशङ्कुभिश्चित्तं शतभिन्नमजायत।।

।। १६४।।

तदा तत्र समेतौ तौ राजानौ राजदोजसौ।
इन्द्रोपेन्द्राविव चिरं रुचिरां प्रीतिमापतुः।।

।। १६५।।

अथानुजोऽभयेन्द्रस्य स्मरन्वैरं पुरातनम्।
खलताख्यलतागुल्मो बखताख्यो ह हाऽऽययौ।।

।। १६६।।

श्रीसवाईजयेन्द्रेण बीकानेरं रिरक्षुणा।
आस्कन्दता मरूद्देशान्यः पुराजौ पराजितः।।

।। १६७।।

ईश्वरीसिंहमाह स्म पुंसा मध्यगतेन सः।
राजेन्द्रैर्मरुदेशश्रीर्लुण्ठिता सा प्रदीयताम्।।

।। १६८।।

तदुत्तरमितो दातुं प्रहितः प्रहिताशयः।
कश्चित्फकीरदासाख्यः श्रीश्वरेण विचक्षणः।।

।। १५९।।

उक्तिदक्षः स्वपक्षस्थः प्राप्य राष्ट्रोढसंसदम्।
स तत्र प्राह तन्त्रज्ञः श्रीश्वरस्य वचो यथा।।

।। १७० ।।

कियद्गतं धनं ब्रूत भवतां बलशालिनाम्।
तत्सर्वं वयमद्यैव शक्ताः स्मः पुनरर्पितुम्।।

।। १७१ ।।

किन्त्वेकमिन्दुविशदं राजेन्द्रैर्वो यशो हृतम्।
दातुं नाऽद्य तदस्माभिरुदारैरपि शक्यते।।

।। १७२ ।।

मतङ्गाः परमोत्तुङ्गास्तरलाश्च तुरङ्गमाः।
महार्घमणिमुक्ताढ्याः सम्पत्तिर्वः पुरोऽर्पिता।।

।। १७३ ।।

यत्र यत्र जिघृक्षा वस्तत्तद्वस्तु प्रगृह्यताम्।
मा शोचत चलां लक्ष्मीं यशोलुब्धा हि मानिनः।।

।। १७४ ।।

युद्धं कृतं जयेन्द्रैः स्वयशोऽर्थं वित्त वित्तमाः!।
वित्तमात्राय वो बुद्धिः प्रधने जातु यातु मा।।

।। १७५ ।।

इत्युक्तिनामितारातिः स्वपक्षोत्कर्षकारकः।
निर्व्यूढस्वामिकार्यत्वात् सुप्रसन्नमुखमुखच्छविः।।

।। १७६ ।।

आदौ युतः फकारेण कीरदासो महामतिः।
प्रणम्य पुनराचख्यौ प्रभोरग्रे समग्रशः।।

।। १७७ ।।

षष्टिसाहस्रसंख्याकैर्बाढव्यानद्धकङ्कटैः।
ऐश्वरं तद्बलं वल्गज्जगर्ज हयसादिभिः।।

।। १७८ ।।

प्रबलेन बलेनोच्चैर्भीषयन् वखतं नृपः।
आत्मभावेन भावेन युयुजेऽभयवर्मणा।।

।। १७९।।
अर्द्धराज्यर्द्धिभाजं तमुग्रं भ्रातरमात्मन:।
शङ्कते सोऽभयेन्द्रोऽपि स्वर्भानुमिव भानुमान्।।
।। १८०।।
अभूत्कमठराष्ट्रोढराजयो: प्रीतिसङ्गम:।
भीतिमेकाकिभावेन बभार बखतस्तदा।।
।। १८१।।
ऐश्वरं बलमुद्वेलं समुद्रमिव दुस्तरम्।
न सेहे द्रष्टुमपि स तीक्ष्णांशुमिव कौशिक:।।
।। १८२।।
सङ्गतौ कच्छराष्ट्रोढौ हन्यातां जातु मां रुषा।
इति संशयमापन्नो बखतो द्राक्पलायत।।
।। १८३।।
श्रीश्वरेन्द्रे तडिन्मौर्वीधनुर्विस्फार्य गर्जति।
जनेषु जीवनेच्छुर्ना नारभेत नमांसि क:।।
।। १८४।।
आस्फोटयत्सु दोर्दण्डानीश्वरस्य पदातिषु।
आशङ्क्य बखतो भीरुर्ययौ नागपुरं निजम्।।
।। १८५।।
इति राष्ट्रभृतां मध्ये जैत्रपत्रं पितेव स:।
अर्जयित्वा यश: शुभ्रं गोपयामास भूपतीन्।।
।। १८६।।
ईश्वर: पृथिवीशानामीश्वर: कमठेश्वर:।
निग्रहानुग्रहं कर्त्तुं स साक्षादीश्वर: स्वयम्।।
।। १८७।।
शेषराजाद्वराहाच्च गां दधावधिकं स यत्।
तत: प्रख्यातिमापेदे कमठेन्द्र इति स्फुटम्।।

।। १८८।।

विरराज प्रकृतितः कृतितोऽपि मनोहरः।
यशःश्रिया लसितया सितया कमठोद्वहः।।

।। १८९।।

स दिद्युते नरमणी रमणीगणमन्मथः।
क्रतुप्रचरणेषूच्चैर्दक्षः किं च रणेष्वपि।।

।। १९०।।

दुधाव सुहितः स्वेषां परं वसुहितः परान्।
सहितो मुख्यसामन्तैः स हि तोषितसैनिकः।।

।। १९१।।

क्षत्रव्यापाररुचिरो रुचिरोचितविग्रहः।
कदापि नैव कलितः कलितः किल पार्थिवः।।

।। १९२।।

इति जित्वा दिशः सर्वा गर्वाध्मातमहाभुजः।
स विवेश विशेषश्रीर्जवाज्जयपुरं जयी।।

।। १९३।।

देव्यः श्रीकच्छदेवस्य नवासन्नवयौवनाः।
ज्येष्ठा राणावती तत्र सलूमरसुता श्रुता।।

।। १९४।।

द्वितीया यादवी नाम सा करोलीपतेः सुता।
तृतीया वीरपुरिका तुर्या कापि बनेडजा।।

।। १९५।।

अन्या बीकावती धन्या किं च शक्तावती परा।
काचित् सुजाणसीगोत्रा तथाऽन्या गोडजाऽप्यभूत्।।

।। १९६।।

पुत्रौ कल्किप्रसादौ द्वौ बालकावेव तौ मृतौ।
दुहिता दीपकुँवरा दीप्त्या दीपशिखोपमा।।

।। १९७।।

सा दत्ता समलंकृत्य श्रीश्वरेणेश्वरर्द्धिना।
राष्ट्रोढरामसिंहाय योधपत्तनभूभुजे।।

।। १९८।।

अभये स्वर्गते रामो बखतेन निराकृतः।
वसञ्जयपुरे हन्त कालधर्ममुपेयिवान्।।

।। १९९।।

सुखेन वर्तमानोऽपि दारैर्नवभिरीश्वरः।
चकमे हरगोविन्ददुहितारं प्रसह्य हा।।

।। २००।।

तदर्थमेव निरमायि स्वःसूचीसौध उच्चकैः।
द्युव्यधक्षममूर्द्धा यो यौगिकीं ख्यातिमृच्छति।।

।। २०१।।

तमारूढः कदाऽप्येनां पश्यन्तीं स्वकुचौ रहः।
दृष्ट्वा सम्बोधयन्नुच्चैरार्यामेतां पपाठ सः।।

।। २०२।।

अक्षिभ्रुवं नततया तुङ्गतया निस्तलौ स्तनौ सुतनोः।
चिकुराविचकिलरुचिभिर्व्यतिराते दीप्तिमपरिमिताम्।।

।। २०३।।

बाले द्विफाललम्बितचिकुरदशाचारुचूचुकौ स्वकुचौ।
उत्फणफणीन्द्रपुच्छच्छन्नमुखाविव निबोध निधिकुम्भौ।।

।। २०४।।

क्रुद्धोऽजनि तदारभ्य श्रीश्वरे राज्ञि तत्पिता।
माधवेन्द्रेण निभृतं चक्रे सन्धिमिति श्रुतम्।।

।। २०५।।

जगत्सिंहेन्द्रराणाको नासीरे न्यस्य माधवम्।
जयपत्तनमुच्छेतुमाययौ दुर्जनोक्तितः।।

।। २०६ ।।

तमुपागतमाकर्ण्य प्रतिजेतुमना नृपः।
बलेन महता साकं निश्चक्राम पुराद् बहिः ।।

।। २०७ ।।

ईश्वरे चलति प्रौढो जज्ञे निःसाननिस्वनः।
हृदयानि सपत्नानां ततोऽवेपन्त निर्भरम् ।।

।। २०८ ।।

तत्तादृगुद्धतारोपं विलोक्य बलमैश्वरम्।
राणेन्द्रस्य मनो मम्लौ धौतान्तःस्रवदम्भसः ।।

।। २०९ ।।

ततः प्रववृते युद्धं परस्परजिगीषया।
शीर्षोदकच्छवाहानां सिंहनादान्विमुञ्चताम् ।।

।। २१० ।।

संग्रामचत्वरे रक्तशीकरै रुक्षितोदरे।
क्षुरप्रैः क्षत्रवीराणां प्राणद्यूतमवर्तत ।।

।। २११ ।।

प्रारम्भ एव युद्धस्य भीतः शीर्षोदनायकः।
निन्दन् दुर्जनसिंहेन्द्रं पलायत यथागतम् ।।

।। २१२ ।।

किमागतं किमारब्धं किं मतं किं प्रतिश्रुतम्।
इत्थमीश्वरवाद्यानि दध्वनुस्तत्पलायने ।।

।। २१३ ।।

योद्धुं यदा यदा यातः शीर्षोदो माधवान्वितः।
प्रसह्य द्रावयामास श्रीश्वरेन्द्रस्तदा तदा ।।

।। २१४ ।।

पैतृस्वस्रीयमाधातुं कच्छनीवृति माधवम्।
मल्लाररावकवीरेण युयुजे मेदपाटपः ।।

।। २१५।।

जयपत्तनसाम्राज्ये स्थापयिष्यामि माधवम्।
इति मल्लाररावोऽपि बलवानन्वमोदत।।

।। २१६।।

ईश्वरीसिंहमल्लाररावयोर्बद्धवैरयोः।
बगरूप्रभृतिष्वाजिः स्थलेष्वसकृदैधत।।

।। २१७।।

मन्त्रिभी राजमल्लाद्यैर्दृष्टराजेन्द्रदृष्टिभिः।
ईश्वरो गुप्तपर्यन्तस्तृणवन्मनुते स्म तम्।।

।। २१८।।

कदाचिदथ राजानं दिल्लीदेवो मुहम्मदः।
युद्धाय प्रेषयामास शतलञ्जनदीं प्रति।।

।। २१९।।

साहाय्येऽयुङ्क्त नव्वाबं महाबलपराक्रमम्।
ईश्वरं सोऽप्यनुययौ पवमान इवानलम्।।

।। २२०।।

जिजीविषुर्गृहानेतु रिरंसुर्गच्छतु स्त्रियम्।
अनुयातु युयुत्सुर्मां कच्छानित्याह कच्छपः।।

।। २२१।।

ईश्वरीसिंहनव्वाबौ विशिष्य मिलितौ मिथः।
बभतुर्वासवबली ऐकमत्यमिवास्थितौ।।

।। २२२।।

प्रतस्थे बलमादाय नृपो नव्वाबसङ्गतः।
प्रकम्पनप्रकम्पेण केतुना खं खनन्निव।।

।। २२३।।

हयव्यूहखुरोदञ्चद्धूलीधोरणिधूसरम्।
रुद्धार्कं व्योम बिभ्राजे यद्वन्मुदिरमेदुरम्।।

।। २२४।।

वहन्तः प्रस्तरकलामधिस्कन्धं परेशयाः।
मूर्तिमन्तः इवोत्साहाः कच्छवाहास्तमन्वयुः।।

।। २२५।।

अथ युद्धविधिर्वृत्तः शतलञ्जतटे महान्।
ईश्वरस्य समद्वन्द्वो मुहम्मदविरोधिभिः।।

।। २२६।।

सम्पराये जितप्राये राज्ञा हन्त चराननात्।
अश्रावि माधवोऽभ्येति जवाज्जयपुरीमिति।।

।। २२७।।

जन्यं प्रोज्झ्य जितप्रायं न्यवर्तत पुरं नृपः।
स्वकार्याण्यनुकार्याणि भवन्ति व्यवहारिणाम्।।

।। २२८।।

वेष्टितः पञ्चसाहस्रैर्घोटकैः कमठो निशि।
पन्थानं हा विसस्मार भ्रमन्नासीदितस्ततः।।

।। २२९।।

आलो नाम तदा जट्टो भ्रमन्तं पथि पार्थिवम्।
अम्बावतीपरिसरमानिनाय कथञ्चन।।

।। २३०।।

विशन्नम्बावतीदुर्गं विशिष्य श्रान्तवाहनः।
मल्लाररावमायान्तं शुश्राव पुनरीश्वरः।।

।। २३१।।

अविश्रम्यैव मल्लारमभ्यवर्तत साहसी।
रिपौ वल्गति वीरेन्द्रा विश्राम्यन्ति न जात्वपि।।

।। २३२।।

श्रान्तोऽप्युद्वेल्लदुत्साहो नग्रासिर्नद्धकङ्कटः।
आप मानी यथा श्येनः स मल्लारजिघृक्षया।।

।। २३३।।

अथ प्रचेलुरन्योन्यं तरलास्तरवारयः।
बालार्ककरसम्पर्कसहस्रगुणरोचिषः।।

।। २३४।।

अधिपृष्ठमभेद्येन संवीतो बाढचर्मणा।
कच्छो मल्लारसैन्याब्धिं जातभङ्गमगाहत।।

।। २३५।।

संरम्भमैश्वरं वीक्ष्य मल्लारो भयविह्वलः।
अनीकेनावशिष्टेन पलायत जिजीविषुः।।

।। २३६।।

लुलोकिषालोलजनं समन्ततः
समन्ततः स्फारगवाक्षतोरणम्।
विद्राव्य मल्लारमुदारविक्रमः
क्रमेण पेदे जयपत्तनं नृपः।।

।। २३७।।

कथानिबन्धानवलोक्य नैकशः
पुनः समापृच्छ्य पुराविदो विदः।
यथायथं श्रीश्वरसिंहभूपते-
र्दिग्जैत्रयात्राक्रम एष वर्णितः।।

।। २३८।।

स राजमल्लादिषु मन्त्रिचुञ्चुषु
यथाक्रमं कालगतिं गतेषु।
व्यधत्त धीमन्तममात्यमुच्चकै-
र्धुरन्धरं केशवदासमीश्वरः।।

।। २३९।।

मल्लाररावो बत माधवोदितो
बिभेद सामन्तसमाजमैश्वरम्।

स्यादन्यथा भाविनि हन्त भाविनी
दुर्भेद्यमप्यत्र सुभेद्यमञ्जसा।।
।। २४०।।

निरन्तरं माधवगूढवेतनैः
समेत्य सर्वैरपि राजपूरुषैः।
राज्ञः कथञ्चिद् विमनस्कता शनै-
रुत्पादिता केशवदासमन्त्रिणि।।
।। २४१।।

अहो अयं दास्यति माधवाय मा-
मिति भ्रमं तत्र दधौ सुमन्त्रिणि।
आसन्नपाता भवितव्यताबला-
द्धितं विपर्येण विदोऽपि मन्वते।।
।। २४२।।

अथो तमाहूय स पक्वकल्मषो
विलुप्तबुद्धिः प्रतिकूलदैवतः।
चेदस्मदीयोऽसि तदेदमापिबे-
त्युच्चार्य तस्मै गरलं हहा ददौ।।
।। २४३।।

स्वयं समर्थोऽपि स साधुरैश्वरी-
माज्ञामुरीकृत्य पपौ तदामृतम्।
साध्वीमसाध्वीमपि वा गिरं प्रभोः
कुलप्रसूता न विलंघयन्ति हि।।
।। २४४।।

सयत्ननिघ्नस्वसमाजवञ्चितो
विपाद्य भूजानिरमात्यतल्लजम्।
न केवलं राजपदे निराशतां
दधौ विशेषेण निजेऽपि जीविते।।

।। २४५।।

निशम्य वृत्तान्तमिति प्रहर्षितो
मल्लारराव: पुनरप्यपद्यत।
प्रचण्डमुच्छृङ्खलसैन्यचङ्क्रमो
लुलुण्ठ ढुण्ढारमनायकं यथा।।

।। २४६।।

मल्लाररावस्य निशम्य तादृशं
व्यतिक्रमं क्रुद्धमनाः पुनः पुनः।
सेनापतीन्माधवपक्षतन्त्रितान्
युद्ध्यध्वमित्याह स माधवाग्रजः।।

।। २४७।।

सर्वेऽपि सेनापतयः प्रभूदितं
शृण्वन्त आरादपि नैव शुश्रुवुः।
पृष्ठं प्रदर्श्य स्थितवत्यहो विधौ
पुंसः स्वपक्षोऽपि विपक्षतामियात्।।

।। २४८।।

आसीद् द्विजः कश्चिदमुष्य पार्श्वगः
स द्रागमुं प्राह पुरः कृताञ्जलिः।
राजन्नृते मामिह कोऽपि नास्ति वः
सर्वेऽधुना माधवमाश्रिता इति।।

।। २४९।।

निशम्य तादृक्स्वमनिष्टमुच्चकै-
र्धीरोऽप्यकस्मात्स्फुटिताम्बरः शुचा।
रुरोद हा हन्त कुतो गतोऽसि भो
हित्वा सखे केशवदास मामिह।।

।। २५०।।

विलप्य कष्टं बहुधाऽभिचारवि-
दावाह्य कृत्यां कलशे नियम्य सः।

अमुं बले न्यस्य रिपोरुपेहि मा-
मित्यन्वशासद् द्विजमन्तिकस्थम्।।
।। २५१।।

द्विजस्तमादाय घटं नृपोदितः
कृत्यासमावेशवशेन दुर्वहम्।
सैन्ये निधातुं द्विषतामशक्नुवन्
न्यधत्त भीतः पुरगोपुरान्तरे।।
।। २५२।।

राजा पुनर्व्यर्थमवेत्य कार्मणं
मल्लारमाकर्ण्य पुरोपकण्ठगम्।
निपीय शिश्ये विषमुग्रमीश्वरः
प्रख्यापयन्नीश्वरतामिवात्मनि।।
।। २५३।।

निपीय हालाहलमित्थमुच्चकैः
समासजन्माधववर्मणि श्रियम्।
दुर्गाधिपत्वेन विशिष्य विश्रुतः
स ईश्वरः प्राणितुमप्यनीश्वरः।।
।। २५४।।

सप्तैव वर्षाणि विमर्शकोविदो
द्विषष्टिमह्नामवनीमवन्सुखम्।
अब्देऽद्रिखाष्टेन्दुमितेऽथ कृष्णगाम्
स द्वादशीं प्राप्य विषेण संस्थितः।।
।। २५५।।

हरादिगोविन्दमुखाः कुमन्त्रिणः
समेत्य दृष्ट्वा नृपमस्तजीवनम्।
विधाय गुप्तिं नगरस्य सङ्गताः
कथं दहेमैनमिति व्यचिन्तयन्।।

।। २५६।।

मल्लाररावेण निरुद्धनिर्गमाः
पुनः प्रजाक्षोभविशुष्यदाननाः।
दाहक्रियां तालकटोररोधसि
प्रभोरकुर्वन्नुपराजमन्दिरम्।।

।। २५७।।

अद्यापि यच्छत्रिरजस्रदीपक-
ज्योतिः स्वभव्याय जनैः समर्च्यते।
गतेषु निष्ठामपि सिद्धिशालिषु
सिद्धिर्ह्यमीषामधिचैत्यमेधते।।

।। २५८।।

मल्लारकोऽप्यवगतक्षितिपप्रवृत्ति-
र्भूयो भिया मनसि संशयमादधानः।
सेनां शनैरहह मौक्तिकदुर्गतः स्वा-
मुत्थाप्य पत्तनलुलुण्ठिषया प्रपेदे।।

।। २५९।।

आगच्छतोऽस्य पुरगोपुरमश्वटापैः
पुस्फोट हन्त स घटः कमठप्रणीतः।
तत्कालमेव सहसा जगदण्डभेदी
बध्नीत गृह्णत हत ध्वनिरित्युदस्थात्।।

।। २६०।।

ब्रह्माण्डसम्पुटभिदा कलशादकस्मा-
दुद्गच्छता धृतिमुषा ध्वनिना विचेताः।
मल्लार आः किमिदमित्यवलोकमानो
भीतः पलायत मिथो हतनैजसैन्यः।।

।। २६१।।

मुद्राविमर्दरभसेन सहुङ्कृतेन
केनापि कुम्भजनुषा महसा प्रसह्य।

आचम्य चण्डचरितेन महागभीरो
मल्लाररावधृतिसिन्धुरकारि रिक्तः।।
।। २६२।।

कृत्याचमत्कृतिबलेन मिथस्तदानीम्
खड्गायितान्यधिसपत्नबलं तृणानि।
वज्रायितानि शकलान्यपि मार्तिकानि
नो शक्यते कलयितुं कमठाभिचारः।।
।। २६३।।

एवं सति द्रुतमुदित्वरसम्मदोऽसौ
स्वैरेत्य रामपुरतः खलु माधवो यत्।
राजा बभूव जयपत्तनसम्पदस्त-
न्मार्जारभाग्यविभवादिह शिक्यपातः।।
।। २६४।।

अब्देऽद्रिविष्णुपदनागविधौ सहस्ये
पक्षे पुनर्धवलरोचिषि रोचमानः।
श्रीमाधवो मनुतिथावतिथिस्तुताऽर्थो
राज्याभिषेकमहमन्वभवन्महान्तम्।।
।। २६५।।

श्रीमाधवस्य तुरगैर्द्रुतमागतस्य
यज्जायते स्म जयपत्तनराज्यलाभः।
हा हन्त सोऽयमभवद्वृषदंशकस्य
भाग्यप्रभाववशतः खलु शिक्यपातः।।
।। २६६।।

ते ते गदाधरमुखाः खलु पल्लिवालाः
औदुम्बरा अपि सदाशिवभट्टमुख्याः।
प्राक्सेविताङ्घ्रिमधुना फलदानदक्ष-
मन्वीयुरेनमृभुवृक्षमिव द्विजौघाः।।

।। २६७।।

दिल्लीभुजाऽप्यरिभिरुद्विजितेन नत्वा
श्रीमाधवक्षितिभृतेऽधिगृहं स्थिताय।
प्रत्यर्पि हन्त रणितभ्रमरः स दुर्गः
प्रत्यर्जयन्ति वसु भाग्यवतां हि भूताः।।

।। २६८।।

तं प्राप्य दुर्गमतिदुर्गममुच्चसाल-
श्रीशालिमाधवपुरं निरमाय्यनेन।
तैस्तैश्चतुष्पटिमुखैर्विशिखाविशेषै-
र्यत् प्रायशोऽनुकुरुते जयपत्तनर्द्धिम्।।

।। २६९।।

जीवातुर्जन्मभाजां कमठकुलभुवां क्षत्रियाणां प्रणेता
नाथोऽनाथव्रजानां सुगुणमणिखनिर्भाग्यभूर्भूसुराणाम्।
संहर्त्ता दुर्जनानां कविकलितवसुर्वासवस्पर्द्धिसारः
स्फारश्रीर्माधवः क्ष्मां शशिविशदयशःपूरिताशः शशास।।

।। २७०।।

संग्रामामन्दमाद्यद्द्विमतमदगिरिध्वंसदम्भोलिकेलि-
र्लोलल्लालित्यलीलालहरिविलुलितोल्लासिकन्दर्पदर्पः।
तेजः प्राग्भारखर्वीकृतनिखिलनृपश्रेणिरुर्वीं स गुर्वीम्
धर्मात्मा माधवश्रीः सुचिरमिह दधौ माधवक्ष्माधवेन्द्रः।।

।। २७१।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे पफाण पूर्तिं त्रयोदशः सर्गः।।**

***

## चतुर्दशः सर्गः

।। १।।

ईश्वरानन्तरं राज्यं प्राज्यं शासति माधवे।
जट्टो जहार मल्लाख्यो व्याजहार स्पशं स्मयी।।

।। २।।

गच्छ कच्छपतिं नत्वा ब्रूहि मद्वचनं यथा।
भवन्तः शर्मकामाश्चेत्कामा जट्टाय दीयताम्।।

।। ३।।

इत्युक्तो जट्टराजेन स प्राप्य जयपत्तनम्।
प्रणम्य माधवेन्द्राय जट्टोक्तं सर्वमुक्तवान्।।

।। ४।।

निशम्य जट्टसंदेशं माधवो धीरमानसः।
दृशं व्यापारयामास स्वीयसामन्तमण्डले।।

।। ५।।

मौनमालम्ब्य तिष्ठत्सु तदा कच्छेषु कृत्स्नशः।
दलेलः खड्गमामृश्य जट्टदूतमभाषत।।

।। ६।।

कामां न जातु दास्यामो युद्धकामा वयं स्थिताः।
श्वस्त्वया यत्प्रकर्त्तव्यं क्रियतेऽद्यैव किं न तत्।।

।। ७।।

नेदं दिल्लीपदं मूढ किं त्वेत्तज्जयपत्तनम्।
यत्र ते पूर्वजैः पूर्वं भृत्यभावतया स्थितम्।।

।। ८।।

दलेलेनेति संदिष्टश्चारश्चारुक्रमः क्रमात्।
जुहारमल्लमासाद्य व्याचख्यौ तद्यथायथम्।।

॥ ९॥
जट्टः साटोपमाकर्ण्य कच्छवाहविनिश्चयम्।
क्रोधेन महताविष्टो जज्वाल च चचाल च॥
॥ १०॥
अथ प्रास्थादुपन्यस्य पुष्करस्नानकैतवम्।
प्रोत्साहितः समरुणा वह्नियन्त्राधिकारिणा॥
॥ ११॥
त्रिशतीं तुङ्गतोपानां पुरस्कृत्य परिष्कृताम्।
ढुण्ढार प्रान्तमुद्दण्डः पीडं पीडमहिण्डत॥
॥ १२॥
प्रपद्य पुष्करं तत्र स्नात्वा पुष्कलवैभवः।
विजयेन्द्रेण युयुजे योधपत्तनभूभुजा॥
॥ १३॥
जट्टाद्राष्ट्रोढ राजस्य समुद्भावयितुं भिदाम्।
श्रीसदाशिवभट्टेन्द्रं प्रेषयामास माधवः॥
॥ १४॥
सदाशिवेन विजयस्तैस्तैरुच्चावचक्रमैः।
बोधितो विजहौ जट्टं बलिपुष्टं यथा पिकः॥
॥ १५॥
ततो विजयसिंहेन प्रत्याख्यातः स जट्टपः।
गर्जं गर्जमनीकौघैरुपावर्त्तत पुष्करात्॥
॥ १६॥
इतः पुनर्जयपुरान्माधवेन्द्रनिदेशतः।
जट्टमुद्दिश्य कच्छानां प्रातिष्ठत पताकिनी॥
॥ १७॥
गच्छन्तमनुगच्छन्ती कृत्स्नशः कच्छवाहिनी।
जग्राह हन्ततरसा माँवडासीम्नि जट्टपम्॥

।। १८।।
हरसायमुखा वीराः पुरस्कृत्य दलेलकम्।
अधिजट्टेन्द्रपृतनं चुकूर्दुश्चण्डसाहसाः।।
।। १९।।
अथ दुन्दुभिधुङ्कारमुखरीकृतदिङ्मुखम्।
बम्भ्रम्यमाणनाकस्त्रीविमुक्तवरमालिकम्।।
।। २०।।
नलिकास्त्रघटानिर्य्यद्गोलकैर्लोलदग्निभिः।
विकीर्यमाणवेतण्डचण्डकङ्कालदन्तुरः।।
।। २१।।
योगिनीभिस्तृषार्त्ताभी रक्तसम्भृतखर्परः।
हतवीररथारूढोत्तालवेतालभीषणः।।
।। २२।।
क्षतजक्षतजोद्गारैः प्रवर्त्तित नदीशतः।
विशिष्य विस्रगन्धेन विमूर्च्छितमहाभटः।।
।। २३।।
विजृम्भितान्धतमसो रजोभिस्तुरगोद्धतैः।
विकीर्णानेकनेपथ्यैश्चतुरस्रं चमत्कृतः।।
।। २४।।
समुत्थितकबन्धौघैर्विष्वगारब्धताण्डवः।
पुनः पुनर्दलेलेन कृत्तकृत्रिमजट्टपः।।
।। २५।।
अन्योन्यं भट्टहस्त्यश्वैः शकलीभूय विच्युतैः।
निरुद्धवीरसामन्तचक्रस्वच्छन्दचंक्रमः।।
।। २६।।
क्रव्यादैः क्रव्यमादाय भीतैर्वीरविमर्दतः।
आरुह्य कुञ्जरशवान् समारब्धभुजिक्रियः।।

।। २७।।
वीरमुण्डानि संगृह्य भैरवेण विवल्गता।
साकूतं सह भैरव्यारब्धकन्दुककौतुकः।।
।। २८।।
वञ्चयद्भिः समरुणा गोलासारान्विसर्जितान्।
धीरैर्दन्तात्तनिश्त्रिंशैः कृतभूमिविसर्पणः।।
।। २९।।
निखातशङ्कुभिर्जट्टतोपश्रुतिषु कृत्स्नशः।
व्यापारितासिरुत्प्लुत्य कच्छवाहैर्जिगीषुभिः।।
।। ३०।।
संग्रामतारतम्यज्ञैर्नभः स्थैर्नारदादिभिः।
सविस्मयैरिव चिरं निर्निमेषैर्निरीक्षितः।।
।। ३१।।
दर्शयन्पुत्रपौत्राभ्यां दलेलाय त्रिविष्टपम्।
जघटे जट्टकमठसंघट्टः कल्पसोदरः।।
।। ३२।।
समुच्छलत्सु सोत्साहं कच्छेषु जितकासिषु।
तत्रास तत्र समरे समरुर्बलवानपि।।
।। ३३।।
पलायस्व जितास्तावत्कच्छैर्वयमिति ब्रुवन्।
जट्टेन्द्रं कम्पयामास भूकम्प इव भूधरम्।।
।। ३४।।
प्रबोधितः समरुणा स मरुक्षितिपं क्षपन्।
विहाय तोपयन्त्राणि पलायत जिजीविषुः।।
।। ३५।।
यदि क्षणं धृतिं धृत्वा जट्टेन्द्रोऽस्थास्यदाहवे।
तर्हि कृच्छ्रं गताः कच्छाः पलायिष्यन्त निश्चितम्।।

।। ३६ ।।

पृष्ठं दिशति जट्टेन्द्रे गर्जन्ती कच्छवाहिनी।
आवर्ज्य सङ्गरक्षेत्रं जयवाद्यमवादयत्।।

।। ३७।।

जयं निकाम्य तदनु दलेलादिवलक्षयम्।
माधवक्ष्माधवो हन्त जहर्ष च शुशोच च।।

।। ३८ ।।

जिग्ये दिल्लीभुजा भूमिः सोऽपि जट्टैरजीयत।
माधवेन जितास्तेऽपि सैन्यमात्रं प्रयुञ्जता।।

।। ३९ ।।

तदारभ्य प्रतापाग्निर्माधवस्य व्यजृम्भत।
यस्मिञ्ज्वलति सर्वेऽपि शत्रवः शलभायिताः।।

।। ४० ।।

माधवस्य प्रतापेन दूनो न किमुमाधवः।
अन्यथा स कथं धत्ते गङ्गां शिरसि पादयोः।।

।। ४१ ।।

अपीनः प्राप्य वैयर्थ्यं यत्प्रतापेन धिक्कृतः।
क्षमापनाय बभ्राम प्रतिलोकमितस्ततः।।

।। ४२ ।।

यत्प्रतापानलेऽहौषुर्हवींष्यङ्गानि विद्विषः।
तदुत्थपुण्यनिचयादासन्वन्द्या दिवौकसाम्।।

।। ४३ ।।

प्रतापग्रीष्मभीष्मांशौ प्रतपत्यस्य सर्वतः।
शुष्यन्ति स्म रिपुस्त्रीणां सर्वे सरसविभ्रमाः।।

।। ४४।।

अस्थानेऽपि कृते ग्रीष्मे यत्प्रतापविवस्वता।
दिनानि सुहृदामीयुर्वृद्धिमुच्चैः समृद्धिभिः।।

।। ४५।।

प्रचारे सति सर्वत्र यद्यशश्चन्द्ररोचिषाम्।
पेतुः प्रत्यर्थिचक्रेषु दुःसहा विरहार्त्तयः।।

।। ४६।।

सन्तानश्रेणिसङ्कीर्णैर्नैकरम्भाचमत्कृतैः।
जहसे वैजयन्तश्रीर्यदमात्यगृहाङ्गणैः।।

।। ४७।।

देवानां मेरुरावासो वितीर्णेऽस्मिन्क्व ते पुनः।
स्थास्यन्तीति स तर्केण राज्ञाऽसौ नार्थिसात्कृतः।।

।। ४८।।

अस्ति क्वापि दयासिन्धुस्तदुत्थो माधवद्रुमः।
पाणिपादसुमो दीनैरात्तसम्पत्फलो बभौ।।

।। ४९।।

महिमा माधवेन्द्रस्य शक्यः कलयितुं कथम्।
बभूव यस्य सचिवो द्विभुजोऽपि चतुर्भुजः।।

।। ५०।।

दुःखानि न स शुश्राव कस्यापि करुणाकरः।
तूष्णीं न श्रुतवांस्तस्थौ ये ते तदपनुत्तये।।

।। ५१।।

स्थाने रत्नाकरं जाने जयपत्तनमुच्चकैः।
यदुवास श्रियाऽशेषभोगभागिह माधवः।।

।। ५२।।

उल्लोलदुल्लोलसहस्रघट्टना
वाचालसोपानपरं परम्परम्।
अनल्पशिल्पं जलसौधमूर्च्छित-
च्छत्रिव्यधासीदधिमानसागरम्।।

।। ५३।।

चतुर्भुजेन क्षितिवासवाज्ञया
सोपानपंक्तिस्थितनैकनागरम्।
उच्चैः शिलोत्कीर्णकरीन्द्रचन्दिरं
चतुर्भुजस्य व्यरचीह मन्दिरम्।।

।। ५४।।

अथ जातु जयी राजा वीरै राजानुबाहुभिः।
ऊनयारेन्द्ररावस्य प्रातिष्ठत जिगीषया।।

।। ५५।।

ऊनयारेन्द्ररावोऽपि नरूककुलनायकः।
दुर्गे निलीय युयुधे चिराय नलिकायुधैः।।

।। ५६।।

रावमायतमानोऽयं यतमानोऽपि नित्यशः।
न निस्सारयितुं दुर्गात्सिंहः शशमिवाशकत्।।

।। ५७।।

तदानेन विनिर्दिष्टः श्रीकृष्णो मिश्रपुङ्गवः।
व्याजं कञ्चिदुपन्यस्य दुर्गस्थं रावमासदत्।।

।। ५८।।

सहसा साहसी मिश्रः प्रसह्य विनिपात्य तम्।
आरुह्य वक्षसि च्छुर्य्या हनिष्यामीत्यभीषयत्।।

।। ५९।।

मुञ्च मामेष गच्छामि दुर्गं हित्वेति वादिनम्।
एवं विमुच्य दिव्येन दुर्गाद् द्राङ् निरकासयत्।।

।। ६०।।

इति निष्कास्य रावं तं मिश्रराजो महाबलः।
माधवायोपदीचक्रे चक्रे सैन्यस्य तस्थुषे।।

।। ६१ ।।
ऊनयारपदं तस्मै राजा प्रणमते ददौ।
श्रीकृष्णं नाम मिश्रेन्द्र प्रशसंस पुनः पुनः ।।
।। ६२ ।।
अथ कालान्तरे वृत्ते कोटेन्द्रेण नियोजितः।
अभिदुद्राव मल्लाररावो रावं युयुत्सया।।
।। ६३ ।।
रावोऽपि सिंहसंरावस्त्वरा बोधितमाधवः।
सिंहानूकैर्नरूकेन्द्रैर्मल्लारारिमपद्यत।।
।। ६४ ।।
माधवेन्द्रेण रावाय साहाय्यं दातुमिच्छता।
गजाश्वभटसम्पन्ना प्रेषिता निजवाहिनी।।
।। ६५ ।।
सम्प्रवृत्तेऽथ समरे रावमल्लाररावयोः।
जयश्रीर्हन्त संदिग्धा क्षणमात्रमजायत।।
।। ६६ ।।
हन्ताऽथ माधवेन्द्रस्य वाहिनी वेगवाहिनी।
क्षीयमाणबलं रावं बृंहयन्ती समासदत्।।
।। ६७ ।।
आप्यायितः स वाहिन्या रावः सरावभीषणः।
क्रमेण कर्तुमारेभे परभङ्गप्रकाशनम्।।
।। ६८ ।।
ध्वंसयन्ध्वजिनीं शत्रो रुषाक्रान्तमना मृधे।
अनिरुद्ध एव रुरुचे स माधवबलोद्धतः।।
।। ६९ ।।
सम्मर्दे तत्र महती गुलिकास्त्रप्रहारतः।
पुत्रो मल्लाररावस्य भिन्नवक्षा व्यपद्यत।।

।। ७० ।।

एवं सति स मल्लारो धैर्यदत्तजलाञ्जलिः।
पलायत बलैः शेषैर्म्रियतेऽनुमृतं हि कः।।

।। ७१ ।।

न व्यधास्यद्यदा राजा साहाय्यं राववर्मणः।
तदा बली व्यलुण्ठिष्यन्मल्लारोऽप्यूनयारकम्।।

।। ७२ ।।

इति जित्वा द्विषः सर्वान्सर्वराजनमस्कृतः।
माधवो यौवनोल्लासी बुभुजे विषयांश्चिरम्।।

।। ७३ ।।

चतस्रोऽस्य प्रियास्तत्र ज्येष्ठा राष्ट्रोढवंशजा।
इन्द्रदुर्गेन्द्रदुहिता विष्णोः श्रीरिव दिद्युते।।

।। ७४ ।।

सुषुवे मानसिंहं या भवानीसिंहमप्यनु।
अप्राप्तयौवनावेव मम्रतुस्तावुभावपि।।

।। ७५ ।।

द्वितीयाऽप्यद्वितीयैव देवीसीसोदनी श्रुता।
तृतीया काऽपि भट्याणी बभूव शुभलक्षणा।।

।। ७६ ।।

तुर्या चौडावती ख्याता राज्ञी रावतवंशजा।
त्रीन्पुत्राञ्जनयामास राजानं समुपास्य या।।

।। ७७ ।।

तत्र ज्येष्ठो रघुवरः कान्त्या रघुवरोपमः।
यो बाल एव ह ह हा! कालधर्ममुपेयिवान्।।

।। ७८ ।।

द्वितीयः पृथिवीसिंहः प्रतापोऽपि तृतीयकः।
यथाब्दश्चैत्रराधाभ्यां तथा ताभ्यां नृपो बभौ।।

।। ७९।।

दास्यः पुनश्चतस्रोऽस्य कृपापात्रमिति श्रुतम्।
तासु काचिदसूत द्वौ सुतावेकां च दारिकाम्।।

।। ८०।।

तन्नामनि यथा रामदासोऽथ शिवदासकः।
तस्थौ दण्डाधिकारे यः सुचिरं रुचिरोदयः।।

।। ८१।।

यन्नाम गृणतां प्रातर्भोजनं न मिलत्यहो।
भवत्येवेदृशी शक्तिर्नाम्नि कस्याऽपि पापिनः।।

।। ८२।।

उदारवृत्तिरमृतकँवरा नाम या सुता।
योधपत्तनभूपालदासीपुत्राय साऽर्पिता।।

।। ८३।।

वर्षाणि सप्तदशमासयुगं प्रशास्य
क्ष्मामेकविंशतिदिनानि स माधवेन्द्रः।
राज्ये यथाविधि सुतं प्रणिधाय पृथ्वी-
सिंहं जगाम हरिसद्म हरिप्रभावः।।

।। ८४।।

तस्मिन्ननेहसि समिद्धहुताशहेतौ
कृत्वा वपूंषि सहसैव ह हा हवींषि।
दासीचतुष्टयमनुक्षितिपं ससार
दासीकृतत्रिदशदारमुदारपुण्यम्।।

।। ८५।।

संवत्सरे जलधिदृग्वसुशीतभानौ
चैत्रे तमिस्रशकलेऽहनि किं च गौर्याः।
श्रीमाधवस्मृतिविमुद्रितमोहमुद्रः
श्रीमाधवो वत मुमोच शरीरबन्धम्।।

।। ८६।।

पित्र्यं ततः समधिगम्य पदं स पृथ्वी-
सिंहः प्रतापकलया कलितप्रतापः।
स्थानानुकूलधृतचण्डमृदुस्वभावो
ढुण्ढारदेशवलयं वलयी जुगोप।।

।। ८७।।

पृथ्वीसिंहजनुर्माघे दशम्यां तिमिरत्विषि।
सा पुनर्नन्दशीतांशुवसुभूवर्षवर्तिनी।।

।। ८८।।

इन्दुदृग्वसुभूवर्षे पौषपक्षे शशिद्विषि।
द्वितीयायां प्रतापस्य जन्म जज्ञे प्रतापिनः।।

।। ८९।।

अथो पृथुश्रीर्धरदृग्वसुक्षितेरब्दात्परं किञ्चिदुदीतकूर्चकः।
द्विषत्प्रहारी विजहार निर्भरं पृथ्वीनरेन्द्रः पृथिवीपरिग्रहः।।

।। ९०।।

बीकादिनेरपतिरात्मसुतां प्रदित्सु-
रह्वास्त कच्छपपतिं प्रहितासदूतः।
दोलायमानहृदयोऽभवदेष पृथ्वी-
राजोपपादितनिषेधनिषिद्धवाञ्छः।।

।। ९१।।

बीकानेरं वीरबलैरीयुषि पृथ्वी-
राजे पूर्वं तन्नृपपुत्रीं परिणेतुम्।
मम्रुर्मार्गे वारि विनाऽमुष्य बलानि
तत्सम्बन्धोऽवर्जि ततस्तेन तदादि।।

।। ९२।।

ततस्तदारभ्य परेऽपि कच्छपाः
पृथ्वीमहाराज निषेधमन्त्रिताः।

विवाहसम्बन्धमनीरविप्रुषो
बीकादिनेरस्य जहुर्मुहुर्मुहुः।।
।। ९३।।
अयं तु पृथ्वीनृपतिः पुनः प्रभुः
सम्बन्धसङ्कोचमुदीक्ष्य मन्त्रिभिः।
बीकापुरं प्राप विवाहलोलुपः
क्व वंशशैली चिरमीक्ष्यते स्थिरा।।
।। ९४।।
बीकाधिपेनाऽपि कथञ्चिदम्बुभि-
र्मार्गे नदीमातृकतामवापि ते।
विवाहतृष्णोऽपि स तृष्णयोज्झितो
जगाम केतुस्थगितां वरो वरः।।
।। ९५।।
बीकापुरं प्राप वरः पताका
पीतातपं प्रोच्छ्रितततोरणाङ्कम्।
बीकावतीपाणिमधत्त पाणिना
स्विन्नान्तरं कण्टकदन्तुरेण।।
।। ९६।।
बीकाधिपोऽपि धृतिमान्प्रतिरथ्यमात्म-
शक्त्या नवीनघृतसम्भृतनैककुण्डः।
सर्वत्र पुञ्जितवलक्षसितोपलास्तु-
र्जन्यानतर्पयदनुत्तमभोज्यकल्पैः।।
।। ९७।।
महार्हनेपथ्यचमत्कृताकृतिः
समृद्धिभिर्धिक्कृतगुह्यकाधिपः।
बीकावतीं तां परिणीय पार्थिवो
लक्षावधित्यागमवर्षदर्थिषु।।

।। ९८।।

बीकाधिपेनाहरणीकृतं धनं
स्वीकृत्य बीकावतिकाद्वितीयः।
विवेशसौधस्थितनागरीगण–
प्रवृत्तगीतं जयपत्तनं नृपः।।

।। ९९।।

गच्छत्यनेहसि कियत्यपि सा नृपस्य
बीकावती प्रियतमा द्रुतमाप निष्ठाम्।
आलम्बतायमपि तद्विरहेण दुखं
क्वास्ते चिरं स्थितभिदः पुरुषस्य सौख्यम्।।

।। १००।।

अमात्यसार्थेन विशिष्य शिक्षितः
शुचं तनूकृत्य महीपुरन्दरः।
नवीनतारुण्यतरङ्गितस्मरो
बभूव भूपः परिणेतुमुत्सुकः।।

।। १०१।।

बाघोरराजतनुजां ननु जातरूपरूपां
निरूपितरतिः परिणीयभूपः।
राष्ट्रोढकृष्णगढराजबहादुरस्य
कन्यां स धन्यविभवां विधिनोपयेमे।।

।। १०१।।

विशिष्य देवीद्वयतत्परस्य सुतावपि द्वौ नृपतेरभूताम्।
भिषग्भिरभ्यस्तकुमारतन्त्रैरुपास्य मानावपि संस्थितौ तौ।।

।। १०२।।

नृपो युवाप्यात्मजशोकजीर्णः प्रतापसिंहं स्वपदे निवेश्य।
जगाम धाम त्रिदशाधिपस्य प्रेत्याऽपि यन्त्युच्चपदं महान्तः।।

।। १०३।।

पृथ्वीसिंहः शत्रुनागान्विनिघ्नन्
स्थित्वा क्ष्मायां क्ष्मेन्दुवर्षाणि हर्षात्।
मालाजापे हायने हा प्रपेदे
स्वाराद्यस्य ध्वान्तभित्ते चतुर्थ्याम्।।

।। १०४।।

भ्रातुः पश्चात्प्राप्य राज्यं प्रतापो
दर्पोद्दण्डैः क्षत्रियैरादृताज्ञः।
द्विष्टध्वान्तोच्छित्तये दिक्षु दिक्षु
प्रोन्मीलद्भिः स्वैः प्रतापैर्दिदीपे।।

।। १०५।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे पफाण पूर्तिं चतुर्दशः सर्गः।।**

***

## पञ्चदशः सर्गः

।। १।।

राज्यासनमथाक्रम्य क्रमादुदयमीयुषः।
प्रतापः श्रीप्रतापस्य सूरस्येव व्यवर्द्धत।।

।। २।।

प्रजा गोप्तरि कच्छेन्द्रे सुखायैव ददुर्मनः।
यतो न हि विदुर्भानोरुदयास्तमयावपि।।

।। ३।।

आनन्दमङ्कुरयति राज्ञि माधवनन्दने।
शोकः कः कुत्र कीदृग्वा जानाति स्म न कश्चन।।

।। ४।।

राजा स्वयं कविरपि गुरुः कवयतां मतः।
प्रकाशितप्रतापोऽपि शिशिरीकृतसज्जनः।।

।। ५।।

स्वकल्पितैरहरहो वृत्तबन्धैर्घनाक्षरैः।
तुष्टाव श्री ब्रजनिधिं स कवित्वनिधिर्नृपः।।

।। ६।।

शृण्वतां स चमत्कारां यत्कवित्वपरम्पराम्।
स विस्मयानामगलत्कवीन्द्राणामपि स्मयः।।

।। ७।।

पताकाकलशोत्तंसैः सोद्ग्रीवैः स्वरिवेक्षितुम्।
पतत्रिपत्रपवनस्फालवाचालजालकैः।।

।। ८।।

च्छत्रच्छविभिरुत्तङ्गं शिखरावयवोच्छ्रयैः।
अन्तश्चतुष्कमाबद्धगाधकुण्डलजलम्।।

।। ९।।

उपर्युपरिसन्नद्धं शुभ्रकादम्बिनीच्छटम्।
विचित्रचित्ररुचिरचन्द्रशालाचमत्कृतम्।।

।। १०।।

द्वारस्फारपुरोभागक्लृप्तसुन्दरमन्दुरम्।
व्यरचि स्वच्छविच्छित्ति येन मारुतमन्दिरम्।।

।। ११।।

सीमानं शिल्पिशिल्पानां जयपत्तनशेखरम्।
जयन्तं वैजयन्तं कः स्तोतुमिष्टेऽनिलालयम्।।

।। १२।।

पाणिव्यापृतरुद्राक्षवलयं पार्वतीसखम्।
प्रतापः श्रीप्रतापेशं स्थापयामास भक्तितः।।

।। १३।।

साग्रेयचूर्णमञ्जूषमुत्पताकमयोमयम्।
प्रतापबाणमग्रयस्त्रं यः शिल्पिभिरकारयत्।।

।। १४।।

प्रतापध्वस्तविपदि प्रतापे बिभ्रति प्रजाः।
ददृशे विप्रयुक्तत्वं विधिषु स्त्रीषु न क्वचित्।।

।। १५।।

श्रिया श्रीदं धिया जीवं रुचा सूर्यं रुषा यमम्।
क्षमया क्ष्मां स धैर्येण पारावारं व्यडम्बयत्।।

।। १६।।

देव्यो द्वादश देवस्य षड्भुजिष्या मनोमुषः।
मान्या कलास्वसामान्या सा मान्याऽप्यस्य काऽप्यभूत्।।

।। १७।।

वर्षे भल्लजये पृथ्वीं पृथ्वीसिंहे प्रशासति।
परिणीता प्रतापेन रत्नलामेन्द्रकन्यका।।

।। १८।।
शराग्निवसुभूवर्षे हर्षेण महता नृपः।
व्युवाह यादवीं या तु जज्ञे माणिक्यपालतः।।
।। १९।।
अस्यां पुनः प्रतापेन्द्रान् त्रीण्यपत्यानि जज्ञिरे।
अप्राप्तयौवनान्येव पञ्चत्वं तानि लेभिरे।।
।। २०।।
राणावतीति विख्याता महिषी भीमवंशजा।
राजानं रञ्जयामास या शचीव विडौजसम्।।
।। २१।।
तोमरान्वयसम्पत्तिसिंहजा सिंहमध्यमा।
प्रिया प्रतापसिंहस्य क्रियासु पटुधीरभूत्।।
।। २२।।
भट्याणीं कामपि जयसरमेरपतेः सुताम्।
स सुलतानसिंहस्य परिणिन्ये यथाविधि।।
।। २३।।
कूर्मवंशाब्धिचन्द्रस्य चन्द्रावत्यावपि प्रिये।
प्रथमा राजनाथस्य परा संग्रामसिंहजा।।
।। २४।।
चन्द्रावत्यां कनीयस्यामपत्ये द्वे बभूवतुः।
ते हन्त दैवयोगेन देवभावमवापतुः।।
।। २५।।
रसाब्धिवसुचन्द्राब्दे गौडी शिवपुरेन्द्रजा।
भाद्रे वलक्षयं चम्पां व्यूढा कच्छमरुत्वता।।
।। २६।।
उपयेमे युगाम्भोधिवसुभूवत्सरे शुचौ।
झालीं हारिद्रदुर्गेन्द्रजसवन्तसुतां नृपः।।

।। २७।।

हड्डान्तः पातिपरणिदीपसिंहसुताऽमुना।
व्यूढाऽऽश्वसितपञ्चम्यां बुन्द्यां स्तम्भजयाब्दके।।

।। २८।।

राजा राघवदुर्गेन्द्रबलवन्तनृपात्मजाम्।
व्युवाह यौवनाध्मातः खीचणीं जयपत्तने।।

।। २९।।

पुत्रीं विजयसिंहस्य फतेसिंहस्य पुत्रिकाम्।
राष्ट्रोढीं योधपुरजां सुषुमामिव रूपिणीम्।।

।। ३०।।

शैलेषु वसुचन्द्राब्दे शुचौ खण्डे सितेतरे।
परिणिन्ये नवम्यां स निकषा ब्रह्मपुष्करम्।।

।। ३१।।

काचिच्छ्यामतरङ्गाख्या दासी भूपमनुव्रता।
तनयां नन्दकँवरां सुषुवे गुणनन्दिनीम्।।

।। ३२।।

सा प्राप्तयौवनानन्दकँवरा कूर्मभूभुजा।
राणावताय प्रददे कस्मैचिद्विष्णुवर्मणे।।

।। ३३।।

दासी रसप्रवीणाऽस्य प्रवीणा रसनर्मणि।
नामतो जेतृकँवरां जनयामास कन्यकाम्।।

।। ३४।।

दासी दीदारवक्षीति कृपापात्रममुष्य या।
असोष्ट कान्हदासं सा तथा मोहनदासकम्।।

।। ३५।।

रङ्गरायभुजिष्यायां द्वेऽपत्येऽस्य बभूवतुः।
बलभद्रः सुतः किञ्च मुक्तादिकँवरा सुता।।

।। ३६।।

कस्तूर्यामपि कस्याञ्चित्कस्तूरीतिलको नृपः।
पुत्रीमुत्पादयामास गुलाबकँवराभिधाम्।।

।। ३७।।

अपरा काचन गतिसरसा सरसा नृपे।
जनयामास विजयकँवरां प्रवरां गुणैः।।

।। ३८।।

रहःप्रसङ्गमासाद्य राज्ञो रङ्गतरङ्गिका।
असूत राजकँवरां ज्यौत्स्नी चन्द्रकलामिव।।

।। ३९।।

नृपस्य परिवारोऽयं यथावदिति कीर्तितः।
कियन्त्यथ चरित्राणि यथामति निरूपये।।

।। ४०।।

प्रतापे सालसे कश्चिद्रावो माचेडिकापतिः।
देशचिक्रंसया दूरं धावति स्म तुरङ्गमैः।।

।। ४१।।

प्रतापः श्रीप्रतापेन्द्रं नरुकः स्वामिनं द्विषन्।
कियतः साहसग्रामो ग्रामान्निघ्नीचकार सः।।

।। ४२।।

औद्धत्यं तस्य तच्छ्रुत्वा प्रतापेन्द्रः प्रतापवान्।
उच्चचाल रुषाध्मातः प्रवलैर्वलितो बलैः।।

।। ४३।।

मांसशोणितजम्बालः श्रीप्रतापप्रतापयोः।
सम्परायः प्रववृते निकषा राजदुर्गकम्।।

।। ४४।।

नरुके विजितप्राये तदन्तः पक्षपातिना।
जगदे श्रीप्रतापेन्द्रः कुशालीराममन्त्रिणा।।

।। ४५।।
किमनेन वराकेण जितेन भवतां यशः।
मनस्विनां न घटते क्षुद्रेण सह सङ्गरः।।
।। ४६।।
क्वैष पञ्चाश्वनिर्वाहक्षमग्रमटिकापतिः।
क्व यूयं सम्पदुद्रिक्तढुण्ढारपरमेश्वराः।।
।। ४७।।
तद्यात यूयमधुना शनैर्जयपुरं प्रति।
वयं प्रतिविधास्यामो नात्र कार्या विचारणा।।
।। ४८।।
इत्युक्त्वा वञ्चितः स्वामी कुशाली रामशर्मणा।
जितप्रायं तमुन्मुच्य पेदे जयपुरं जयी।।
।। ४९।।
तदारभ्य नरूकेण कुशालीरामशिक्षया।
राजदुर्गादिविषया वशयाञ्चक्रिरे क्रमात्।।
।। ५०।।
बीजमुच्चैरलवरराज्यस्यैतदिहोदितम्।
इदमेव क्रमादापदधुना बद्धमूलताम्।।
।। ५१।।
इतः पुनर्युगाम्बोधि वसुभूवर्षभाज्यगात्।
मार्गकृष्णनवम्यां वै योद्धुं राजाभिसिन्ध्यकम्।।
।। ५२।।
उपत्तुङ्गाभिधक्षेत्रं शोनलग्रामसीमनि।
प्रतापसिन्ध्ययोरासीद्रणः परमदारुणः।।
।। ५३।।
आनिन्ये योधनगराद्धलदो दोलताभिधः।
नैकसाहस्रराष्ट्रोढभटासिन्ध्यजिगीषया।।

।। ५४।।

आटोपभीषणाकारा राष्ट्रोढानां महाचमूः।
द्विषां भीत्यै समजनि नक्तं भूतकथेव सा।।

।। ५५।।

महाजीबीरखाँ कश्चित्सेनानी सिन्ध्यभूपतेः।
पुरः प्रतापसिंहेन युयुधे युद्धदुर्मदः।।

।। ५६।।

तदीयतोपयन्त्राणि प्रतापेन प्रचोदिताः।
निगृहीतुं समुत्पेतू राष्ट्रोढा राष्ट्रविश्रुताः।।

।। ५७।।

महाजीबीरखाँ वीक्ष्य राष्ट्रोढानभिवल्गतः।
तोपैरुड्डाययामास तूलराशीनिवानिलः।।

।। ५८।।

यावन्महाजिवीरेण राष्ट्रोढा भस्मसात्कृताः।
तावदेव प्रतापेन्द्रः प्रापत्तत्तोपपंक्तिषु।।

।। ५९।।

उद्दिश्य तोपयन्त्राणि प्रतापे युधि कूर्दति।
प्राद्रवत्सह सिन्ध्येन महाजिः स महाजितः।।

।। ६०।।

नाऽनापयिष्यद्यदा मन्त्री राष्ट्रोढान्युधि दोलतः।
न कदापि तदा सिन्ध्यः पलायिष्यत युद्धतः।।

।। ६१।।

पृष्ठं प्रलोक्य सिन्ध्यस्य जितकाशी प्रतापराट्।
स दोलतो निववृते लोलदश्वपटः पुरम्।।

।। ६२।।

कच्छस्यागच्छतोऽध्यध्यं रेवाडीस्थानमीयुषा।
दिल्लीनाथेन महता मेलापोऽभूद् यदृच्छया।।

।। ६३।।
प्रतापेन्द्रस्य दिल्लीन्द्रं नन्तुमध्वनि गच्छतः।
धीरं दध्वान नासीरे बालानन्दीयदुन्दुभिः।।
।। ६४।।
स महान्दुन्दुभिध्वानो रोदसी जठरम्भरिः।
परितः पूरयामास कर्णौ दिल्लीशतक्रतोः।।
।। ६५।।
तच्छ्रुत्वा चकितस्वान्तः स्वान्तिकस्थानुवाच सः।
कस्याऽयं दुन्दुभिध्वानो भवद्भिर्वार्यतामिति।।
।। ६६।।
इत्युक्तास्तस्य ते भृत्याः समेत्य नृपसम्मुखम्।
दुन्दुभिं वादयत मा न्यसेधन्निति साग्रहम्।।
।। ६७।।
बालानन्दगुरोरद्धा स्मृत्वा लेख्यं पुरातनम्।
व्याजहार प्रतापस्तान् मेघगम्भीरया गिरा।।
।। ६८।।
अतः परं दुन्दुभिर्वो ध्वनिष्यत्यनिवारितः।
काप्यत्र विचिकित्सा चेल्लेखं निष्काश्य दृश्यताम्।।
।। ६९।।
इति कूर्मोक्तिकलनं पतितश्रुतिकीटकैः।
तद्दूतैरेत्य विज्ञप्तो मौनमाधाय स स्थितः।।
।। ७०।।
अत्रान्तरे प्रतापेन्द्रो जेता सिन्ध्यक्षमापतेः।
कोणाघातध्वनद्बालानन्ददुन्दुभिराययौ।।
।। ७१।।
सशङ्क इव दिल्लीन्द्रः प्रतापस्य प्रतापतः।
आगच्छागच्छ कच्छ द्रागागच्छन्तं तमभ्यधात्।।

।। ७२।।

प्रपद्य श्रीप्रतापेन्द्र: पुरं किञ्चिदिवानत:।
युवतीव धवं वृद्धं तं सावज्ञमवन्दत।।

।। ७३।।

दिल्लीपतेरभिमुखं स्थितो मरकतद्युते:।
क्षत्रेश: सोऽभिजलदं नक्षत्रेश इवाबभौ।।

।। ७४।।

मिथोऽथ कुशलालापे विरते सादपुङ्गव:।
कृतप्रीतिरुवाचैनं करिष्णुरधिकारिणम्।।

।। ७५।।

प्रताप: स्वप्रतापेन हरिप्रस्थं धुरं वह।
पप्रच्छ मह्यमपि भो वसनाशनमात्रकम्।।

।। ७६।।

हरिप्रस्थव्यवस्थाद्य मया नियमिता त्वयि।
गरीयसी करिकुथा करिण्येव निधीयते।।

।। ७७।।

अद्धा प्रतापमित्युक्त्वा हरिप्रस्थहरिर्हहा।
किं वक्ष्यतीत्यस्य मुखे दृशं व्यापारयन्स्थित:।।

।। ७८।।

राजाऽपि गौरवात्तस्य तद्वचो रचिताञ्जलि:।
वदन्नोमिति जग्राह शिरसा न हृदा पुन:।।

।। ७९।।

यथा तथा समाधाय पुनरादाय सत्कृतिम्।
विसृष्ट: सादरं तेन जयपत्तनमासदत्।।

।। ८०।।

कियत्यपि गते काले भट्टारककुलर्द्धये।
भट्याणी नाम महिषी सुतं सूते स्म विश्रुतम्।।

।। ८१।।

विषद्रसवसुक्ष्माब्दे चैत्रे पक्षे तमस्तते।
द्वादश्यामस्य जननं जननन्दप्रकारणम्।।

।। ८२।।

यतोऽस्य भावि जगति सिंहत्वमिति बुद्धिमान्।
विमृश्य भूपतिर्नाम्ना जयसिंहमिति व्यधात्।।

।। ८३।।

लखवाख्योऽथ दुष्टात्मा युद्धाभिप्रायदुर्द्धरः।
समाजगाम सहसा सैन्यैः पदजिघृक्षया।।

।। ८४।।

शत्रुमाकर्ण्य सन्नद्धं स सेनां समनाहयत्।
युयुत्सया रिपौ प्राप्ते ह्युपेक्षा कस्य जायते।।

।। ८५।।

कृपीटयोनियन्त्रौघैर्ध्वानध्वनितदिङ्मुखैः।
उभयोः सेनयोर्जन्यमजनिष्ट भयानकम्।।

।। ८६।।

क्षणात्सस्रुरसृङ् नद्यो यासु भैरवचेष्टिकाः।
यथारुचि पपुः सस्नुर्विजह्रुः श्रममुज्झुः।।

।। ८७।।

लखवाख्यमथोद्दिश्य खड्गमाकृष्य कोशतः।
अश्वमुत्तेजयामास प्रतापः प्रियमानसः।।

।। ८८।।

श्रुत्वा प्रतापमायान्तं भीतः स लखवाह्वयः।
संस्थाप्य पत्तिपटलीं निलीय क्वचिदास्थितः।।

।। ८९।।

तदानीमेत्य केनापि धूर्त्तेन धरणीधवः।
परैरघानि नः सैन्यमिति मिथ्या निवेदितः।।

।। ९०।।

धूर्त्तोक्तिवञ्चितो हन्त धैर्यमुत्सृज्य पार्थिव:।
पलायत निरुच्छ्वासं पृथग्जन इवाहवात्।।

।। ९१।।

प्रागेव लखवाख्यस्तु चापलेन पलायित:।
मां चेत्पृच्छत कस्यापि न जयो न पराजय:।।

।। ९२।।

अस्वस्थोऽजनि लज्जालुस्तदारभ्य महीपति:।
प्रतिष्ठा प्राणिनां प्राणास्तद्ध्रासे स्वस्थता कुत:।।

।। ९३।।

गोविन्दसौधत: पश्चाद्धारायन्त्रालिदन्तुरम्।
चकार स चतुष्कोणं कुण्डं गाधमगाधधी:।।

।। ९४।।

इति प्रतापं शिथिलप्रतापं
बुद्ध्वा नरूकेण विवल्गताऽलम्।
आस्कन्दि, भानौ शिथिलस्वभानौ
तम:कुलेनेव कियत्यपि क्ष्मा।।

।। ९५।।

क्ष्मामेकपञ्चविंशतिसमा: पुनरग्निमासान्।
भुक्त्वा नृप: सुकृतदृच्छरदृग्दिनानि।।

।। ९६।।

अब्दे स्वरभ्ररसनागविधौ लुलोके
चैत्रस्य चन्द्ररुचि चित्तजदैवतेऽह्नि।
द्वे चानु तं जयपुरे विभवं भुजिष्ये
हित्वा चुकूर्दतुरुदारचिताचिताग्नौ।।

।। ९७।।

देवीषु या मरुपतेर्विजयस्य पौत्री
सा हन्त योधपुर एव विवेश वह्नौ।।

।। ९८।।

पृष्ठं यल्लखवाद्विषे युधि ददौ पञ्चद्विषभ्यः स्वयम्।
धृत्वा हन्त वजीररल्लिमपि तं विश्वस्तमग्राहयत्।।

।। ९९।।

इत्येतद्द्वयमेतदीययशसि प्रायः कलङ्कायते।
लोके कुत्र चिरं कलङ्कविरहः सर्वात्मना वर्त्तते।।

।। १००।।

जगत्सिंहो राजा धनदमदसन्दोहदलनं
पदं लब्ध्वा पित्र्यं दधदधिकमैश्वर्यमभितः।
समन्तात्सामन्तैरुपरचितसेवाञ्जलिपुटः
प्रजाचक्रं शक्रच्छविरहह पाति स्म पितृवत्।।

।। १०१।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे पञ्चदशः प्राप पूरणं सर्गः।।**

***

## षोडशः सर्गः

॥ १ ॥

अथ राजा जगत्सिंहः सिंहासनमधिष्ठितः।
उपप्लवरुजो निघ्नन्स जुगोप निजाः प्रजाः॥

॥ २ ॥

समयेनैव कियता परं प्रागल्भ्यमास्थितः।
परिणेतुं समारेभे स मारेण समो नृपः॥

॥ ३ ॥

वक्त्रं चन्द्रोपमं बाहू व्यायतौ परिघादपि।
वक्षः कपाटकठिनं कमठस्य मनस्विनः॥

॥ ४ ॥

श्रीजगत्सिंहदेवस्य देव्यः पञ्चदश श्रुताः।
सामान्ये द्वे कलामान्ये दास्यश्चैकोनविंशतिः॥

॥ ५ ॥

अन्तःपुरे समुद्रस्य मुख्या मन्दाकिनी श्रुता।
न मन्दा नाकिनी काचित्पुनरस्य निशान्तगा॥

॥ ६ ॥

प्रथमा तत्र राष्ट्रोढ योधपत्तनभूपजा।
द्वितीया काचिदुदयभानोतकुलनन्दिनी॥

॥ ७ ॥

अध्यूषुर्नव भट्याण्यो जगत्सिंहस्य मन्दिरम्।
स्थैर्यमास्थाय संवेता मूर्तिमत्य इव श्रियः॥

॥ ८ ॥

मान्या मेडतनी नाम परा चापावतीत्यपि।
सुजाणोतभवाऽप्येका ततस्तोमरवंशजा॥

।। ९।।

रसकर्पूरिका वेश्या रसकर्पूरभासुरा।
राजानं रञ्जयित्वाऽभूदर्द्धराज्यार्द्धभोगिनी।।

।। १०।।

प्रौढाऽपि कामिनी हन्त रिरंसा निरतं रते।
न तं कृतार्थयामास रसकर्पूरिकां विना।।

।। ११।।

रसरूपभुजिष्या या गोविन्दकँवरा सुता।
दत्ता खुमाणसिंहाय चालुक्यकुलचुञ्चवे।।

।। १२।।

जेतृरायाऽथ सरसराया जेठी प्रभातिका।
गोगाचन्दनचर्चा च चर्चाकेसरपूर्विका।।

।। १३।।

आसीन्नृत्तविलासाख्या सरसा गतिपूर्विका।
ग्यानी चन्दा च कमलवदना परिचारिका।।

।। १४।।

मगनोपपदा राया तथा सुखसमाजिका।
पराप्रवीणरायाऽपि सुन्दरादिविलासिका।।

।। १५।।

समुपास्य जगत्सिंहं वेश्या कुन्दणनामिका।
तनयं जनयामास शिशुरेव शशाम सः।।

।। १६।।

आसन्नमुष्य बहुशो धन्या अन्या अपि स्त्रियः।
किन्तु प्रसिद्धविभवा विनिर्दिष्टा यथायथम्।।

।। १७।।

रतौ कां न धुनोति स्म समरे न जिगाय कम्।
जगत्सिंहः स भूजानिर्विशेषादश्वसाधनः।।

।। १८।।
शिलाकोरितमध्यम्बावतीघाटि जगत्प्रभो:।
व्यञ्जनं वीक्ष्य भवति स्त्रीणामन्त:कृतार्थता।।
।। १९।।
पुष्पदामावतंसस्य धर्मधामाधिकद्युते:।
अस्य कामाकुलस्यासन् रामा एव परं प्रिया:।।
।। २०।।
अमात्यपदवी राज्ञ: कुलटेव दिवानिशम्।
न विशश्राम गच्छन्ती पुरुषात्पुरुषान्तरम्।।
।। २१।।
अहं त्वं नेति कलहो ढुण्ढारमरुराजयो:।
राणेन्द्रतनयोद्वाहं निमित्तीकृत्य पप्रथे।।
।। २२।।
प्रतस्थेऽथ जगत्सिंहो राष्ट्रोढेन्द्रजिगीषया।
अधस्ताम्यदहिं तन्वन्महीं सेनामयीमिव।।
।। २३।।
हस्तिग्राहा महाकच्छा नादयन्ती दिशो दश।
वाहिनी जगदीशेन मरावप्यवतारिता।।
।। २४।।
रजो दिक्षु वितन्वन्ती पङ्कसम्पर्कवर्तिता।
काऽप्यवर्द्धत निष्कम्पा वाहिनी वेगवाहिनी।।
।। २५।।
प्रारम्भ एव समितो मारवो मानभूमिप:।
जगत्सिंहबलं वीक्ष्य भीतो दुर्गे न्यलीयत।।
।। २६।।
युद्धात्पलाय्य दुर्गान्तर्निलीने मानवर्मणि।
श्रीमद्योधपुरं राजा लुलुण्ठाऽकुण्ठविक्रम:।।

।। २७।।

योधपत्तनमास्कन्द्य स्कन्दोपमपराक्रमः।
जितकासी जगत्सिंहो न्यवर्तत निजं पुरम्।।

।। २८।।

राणेन्द्रः कलहं श्रुत्वा नृपयोरुभयोर्मिथः।
कन्यां व्यापाद्य निभृतं मृतेत्युद्‌घोष्य शं दधौ।।

।। २९।।

एकमेव व्यधत्तेशः क्रुधा काममनङ्गकम्।
अयं पुनर्द्विषो भूरीननङ्गानोजसा व्यधात्।।

।। ३०।।

राज्ञो बभूवुरमृतरायमोहनमानकाः।
सचिवा यद्‌गृहद्वारि दध्वनुर्धीरमानकाः।।

।। ३१।।

रेजुर्माधवराजाम्बा दत्तगोविन्दलक्ष्मणाः।
लालजित्कीर्तिनाथाद्या गुरवोऽस्य गुरुश्रियः।।

।। ३२।।

आसन्पुरा किं न महामहान्तोः
प्रजामुदे श्रीगणगौरिकाद्याः।
अस्मिन्पुनः शासति ते विशिष्य
प्रापुर्जगत्सिंहनृपे प्रतिष्ठाम्।।

।। ३३।।

ज्येष्ठा बभार भट्याणी गर्भमव्यक्तलक्षणम्।
फलमन्तर्गतारम्भं यथा कलममञ्जरी।।

।। ३४।।

जयपत्तनचिक्रंसा विवल्गितबलं बली।
यवनं खानखानाख्यं जिगाय जगतीपतिः।।

।। ३५।।

चतुर्दश समा मासांश्चतुरश्चतुराश्रय:।
जगत्सिंहो नवाहानि कुर्वन्राज्यमिह स्थित:।।

।। ३६।।

बाणाद्रिवसुचन्द्राब्दे पौषकृष्णावलम्बिनीम्।
नवमीं प्राप्य पुण्यात्मा त्रिविष्टपमपद्यत।।

।। ३७।।

भास्वतीह जगत्सिंहे यात्यस्तं कालयोगत:।
भा इवान्तर्लसद्रागा राज्ञ्यो वह्निमुपाविशन्।।

।। ३८।।

......... हन्ताथ मोहनो मन्त्री पुरान्नरबलाद्बली।
मानेन्द्रं कञ्चिदानाय्य राज्ये न्यस्य व्याजृम्भत।।

।। ३९।।

एलावासितवारुणीमदसमुद्रेकप्रबुद्धस्मरो
नित्यं पद्मदृशां शतं निधुवने धन्यो धुनीते स्म य:।
सोऽयं कामनिधिर्विलासरसिकश्रेणीशिर: शेखरो
न स्यात्कस्य विशिष्य भूपति जगत्सिंह: प्रशंसास्पदम्।।

।। ४०।।

मानसिंहोऽपि राजा सन्मोहनाज्ञामनुव्रत:।
जयपत्तनसाम्राज्यवैभवं बुभुजेतराम्।।

।। ४१।।

इत: पुनर्व्यतीतेषु मासेषु प्राप्तदौहृदा।
जगत्सिंहस्य महिषी भट्याणी सुषुवे सुतम्।।

।। ४२।।

सम्वत्सरे शरक्ष्माभृद्वसुशुभ्रांशुसम्मिते।
राधशुक्लप्रतिपदि यस्य जन्ममहोत्सव:।।

।। ४३।।

सिंहो मृगानिव बलादयं जन्ये जयत्वरीन्।
इत्याशास्य व्यधुर्वृद्धा जयसिंहं तमाख्यया।।

।। ४४।।

प्रजाप्रहर्षहेतुः श्रीजयसिंहो दिने दिने।
मानमोहनशोकेन सममन्तर्व्यवर्द्धत।।

।। ४५।।

सर्वाः प्रकृतयोऽभ्येत्य मानसिंहं स मोहनम्।
जर्ष्येलसाहबद्वारा पत्तनान्निरकासयन्।।

।। ४६।।

साम्राज्यमेष भुञ्जानः स्थितो मासचतुष्टयम्।
जये जाते कथमपि प्रास्तो राज्यादिति श्रुतम्।।

।। ४७।।

पदादुत्थापितो मानो वृन्दावनमुपागतः।
आत्मन्यवज्ञोपहतो न जिजीव चिरं नृपः।।

।। ४८।।

जगत्सिंहसुतः श्रीमान्मानसिंहादनन्तरम्।
जयसिंहो जयपुरे राजाऽजनि जयोज्ज्वलः।।

।। ४९।।

स कुमारोऽपि वृद्धश्रीर्न दीनोऽप्यजडाशयः।
कलानिधिरनङ्कोऽपि शक्तिश्रद्धोऽपि वैष्णवः।।

।। ५०।।

जगतीं जगतीजानौ जयसिंहे प्रशासति।
नीतयो विलसन्ति स्म प्रजाकल्याणरीतयः।।

।।५१।।

झुथालाल इति ख्यातः संघीश्रावकसत्तमः।
वेदिता राजविद्यानाममुष्य सचिवोत्तमः।।

।। ५२।।
काचिदन्त:पुरे दासी रूपा श्रीरिव रूपिणी।
यया वृन्दावने वित्तं द्विजेभ्योऽदायि लक्षश:।।
।। ५३।।
अन्त:पुराद्विनिष्क्रम्य सामन्तैर्वन्दितो नृप:।
रामदुर्गं गतो नन्तुं देवीं श्रीजम्बुवाहिनीम्।।
।। ५४।।
राजा रत्नाकरवसुवसुभूवत्सरे शुचौ।
प्रातिष्ठताऽसिताष्टम्यां महताऽऽडम्बरेण स:।।
।। ५५।।
देवो देवीं नमस्कृत्य राजलोकनमस्कृत:।
समाययौ जयपुरं प्रोच्छ्रितध्वजतोरणम्।।
।। ५६।।
अथ जातुजय: सैन्यैरजमेरुपुरं गत:।
सादराग्रहमाहूत: साहबेन दिदृक्षुणा।।
।। ५७।।
तथैव तत्र राणेन्द्रो मेवाटविषयेश्वर:।
समाजगाम सोत्कण्ठं स्वानुरूपपरिच्छद:।।
।। ५८।।
मिथो युगपदारब्धनमस्कारमनोहर:।
मेलाप: कूर्मशीर्षोदराजयो: समजायत।।
।। ५९।।
अन्येद्युर्जयसिंहेन्द्र: समारुह्य मतङ्गजम्।
चामरैर्वीजित: श्रीमान्साहबस्यासदत्सद:।।
।। ६०।।
पीठादुत्थाय सहसा साहबो दर्शितादर:।
राज्ञ: सरलवलयं पाणिमाधत्त पाणिना।।

।। ६१ ।।
अथैनमुच्चकैः पीठे निवेश्य विहितस्तवः।
यथारीति यथाप्रीति सत्कारेण व्यसर्जयत्।।
।। ६२ ।।
दर्पोद्रेकसमुद्दामबाहुभिर्बाहुजैर्वृतः।
आमन्त्र्य साहबं राजा जयपत्तनमाययौ।।
।। ६३ ।।
चतस्रोऽस्य महादेव्यो देवडीचावडीत्यपि।
सीसोदनी तथा चन्द्रावती चन्द्रनिभानना।।
।। ६४ ।।
चावडी चारुचरिता रुचिरां सुषुवे सुताम्।
वैद्यैश्चिकित्समानाऽपि हन्त बालैव सा मृता।।
।। ६५ ।।
अथो चन्द्रावती नाम राज्ञी जयमनुव्रता।
गर्भं बभार महिता मही निधिमयं यथा।।
।।६६ ।।
गर्भतन्त्राणि निस्तन्द्रं यस्या वैद्यवृहस्पतिः।
लल्लूरामः प्रविदधे यो ममासीत्पितामहः।।
।। ६७ ।।
अन्तर्व्याजृम्भमाणेन सा गर्भेण व्यभासत।
आसन्नोदयकालेन प्राचीचन्द्रमसा यथा।।
।। ६८ ।।
विन्यस्तरक्षावलया मेदुरोदरशालिनी।
दोहदानुभवव्यग्रा सा कथञ्चिदवर्तत।।
।। ६९ ।।
मन्दाऽपि मन्दतरतां गतिस्तस्या नृपस्त्रियः।
गर्भस्थबालकगुणगौरवादिव शिश्रिये।।

॥ ७० ॥

शरीरसादखिन्नायास्तस्या: पाण्डुमुखच्छवे: ।
ऊरीचकार सहसा दक्षिणाक्षिविशालताम् ॥

॥ ७१ ॥

नीलाननं प्रसृमरपाण्डुभावपरिष्कृतम् ।
अध:कृतेन्दुसुषुमं तस्या: स्तनयुगं बभौ ॥

॥ ७२ ॥

न्यस्तेषु राजगणकैर्यन्त्रेषु पलभादिषु ।
प्रसोष्यमाणया राज्ञ्या शिश्रियेऽरिष्टयस्त्यकम् ॥

॥ ७३ ॥

चन्द्रावती नववसुवसुचन्द्राब्दवर्त्तिन: ।
पुत्रं भाद्रस्य धवलचतुर्दश्यामजीजनत् ॥

॥ ७४ ॥

अमन्दमोदमधुरं सम्यगारब्धमङ्गलम् ।
जीवजातं पुरे जातं जाते श्री जयनन्दने ॥

॥ ७५ ॥

पिता विलोक्य तनुजमाऽऽरामं शुभलक्ष्मणाम् ।
तेजोभिरभिरामं तं राममित्याख्यया व्यधात् ॥

॥ ७६ ॥

उत्सङ्गशायिनाऽनेन कुमारेण प्रसूर्बभौ ।
विष्वगुद्भिन्नमहसा साक्षाद् द्यौरिव भास्वता ॥

॥ ७७ ॥

पुत्रजन्ममुदाऽमुष्य पुरे वित्तानि वर्षत: ।
सौधा अपि पताकाभि: प्राप्तपट्टा इवाबभु: ॥

॥ ७८ ॥

तत: स ववृधे बाल: समन्तात्समुदीतभ: ।
वृद्धिहेतु: कुलाम्भोधे: कलाभिरिव चन्द्रमा: ॥

।। ७९ ।।
रामेऽष्टादशमासीये सञ्जाते जानुरिङ्गिणि।
जयसिंहस्य बलवान् व्याधिः समभवन्महान्।।

।। ८० ।।
जयोऽष्टादशवर्षीयः संघिना हन्त यन्त्रितः।
जग्रसे व्याधिजालेन राहुणेव निशाकरः।।

।। ८१ ।।
प्राणाचार्येषु तिष्ठत्सु गोविन्दं मनसा स्मरन्।
क्रमेण श्लथचैतन्यो जयसिंहो जहौ तनुम्।।

।। ८२ ।।
सहसा जयसिन्हेन्द्रे मृते सन्धिव्यतिक्रमात्।
संघिना मारितो राजा प्रजा इति ह चुक्रुशुः।।

।। ८३ ।।
क्रुद्धा हन्त द्विजन्मानः पुराणवसतिस्थिताः।
मन्दिराणि जिनेन्द्रस्य लुलुण्ठुः श्रावकद्विषः।।

।। ८४ ।।
निवृत्तायामथो दाहक्रियायां जयवर्मणः।
निलीय कुत्रचित्संघी स्थितः पौरभिया भृशम्।।

।। ८५ ।।
कोलाहले शनैः शान्ते दध्वानजननन्दनः।
प्रमाणीक्रियतामद्य रामो राजेति डिण्डिमः।।

।। ८६ ।।
सामन्ता वैरिशल्याद्याश्चण्डाश्चन्द्रावतीगिरा।
एजण्टसाहबं दूरादह्वासत कृताग्रहम्।।

।। ८७ ।।
जिग्राहयिषुभिः संघिहतकं स्वामिघातुकम्।
सामन्तैः साहबः श्रीमानाहूतो द्रागिवाययौ।।

।। ८८।।

यथामुख्यं स कमठानाहूय कृतनिश्चय:।
संघिन्युद्भावयामासु: स्वामिव्यापादपातकम्।।

।। ८९।।

निगृह्य संघिनं वीरो वैरिशल्येन शिक्षित:।
रोधयामास सुतरामधिचुन्नारदुर्गकम्।।

।। ९०।।

तत्प्रभृत्येव तेनात्र वैरिशल्येऽधिकारिता।
सैन्यनायकता किञ्च कृष्णसिंहे निधापिता।।

।। ९१।।

चन्द्रावतीनिदेशेन सर्वराज्यभरक्षमाम्।
व्यधत्त केसरां दासीमवरोधाधिकारिणीम्।।

।। ९२।।

अतिष्ठच्च स्वयं साक्षी प्राड्विवेकीयकर्मणाम्।
शीर्षोदिणीकृतारामे रामे भावं विभावयन्।।

।। ९३।।

व्ययं प्रदर्श्य सम्राज्ञै वैरिशल्यो महामति:।
करांशं ह्रासयामास तेन कीर्तिमविन्दत।।

।। ९४।।

क्रमाद्राज्यव्यवस्थायामवरोधाधिकारिणी।
चन्द्रावतीं समापृच्छ्य राजकार्याण्यवैक्षत।।

।। ९५।।

अङ्कस्थबालनृपतिर्माता चन्द्रावती तदा।
कलया कलयामास वर्द्धमानप्रजा: प्रजा:।।

।। ९६।।

दृष्टिदोषापनुतये कृतकज्जलचन्द्रकम्।
रामसिंहस्य वदनं बभौ मिवैन्दवम्।।

।। ९७।।

मिथ्याहारविहारेण भाविनो बलवत्तया।
रामोऽजनि रुजाक्षामो बावाजाने चिकित्सति।।

।। ९८।।

प्रत्याख्याय गते तस्मिन् राज्ञो रोगप्रतिक्रियाम्।
चन्द्रावतीगिरा चक्रे लल्लुजिन्मे पितामहः।।

।। ९९।।

इतासु रसपाथोधिनाडीषु मिहिरोदयात्।
चतुस्त्रिंशत्पलेष्वस्य कर्कलग्ने भृगौ भवः।।

।। १००।।

धने शुक्रः सहजगाः सूरसौरिज्ञभूसुताः।
शत्रौ केतुर्विधुर्भाग्ये राज्ये राहुर्व्यये तमः।।

।। १०१।।

स्निग्धोष्णा वायुरस्येति पित्तमस्तीति शीतलाः।
बलास इति तीक्ष्णोष्णाः प्रावर्तन्त तदा क्रियाः।।

।। १०२।।

यावती राज्यसम्पत्तिर्यावानुत्साह एव या।
तावत्यः शैशवे राज्ञो विरेजुरुपलालनाः।।

।। १०३।।

राज्ञि बाले जयपुरं मुग्धचन्द्रमिवाम्बरम्।
निर्बभौ नन्दनमिव नवीनहरिचन्दनम्।।

।। १०४।।

ततश्चन्द्रावतीतुष्टा लल्लूरामजिते तदा।
उदकत्वेन सङ्कल्प्य राज्ञा ग्राममदापयत्।।

।। १०५।।

यमाहुर्दोलतपुरं निकषा नेवटापुरम्।
निष्पद्यन्ते यतः सप्तरुप्यकाणां शतानि नः।।

।। १०६।।

तं द्वादशाब्ददेशीयं रामं चन्द्रावतीप्रसूः।
आदाय चौलकर्मार्थं ययौ श्रीजम्बुवाहिनीम्।।

।। १०७।।

तदानीमनिशं तत्र सज्जसर्वमहौषधः।
उपरामेन्द्रशिविरं निस्तन्द्रिर्लल्ल्युजित्स्थितः।।

।। १०८।।

वृत्तचूलो यथारीति प्रकल्पितमहोत्सवः।
विवेश सह हर्षेण जयजो जयपत्तनम्।।

।। १०९।।

उत्तुङ्गसौधाग्रगतागतास्ततो
राज्ञो दिदृक्षाकुलिताः कुलस्त्रियः।
मुखैः स्फुरद्भिः पिदधुः खमुच्चकै-
र्मन्दाकिनी फुल्लपयोजविभ्रमैः।।

।। ११०।।

निवृत्तचौलोत्सव एष कच्छपः
स्वकीयकान्त्या स्मरगर्वघस्मरः।
पुरन्ध्रिलोकस्य विवेश चक्षुषि
पुनः प्रमृष्टत्विषि राजमन्दिरम्।।

।। १११।।

यथा प्रभाते कमलाकरस्य
यथा समुद्रस्य विधूदये वा।
तथा तदा रामनृपे प्रविष्टे
ललास लक्ष्मीर्जयपत्तनस्य।।

।। ११२।।

श्रीलल्लुरामो नृपतेः पुरस्ताद्
व्याचष्ट पौराणकथानकानि।

परं न वैद्यः स पितुः पिता मे
पुराणवेत्ताऽप्यधिकं बभूव।।
।।११३।।

**श्रीमत्कुन्दननन्दनवैद्यश्रीकृष्णरामकविकलिते।**
**काव्येऽत्र कच्छवंशे पूर्तिमगात्षोडशः सर्गः।।**

***

## सप्तदशः सर्गः

।।१

पितुः पदमधिष्ठाय रामो राजा कलानिधिः।
कराम्बुजानि मुकुलीचकार जगतीभुजाम्।।

।।२ ।।

मरुदास्फालनलोलैर्महद्भिरैरावतैः समुल्लासि।
रामनिवासोपवनं समधिकममरावतीं हसति।।

।।३ ।।

श्रीवल्लभार्यपरिपूजितपादपद्मं
कन्दर्पकोटिसुषमं मुरलीप्रमोदम्।
संसक्तभक्तकृतकीर्तनमिन्दिरायाः
प्राणप्रियं मदनमोहनमूर्तिमीडे।।

।।४ ।।

शत्रुघ्नवीरविनुतः सुमित्रानन्दनादरः।
रामो विशिष्य कौशल्याश्रयो राज्यधुरं दधौ।।

।।५ ।।

अस्य तीक्ष्णप्रतापस्य परतापप्रदक्रमाः।
गुणास्तेते ववृधिरे ग्रीष्मस्य दिवसा इव।।

।।६ ।।

विमुक्तजलसम्पर्क क्वापि नो पङ्कलाञ्छितः।
चर्मसन्नद्धपृष्ठत्वात्स परं कमठः स्फुटः।।

।।७ ।।

ईशभक्तः श्रीशभक्तात्स प्रियो मुषितप्रियात्।
सौम्यो विभीषण सखाद्रामो रामाद्विशिष्यते।।

॥८॥

यस्य यात्रासु रिंगद्भिस्तुरङ्गैरुत्थितं रजः।
पर्जन्यः प्रकटीभूय शययामास वृष्टिभिः॥

॥९॥

हृदये करुणा यस्य कण्ठे विद्या दृशीन्दिरा।
कीर्तौ धवलता किञ्च प्रतापे तिग्मता स्थिता॥

॥१०॥

रामो रामस्य सदृशस्तैस्तैः शौर्यादिभिर्गुणैः।
वैषम्यमेतदेवास्य जाया जनकजा न यत्॥

॥११॥

शिवसिंहप्रभृतिभिः सचिवैः पञ्चभिर्नृपः।
कारयन् राजकार्याणि प्रौढिमानमपद्यत॥

॥१२॥

वस्वभ्रनन्दकौ वर्षे गवर्मेण्टप्रचोदितः।
भाद्रशुक्लचतुर्दश्यां साहबोऽस्याऽऽसदत्सदः॥

॥१३॥

सभासीनं महाराजं प्रतिनन्द्य मुहुर्मुहुः।
स्वातन्त्र्यं दित्सुरित्याह स्मीकिर्मीताननम्॥

॥१४॥

यावदन्तःस्थिता भूयं प्राधान्यं तावदासनः।
अतः परं निजं राज्यं स्वतन्त्रः शाधि शं यथा।

॥१५॥

तस्मिन् राजानमित्युक्त्वा गतवत्यात्तसत्क्रिये।
रावलोपपदो राज्ये शिवसिंहो व्यजृम्भत॥

॥१६॥

गतेषु त्रिषु वर्षेषु राजा राजीवलोचनः।
कलया कलयामास शिवसिंहदुराशयम्॥

।।१७।।
स्वतन्त्रोऽपि महाबुद्धिरन्तर्निह्नुतविक्रिय:।
कालं प्रतीक्षमाण: सन् यापयामास वासरान्।।
।।१८।।
यदाजमेरुनगराल्लालन: साहबोत्तम:।
आययौ मृगया हेतो राज्यहर्म्यस्थलान्तिकम्।।
।।१९।।
तदा राजाऽपि विहितमृगया कौतुक छल:।
प्रत्युज्जगाम तत्रैव शिवदीनेन शिक्षित:।।
।।२०।।
संमन्त्र्य लालनेनाथ गवर्मेण्टाधिकारिणा।
लक्ष्मणं शिवदीनञ्च सचिवौ द्वावकल्पयत्।।
।।२१।।
पुरा यच्छिवसिंहेन स्वमौलिमधिरोपितम्।
ऋणमुत्तारयामास तं च राज्याधिकारत:।।
।।२२।।
यदारुरोह सैन्यस्य वत्सरत्रय वेतनम्।
तच्चावतारयामास तारयामास च।।
।।२३।।
दिदेश द्विद्विमासान्ते वेतनं दीयतामिति।
तेनास्य नीतिशालित्वं बभौ दिक्षु विदिक्ष्वपि।।
।।२४।।
अधिगम्य पतिं रामं रत्नगर्भा नवोदयम्।
